© सर्वाधिकारः प्रकाशकाधीनः ।

**पत्रिका नाम** 'वाग्वै ब्रह्म' ।
(सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्रिका)

**अङ्कः** प्रथमः

**प्रकाशकः** **प्रो. प्रकाशचन्द्रः**, व्याकरणविभागाध्यक्षः

**प्रकाशनस्थलम्** व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

**प्रकाशनवर्षम्** 2016-17

**मुद्रकः** **वन्दना आर्ट्स**, 56, स्टेशन प्लाझा,
स्टेशन रोड, भाण्डुप (प.), मुम्बई 78 ।

**संरक्षकः** **प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
नवदेहली ।

**प्रधानसम्पादकः** **प्रो. सुदेशकुमारशर्म्मा**
प्राचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, मुम्बई, महाराष्ट्रम् ।

**सम्पादकमण्डलम्** **प्रो. प्रकाशचन्द्रः**, विभागाध्यक्षः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**प्रो. बोधकुमारझाः**, आचार्य्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. माधवदत्तपाण्डेयः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**डॉ. नवीनकुमारमिश्रः**, संविदाध्यापकः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**श्री. सुरेशचेमटे**, शोधच्छात्रः, (S.R.F.) राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।
**श्रीमती ऋतम्भरा पाण्डेयः**, शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई ।

**पुनर्वीक्षकमण्डलम्**

- **प्रो. (श्रीमती) अर्चना दूबे**, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातम् ।
- **डॉ. दिलीपकुमारझाः**, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः, दरभंगा, बिहारः, ।
- **डॉ. श्रीमती डौली जैन ।** वनस्थली विद्यापीठ, राजस्थान ।
- **डॉ. अशोकचन्द्रगौडः** राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः, हिमाचलप्रदेशः ।

**मूल्याङ्कनकर्तृमण्डलम्**

- **प्रो. मदनमोहनझाः**, आचार्य्यः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. देवदत्तसरोदे**, सहायकाचार्य, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईः, महाराष्ट्रम् ।
- **डॉ. वी. एस्. वी. भास्कररेड्डी**, सहायकाचार्यः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।
- **डॉ. ई. आर्. नारायणन्**, साहित्यविभागः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई, महाराष्ट्रम् ।

❖❖❖

# सम्पादकीयम्

संस्कृतमेव प्राणायते यस्मै तादृशस्य जगत्प्रसिद्धस्यानितरसाधारणस्य समग्रे राष्ट्रे स्वोपस्थित्या तत्रत्यस्थलं विलक्षणं सम्पादयमानस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य मानवसंसाधन विकासमन्त्रालयभारतसर्वकाराधीनस्य नॉकद्वारा सर्वोत्तमश्रेण्यां प्रमाणितस्य भारतराष्ट्रस्यार्थिकराजधान्यां मुम्बयां स्थितस्य लघावपि संसाधने बृहतीं सिद्धिं साधयितुं ख्यातस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य विद्याविहारस्य व्याकरणविभाग ऐषमः 06.03.2017 – 07.03.2017 इति व्यावहारिकप्रसिद्धावधौ दिवसद्वयव्यापिनीं राष्ट्रियशोधसंगोष्ठीं साफल्येन समायोज्य तत्रवाचितशोधपत्राणि प्रकाश्यानि सङ्कलय्य ऐदम्प्राथम्येन आई. एस्. एस्. एन्. संख्यया शोभायमानायां सन्दर्भितायां मूल्याङ्कितायाञ्च विभागीयायां शोधपत्रिकायां विन्यस्य तां तत्रभवताम्भवताम्पुरस्तात् पुरस्कुर्वाणोऽमन्दमानन्दं विन्दति ।

मुनीनां प्रामाण्यस्य यथोत्तरत्वात् प्रधाने च कृतयत्नस्यावश्यं फलवत्त्वनियमात् सुरूपस्यापि मुखस्य दर्पणे एव दृश्यमानत्वात् दर्पणायितस्य पातञ्जलमहाभाष्यस्यैव समक्षं पाणिनीयं तत्त्वं समवलोकयितुं विभागोऽयं महाभाष्याद्याह्निकद्वयस्य संगोष्ठ्यां विमर्शनमुपाकल्पत, यत्र विंशतिः शोधपत्राणि प्रस्तुतानि, तेषु च षोडश पत्राणि चित्वाऽत्र प्रकाशितानि । पत्रलेखकानां येषां पत्राणि पत्रिकायां प्राकाश्यं गतानि तेभ्यो विभागोऽयं प्रकटयत्याधमर्ण्यम्, प्रकाशयति च शुभं संदिशतां मान्यानां कुलपतीनां प्रो. परमेश्वरनारायणशास्त्रिमहोदयानां, प्रो. अर्कनाथचौधरीवर्य्याणां परमौदार्य्यम्, येषां सन्देशेन सनाथायते पत्रिकेयम् । पुनर्वीक्षकमण्डलस्य मूल्याङ्कनकर्तृमण्डलस्य च विदुषामाचार्य्याणां श्रमानपि स्मरामि साम्प्रतम्, एतैः स्वधीरधिषणया सर्वाणि शोधपत्राण्येकीकृत्य वीक्षितानि मूल्यैरङ्कितानि च, तेभ्योऽपि विभागः शतशः कार्त्तज्ञं तन्तनीति । एवमेव पत्रिकाया अस्याः संरक्षकेभ्यः, प्रधानसम्पादकेभ्यः, मुद्रकेभ्यः, सर्वेभ्यः एव विहित- सहयोगेभ्यो विनम्रभावेन विभागोऽयं स्वप्रणतिततिं निवेदयते ।

पत्रिकेयं 'वाग्वै ब्रह्म' स्वकीयेन प्रकाशेन अनादिनिधनम् अक्षरं शब्दतत्त्वं प्रकाशयेत्, व्यवहारजगतः प्रक्रियामर्थभावेन विवर्त्तयेत्, महता देवेन शाब्दिकानां सायुज्यं भूयादिति कामयमानः सम्पादकमण्डलः पत्रिकायाः समग्राभ्युदयं प्रकामयते ।

– **सम्पादकः**

**प्रो. पी. एन्. शास्त्री**
कुलपति
**राष्ट्रिय संस्कृत संस्थान**
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद द्वारा मान्यता प्राप्त)**

**Prof. P. N. Shastry**
Vice-Chancellor
**RASHTRIYA SANSKRIT SANSKTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
**(Accredited by NAAC with 'A' Grade)**

RSKS/VC/MSG/2017-18/ Date – 13.04.2017

# शुभसन्देशः

'वागेव विश्वा भुवनानि जज्ञे' 'भूरिति व्याहरत् भुवमसृजत्' इत्यादिश्रुत्या वाचः उपादानकारणत्वं भुवनानां सिद्धम् । तस्मात् पातञ्जलदर्शने वागेव ब्रह्मत्वेन समुपास्यते । उक्तञ्च हरिणा – 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति । अत्र शब्दतत्त्वात्मकस्य ब्रह्मणः प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् अर्थात् नित्यत्वम् 'अनादिनिधनमि' त्यनेन, व्यापकत्वम्, 'अक्षरम्' इत्यनेन, 'प्रक्रिया जगतो यतः' इत्यनेन च तस्य प्रामाण्यं प्रदर्शितं भवति । तथाहि व्याकरणदर्शनानुसारं वाग्ब्रह्म एव शब्दार्थोभयात्मकजगदाकारेण विवर्त्तते ।

वाचः ब्रह्मणश्चाभेदं ख्यापयत् 'वाग्वै ब्रह्म' इति नाम्नी प्रकाशमाना राष्ट्रियसंस्कृतसंस्थानस्यैवाभिन्नस्य मुम्बईस्थितस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य व्याकरण–विभागस्य सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्रिका व्याकरणशास्त्रस्य विकासाय, शोधशेमुष्याः संवर्धनाय च भूयादिति भगवन्तं परमेश्वरं प्रार्थये । पत्रिकाप्रकाशने संलग्नाय संपादकमण्डलाय चात्र प्रदत्तशोधलेखाय लेखकायास्मिन्नवसरे साधुवादांश्च सन्ददे ।

(प्रो. परमेश्वरनारायणशास्त्री)

Shree Somnath Sanskrit University
(Estd. by Government of Gujrat)
Rajendra Bhuvan Road, Veraval – 362 266
District : Gir Somnath, Gujrat, INDIA
Phone : 02876-244531 • Fax : 02876 -244417

Prof. Ark Nath Choudhary
Vice-Chancellor

Ref.: SSSU/VC/41/2017 Date – 31.03.2017

# शुभाशंसनम्

मुम्बईनगरस्थ-राष्ट्रिय-संस्कृत-संस्थानस्य के. जे. सोमैया संस्कृतविद्यापीठम् **वाग्वै ब्रह्म** इति नामधेयां व्याकरणशास्त्रीय-शोधपत्रिकां प्रकाशयतीति विदित्वा परममामोदमावहामि । 'वागेव विश्वा भुवनानि जज्ञे' इति श्रुतिः प्रतिपादयति । अद्वैतिनां मते यथा ब्रह्मणो विवर्तोऽयं संसारः तथैव वैयाकरणानां मते वागेव ब्रह्म, तस्मात् वाग्ब्रह्मणः संसारोऽयं नामरूपात्मकः संजायते । अत एव भर्तृहरिणा वाक्यपदीये ग्रन्थे प्रोक्तम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**

इदं शब्दतत्त्वमुत्पत्तिविनाशरहितं व्यापकं ब्रह्म मन्वानो हरिः अस्मादेव संसारस्य अर्थरूपा प्रक्रिया विवर्तभावमापद्यते इति स्वीचकार । वैयाकरणानां शब्दब्रह्मेदं स्फोटरूपं वर्तते । तत् नानारूपेण प्रस्फुट्यमानं स्वस्मिन्नेव च समाविश्यमानं सर्वदा भवति । शब्दब्रह्मणो विषये श्रुतिस्मृती अपि कथयतः –

**सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।**
**उतान्ये विदुरन्यामिव च एनां नानारूपात्मनि सन्निविष्टाम् ॥**

एतावता वाग् ब्रह्म विद्यते इति पक्षः शास्त्रेऽनेकत्र उपस्थापितः । अत एव **वाग्वै ब्रह्म** इति अन्वर्थसंज्ञिकायाः शोधपत्रिकायाः प्रकाशने संलग्नाः प्राचार्यप्रभृतयो विद्वांसः संपादकाश्च भूरि अभिनन्द्यन्ते । सारस्वतीं सेवां कुर्वाणः परिसरोऽयं ख्यातिं लभतामिति मे शुभाशंसनं पौनः – पुन्येनेति शम् ।

(प्रो. अर्कनाथ चौधरी)

**राष्ट्रिय संस्कृत संस्थान**
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन संचालित)
**क. जे. सोमैया संस्कृत विद्यापीठ**
213, पॉलिटेक्निक भवन, (द्वितीय तल)
विद्याविहार, पूर्व, मुम्बई – 400 077
**NAAC द्वारा 'A' ग्रेड प्राप्त**

**RASHTRIYA SANSKRIT SANSKTHAN**
Deemed to be University
(Under Ministry of HRD, Govt. of India)
**K. J. Somaiya Sanskrit Vidyapeeth**
213, Polytechnic Building, (IInd Floor)
Vidyavihar, East, Mumbai – 400 077
**(Accredited by NAAC with 'A' Grade)**

# शिवसङ्कल्पमस्तु

विद्यापीठस्यास्य व्याकरणविभागस्य आचार्यप्रकाशचन्द्रवर्य्याणामाध्यक्ष्ये सन्दर्भिता मूल्याङ्किता च वार्षिकी विभागीयशोधपत्रिका **'वाग्वै ब्रह्म'** इति नामधेया प्रकाशतां यातीति परमहर्षस्य विषयतामातनोति । पत्रिकायाममुष्यां व्याकरणशास्त्रस्य गम्भीरतत्त्वानां संशोधनं समीक्षणञ्च भिन्नागमदर्शनपरिप्रेक्ष्ये षोडशभिः शोधपत्रैः प्रस्तुतमस्तीति छात्राणां गवेषकाणामध्यापकानाञ्च अनुशीलनाय महान्तमवकाशं कल्पते ।

अत्रेदानीं व्याकरणविभागं, पत्रिकासम्पादने कृतश्रमं विद्वज्जनं, गवेषकसम्पादकञ्च साधुवादेन तोषयामि । **'वाग्वै ब्रह्म'** स्वनामानुगुणं शास्त्रसमुपासकानां कृते विशेषतः व्याकरणतत्त्वाभिलिप्सूनां कृते चाजिह्मां काञ्चन राजपद्धतिमाविष्कुर्यादिति भगवन्तं शिवं प्रार्थये ।

मुम्बई
20.04.2017



(प्रो. सुदेश कुमार शर्मा)
प्राचार्य

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शब्दानुशासनविमर्शः | प्रो. प्रकाशचन्द्रः | 01 |
| 2. | पस्पशाह्निकग्रन्थिविमोकः | प्रो. बोधकुमारझाः | 10 |
| 3. | माहेश्वरसूत्रेषु द्विधा णकारानुबन्धविमर्शः | डॉ. अशोकचन्द्रगौडशास्त्री | 21 |
| 4. | भाष्यानुसारिशब्दार्थसम्बन्धविमर्शः | डॉ. शरदचन्द्रसाहुः | 24 |
| 5. | सैषा संस्कृते भाषितभङ्गी | डॉ. दीपेशकतिरा | 28 |
| 6. | शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे | डॉ. माधवदत्तपाण्डेयः | 34 |
| 7. | णकारानुबन्धत्वविचारः | डॉ. नवीनकुमारमिश्रः | 39 |
| 8. | महाभाष्यपस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | श्रीसुरेशचेमटे | 45 |
| 9. | पस्पशाह्निके प्रयुक्तविशिष्टशब्दानां परिशीलनम् | श्रीमती ऋतम्भरा पाण्डेयः | 52 |
| 10. | लृकारोपदेशविमर्शः | श्रीसत्यराजरेग्मी | 58 |
| 11. | पस्पशाह्निकोक्तमन्त्रार्थविमर्शः | सुश्रीः विदुषी बोल्ला | 62 |
| 12. | सिद्धे शब्दार्थसम्बन्धे | श्री ईशान्तः | 76 |
| 13. | अथ शब्दानुशासनम् | सुश्रीराधाशर्म्मा | 82 |
| 14. | व्याकरणाध्ययनस्य मुख्यगौणप्रयोजनानि | श्रीआशिषडोगरा | 85 |
| 15. | रक्षोहागमलघ्वसन्देहा' इत्यस्य विमर्शः | श्रीचन्द्रमापौड्यालः | 92 |
| 16. | पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | सुश्रीः मुग्धा चन्द्रकान्त दाते | 95 |
| • | संगोष्ठीप्रतिवेदनम् | | 102 |


❖❖❖

# शब्दानुशासनविमर्शः

✍प्रो. प्रकाशचन्द्रः

**शब्दानुशासनं नाम व्याकरणशास्त्रम् । अत्र शब्दप्रमाणकत्वात् आचार्य्यैः शब्दानां साधुत्वं बोध्यते । साधुत्वञ्च वस्तुतः पुण्यजननयोग्यत्वम् । तच्च महर्षिभिरेव वेद्यम्। तैः स्वधीरधिषणया साधुत्वबोधनाय काचन शास्त्रीया प्रक्रिया समाविष्कृता। तया प्रक्रियया जातं ज्ञानम्, तदधीनप्रयोगश्चैवाभ्युदयकरः । उक्तञ्च वार्त्तिककृता ''शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देने'' ति । अत्र शब्दानुशासनविमर्शे आचार्येण शब्दानुशासनं नाम किम्? शब्दस्य द्वैविध्यम्? शब्दानुशासनस्योपयोगित्वम्, शब्दानुशासनपरम्परा, शब्दानुशासनस्य विधिः इत्यादिविषयाः सनिष्कर्षं विमृष्टाः । ( स. )**

शब्दविषयो यथा गाम्भीर्येण प्रमाणरूपेण तात्त्विकरूपेण च भारतीयैर्मनीषिभिः प्रस्तुतः न तथा अन्यैश्चिन्तितः । ज्ञानसाधनेषु सर्वाधिकं महत्त्वपूर्णं स्थानं शब्दस्यैव विद्यते । यत्र प्रत्यक्षानुमानादिप्रमाणैः प्रमेयसिद्धिर्न भवितुमर्हति तत्र शब्दप्रमाणेन तत्सिद्धिः क्रियते । यथा बृहदारण्यकोपनिषदि जनकयाज्ञवल्क्यसंवादे जनको याज्ञवल्क्यं पृच्छति 'अस्तमित आदित्ये याज्ञवल्क्य! चन्द्रमस्यस्तमिते शान्ते चाग्नौ किं ज्योतिरेवायं पुरुष इति ?' याज्ञवल्क्य उत्तरन् कथयति 'वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते, कर्म कुरुते विपल्येतीति तस्माद्वै सम्राट् ! अपि यत्र स्वपाणिर्न विज्ञायते, अथ यत्र वागुच्चरति उपैव तत्र ज्योतिरिति एवमेवैतद् याज्ञवल्क्य ।'[1] एवंविधानि बहूनि आर्षवाक्यप्रमाणभूतानि दृश्यन्ते यैः वाचः अर्थाच्छब्दस्य सर्वोत्कृष्टत्वमङ्गीक्रियते ।

शब्दस्य प्रमाणदृष्ट्या प्रसिद्धं भाष्यवचनं विद्यते '**शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणम् ।**'[2] अर्थात् पाणिन्यादिभिर्वैयाकरणमूर्धन्यैः यत्किमपि शब्दतत्त्वं व्याकरणद्वारा निर्दिष्टं तत् सर्वं शब्दप्रमाणस्वरूपं वर्तते, तेनैव प्रमाणेन च वयं शाब्दिकाः वर्त्तामहे ।

### शब्दानुशासनं किम्

महाभाष्यकारेण भगवता पतञ्जलिना स्वग्रन्थस्य प्रारम्भः '**अथ शब्दानुशासनम्**'[3] इति वचनेन विहितः । तत्र जिज्ञासा भवति यत् किं नाम शब्दानुशासनम् इति । ततोऽग्रे भाष्यदर्शनेन जिज्ञासा शान्ता भवति । शब्दानुशासनञ्च स्पष्टं भवति । यथा कथयति भाष्यकारः '**अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं**

**वेदितव्यम् ।'**[4] अस्य भाष्यस्य विवरणेन विषयो विवृतो भवति । यथा प्रदीपकारः लिखति 'स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावत् व्याचष्टे, अथेत्ययमिति । इतिशब्दोऽथशब्दस्य स्वरूपेऽवस्थानाय प्रयुक्तः । एवं हि पदान्तरैः सामानाधिकरण्येन सम्बन्धे सति अथशब्दो व्याख्यातुं शक्यते । स्वरूपेऽवस्थितिश्च सर्वनाम्ना परामृश्यते 'अयम्' इति । शब्द इति । स्वरूपकथनं विस्पष्टप्रतिपत्त्यर्थम् । अधिकारार्थ इति । अधिकारः प्रस्तावः, द्योत्यत्वेनास्य प्रयोजनमित्यर्थः । अथशब्दस्याधिकारार्थत्वे यो वाक्यार्थः संपद्यते तं दर्शयति, शब्दानुशासनमिति । अनेकक्रियाविषयस्यापि शब्दानुशासनस्य आरभ्यमाणता अथशब्दसन्निधाने प्रतीयते । व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनम् ।' अत्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावात् न 'उभयप्राप्तौ कर्मणि' (अष्टा. 2/3/66) इत्यनेन षष्ठी अपितु 'कर्तृकर्मणोः कृति' (अष्टा. 2/3/65) इत्यनेनेति 'कर्मणि च' (अष्टा. 2/2/14) इति समासप्रतिषेधाप्रसङ्गात् ।[5] अस्मिन् विषये पदमञ्जरीकारस्यापि चिन्तनं विषयस्य प्रकाशने महत्त्वपूर्णं विद्यते यथा काशिकाटीकाकारः कथयति 'अथ इत्ययं शब्दोऽधिकारार्थः । अधिकारः प्रस्तावः प्रारम्भः तमथशब्दो द्योतयति । 'शब्दानुशासनम्' इत्यतावत्युच्यमाने सन्देहः स्यात् किं शब्दानुशासनं प्रारभ्यते उत श्रूयते इति । अथशब्दे तु सति क्रियान्तरव्यवच्छेदेन प्रस्तूयते इत्यर्थो निश्चीयते । विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतो ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम् । अत्र अनुपूर्वो हि शासिः विविच्य ज्ञापने दृष्टः । ऋग्वेदप्रमाणेन अनुशासनशब्दं विवृण्वन् अग्रे लिखति 'तद्यथा अक्षेत्रवित् क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः । एतद्वै भद्रमनुशासनस्योत स्रुतिं विन्दत्यञ्जसीनाम्' (ऋग्वेदः 6/54/1)' अनेन मन्त्रद्वयेन अनुशासनशब्दस्य प्रामाणिकमर्थं प्रस्तुतवान् आचार्यः हरदत्तमिश्रः ।[6]

अनुशासनशब्दस्येममर्थम् आचार्यः भट्टोजिदीक्षितोऽपि शब्दकौस्तुभे अनुमोदितवान् यथा समानमेव मन्त्रद्वयमुद्धृत्य मन्त्राभिप्रायं स्पष्टयन् लिखति 'अत्र हि गुणत्रयोपेतेन सद्गुरुणाऽस्मान् शिक्षयेति पूषा प्रार्थ्यते । तत्र अञ्जसेति शैघ्र्यमुक्तम् । अनुशासति विविच्य बोधकत्वम् 'बहुलं छन्दसि (अष्टा. 2/4/73) इति शपो न लुक् । इदमित्थमेवेति यो ब्रूयादिति प्रमेयनिष्कर्ष उक्तः । ब्रवदित्यत्र लेटोऽडाटौ (अष्टा. 3/4/94) इत्यट् । तथा च अनुशिष्यन्ते विविच्य असाधुभ्यो विभज्य बोध्यन्ते येनेति करणे ल्युट् । ततश्शब्दानामिति कर्मणि षष्ठी ।[7]

नागेशभट्टोऽपि तादृशं व्याख्यानं स्वीकुर्वन् उद्योते कैयटदीक्षितौ अनुकुर्वन् भाष्याशयं प्रकाशयन् निगदति 'अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य ज्ञाप्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भावः । इदमेव ध्वनयितुं भाष्ये नामपदोपादानम् । नामनामिनोरभेदात् नाम शास्त्रम् इति सामानाधिकरण्यम् । अनेनापभ्रंशानामविषयत्वं सूचितं

ध्वनीनां च ।'[8] 'नवेति विभाषा' इति सूत्रभाष्ये **साध्वनुशासनेऽस्मिन् शास्त्रे विभाषा तस्य साधुत्वम्**[9] इति वार्तिकेन भाष्यकारेण व्याकरणशास्त्रं साधुत्वानुशासनं शास्त्रमिति संसाधितम् ।

तदेवं व्याकरणशास्त्रं साधुशब्दानुशासनशास्त्रं विद्यते इति सिद्धान्तरूपेण सर्वैः स्वीक्रियते ।

**शब्दस्य द्वैविध्यम्**

शब्दानुशासनं साधुशब्दान्वाख्यानं व्याकरणमिति ज्ञाते तत्त्वे केषां शब्दानामनुशासनं व्याकरणमिति जिज्ञासाप्रश्नमुद्भावयन् पृच्छति भाष्यकारः '**केषां शब्दानाम्?**'[10] अयं प्रश्नः स्वाभाविकोऽस्ति यतो हि शब्दशब्दस्य सामान्यशब्दत्वात् विना प्रकरणादिना विशेषेऽवस्थानाभावात्[11], लोकव्यवहारे ध्वनावपभ्रंशे च शब्दप्रयोगादिति[12], तेषामपि अनुशासनप्रसङ्गः इति[13] जिज्ञासा स्वाभाविकी भवति । अतः विषयनिदर्शनपूर्वकं कथयति भाष्यकारः '**लौकिकानां वैदिकानाञ्च**'[14] प्रदीपकारः उभयविधशब्दाना व्युत्पत्तिं प्रदर्शयन् कथयति 'लोके विदिता' लोकसर्वलोकाट्ठञ् (अष्टा. 5/1/44) इति 'ठञ्' अथवा भवार्थे अध्यात्मादित्वाट्ठञ् (तत्र भवः इति सूत्रविषयाधिकारे अन्तपूर्वपदाट्ठञ् इति सूत्रपठितेन अध्यात्मादिभ्यश्च इति ठञ् प्रत्यये लोके भवाः लौकिका इति भावः) वेदे भवाः - वैदिकाः। उभयविधशब्दानां पृथगुपादानं किमर्थमिति प्रश्ने कैयटः कथयति 'वैदिकानामपि लौकिकत्वे प्राधान्यख्यापनाय पृथगुपादानम् । यथा ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति वसिष्ठस्य । तेषां तु प्राधान्येनापभ्रंशपरिहारात् । अथवा भाषाशब्दानामेव लौकिकत्वमिति भेदेन निर्देशः ।[15] लौकिकानां वैदिकानाञ्च केषाञ्चित् प्रसिद्धानां शब्दानामुदाहरणत्वेन नामोल्लेखपूर्वकं दिङ्मात्रं निदर्शनं करोति भाष्यकारः' तत्र लौकिकास्तावत् गौः, अश्वः, पुरुषः, हस्ती, शकुनिः, मृगः, ब्राह्मण इति । वैदिकाः खल्वपि 'शन्नोदेवीरभिष्टये', 'इषे त्वोर्जे त्वा', 'अग्निमीळे पुरोहितम्', 'अग्न आयाहि वीतये' इति ।[17]

अत्र प्रश्न उदेति यत् वैदिकानां शब्दानां प्रधानत्वेऽपि लौकिकानां पूर्वनिर्देशः कथमुपपद्यते? अत्र उद्योतकारस्य चिन्तनमस्ति यत् वैदिकानां प्रधानत्वेऽपि लौकिकानां पूर्वनिर्देशस्तद्वदादरसूचनार्थः ।[18]

अस्मिन् विषये एतदपि वक्तुं शक्यते यत् वेदस्य दृष्टानुविधित्वात्, यथा भाष्यकारः 'क्ङिति च' दीधीवेवीटाम् इत्यादिसूत्रभाष्ये निर्दिशति '**दृष्टानुविधिश्छन्दसि भवति**',[19] अर्थात् 'दृष्टस्यैव छन्दस्यनुविधानमित्यर्थः'[20] इति प्रदीपकारः । छन्दसि दृष्टानुविधित्वादेव पाणिनिना 'बहुलं छन्दसि' इति सूत्रमेकादशप्रकरणेषु पठितम् तथा 'व्यत्ययो बहुलम्' बहुलं छन्दस्यमाङ्योगेऽपि, 'क्त्वापि छन्दसि', 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[21] इत्यादीनि बहूनि छन्दोविषयाणि सूत्राणि सूत्रितानि यैर्ज्ञातुं शक्यते वैदिकशब्देषु दृष्टानुविधिः स्वीक्रियते । अतः मुख्यतः लौकिकशब्दानामनुशासनं व्याकरणं विद्यते इति, 'लौकिकानाम्'

इति पूर्वनिर्देशः कृतः भाष्यकारेणेति वक्तुं युज्यते । तदेवं द्विविधानामपि लौकिकानां वैदिकानाञ्चानुशासनं व्याकरणशास्त्रमिति प्रतिज्ञायते ।

**शब्दानुशासनस्य आवश्यकता**

शब्दानुशासनस्य का आवश्यकता इति जिज्ञासायां भाष्यनिर्दिष्ट शब्दानुशासनस्य प्रयोजनानि द्रष्टव्यानि भवन्ति । अपि च सर्वोऽपि जनोभ्युदयं कामयते । यश्च विना साधुशब्दज्ञानं न सम्भवति, अतः शब्दानुशासनस्य आवश्यकता भवति ।

शब्दानुशासनाभ्यासेन शब्दस्य वास्तविकं स्वरूपं ज्ञातुं शक्यते तस्य प्रयोगेण च अभ्युदयपाप्तिः भवति यथा भाष्यकारः कथयति '**शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवतीति ।**'[22] अतः वृद्धिरादैच् इति सूत्रे सूत्रकारेण च वृद्धिशब्दः पूर्वः प्रयुक्तः । यथा कथयति भाष्यकारः अथवा पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा । कुत एतत् । सता हि कार्यिणः कार्येण भवितव्यम् तद्यथा इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । कथं वृद्धिरादैच् इति । एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुंक्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च । अध्येतारश्च वृद्धियुक्ता स्युरिति ।[23] 'सिद्धे शब्दार्थसम्बन्धे' चेति वार्तिके च वार्तिककारेण नित्यशब्दस्य स्थाने सिद्धशब्दः प्रयुक्तः । तत्रापि भाष्यकारः कथयति माङ्गलिक आचार्यो महत्तः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ।[24] सर्वेषां कल्याणाय शास्त्रस्य प्रवर्तनं कुर्वन्ति आचार्या इति । साधुशब्दानां ज्ञानाय वेदानाञ्च सम्यग्बोधाय शब्दानुशासनस्य महतीमावश्यकतां मत्वा आचार्यैः शब्दानुशासनं प्रवर्तितम् । आचार्यो भर्तृहरिः प्रकारान्तरेण शब्दानुशासनस्यावश्यकतां प्रतिपादयन् कथयति ।

**कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।**
**चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ।।**[25]

अत्र टीकाकारः विषयं स्पष्टयन् निगदति यथैव हि शरीरे दोषशक्तिं रत्नौषधादिषु च दोषप्रतीकारसामर्थ्यं दृष्ट्वा चिकित्साशास्त्रमारब्धम् । रागादींश्च बुद्धेरुपप्लवानवगम्य तदुपघातहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राणि उपनिबद्धानि । तथेदमपि साधूनां वाचः संस्काराणां ज्ञापनार्थमपभ्रंशानां चोपघातानां त्यागार्थं लक्षणमारब्धम् । तत्र चिकित्साशास्त्रं चरकादिकम् । तत्र लक्षणशास्त्रं शब्दानुशासनम् । अध्यात्मशास्त्रं योगशास्त्रम् [26] अर्थात् कायवाग्बुद्धिविषयाणां दोषाणां मलानाञ्च निवृत्त्यर्थं तत्तच्छास्त्राणामावश्यकतां दृष्ट्वा ततत्त्छास्त्रानुशासनं कतमाचार्यैः । योगदर्शनस्य प्रथमं वचनमपि अनुशासनमूलकं विद्यते 'अथ योगानुशासनम्'[27] इति । तदेवं वाङ्मलानामपभ्रंशानां क्षयाय साधुशब्दप्रयोगपूर्वकमभ्युदयाय च शब्दानुशासनमावश्यकं भवतीति निश्चप्रचम् ।

**शब्दानुशासनपरम्परा**

शब्दात्मकवेदस्य नित्यत्वाद् यथा वेदा अनादिपरम्परया संप्राप्यन्ते तथैव शब्दानुशासनस्य च वेदवन्नित्या अनादिपरम्परा स्वीक्रियते अस्मिन् विषये वाक्यपदीयस्य काश्चन कारिका द्रष्टव्या भवन्ति-

**नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।**
**प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते ।।**[28]

अर्थात् शब्दानां स्वरूपतो नित्यत्वे कृतकत्वे वा तेषामादिः प्रथमः कालो न विद्यते । शब्दानां कृतकत्वपक्षे सा चैषा नित्यता प्राणिनामिव व्यवस्थानित्यतोच्यत इति ।[29] शब्दनित्यत्ववादे कूटस्थनित्यतया कृतकत्वे कार्यशब्दवादे वा अनादौ संसारे शब्दव्यवहारस्य प्रवाहनित्यतया शब्दानाम् आदिः इदंप्रथमता न विद्यते नास्तीत्यर्थः । एवं चायं साधुरयमसाधुरिति व्यवहारप्रवाहस्यानादितया नाभिनवान् शब्दानुत्पाद्य तेषां साधुत्वबोधनं शक्यसम्भवमिति साधुत्वव्यवस्था निर्विवादेति भावः ।[30] अनादिपरम्परया तत्र साधुशब्दानुशासनव्यवस्था व्याकरणेन क्रियते तां च कश्चिदनर्थिकां साधयितुं न शक्नोति यथाऽग्रे कथयति आचार्यः भर्तृहरिः -

**नानर्थिकां कश्चिद्व्यवस्थां कर्तुमर्हति ।**
**तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ।।**[31]

अर्थात् कश्चित् मन्दोऽपि अनर्थिकां निष्प्रयोजनाम् इमां साधुत्वविषयिकां व्यवस्थां कर्तुं नार्हति, यतो हि पाणिन्यादेः साग्रहं साधुत्वविषयकव्यवस्थायां प्रवृत्तिदर्शनात्प्रयोजनत्वं तस्या अध्यवसीयत इति भावः । तस्मात् साधुत्वविषयकव्यवस्थायाः सप्रयोजनत्वात् शिष्टैः पाणिन्यादिभिः साधुत्वविषया स्मृतिः अनादिगुरुपूर्वक्रमागता व्याकरणस्मृतिः निबध्यत इत्यर्थः।[32] ततश्च वाक्यपदीयकारः कथयति -

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।**
**आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ।।** [33]

अर्थात् तर्कस्याव्यवस्थिततत्वेन (पूर्वकारिकाभिप्रायेण) आर्षज्ञानस्य चागमपूर्वकत्वेन अकृतकम् अपौरुषेयं शास्त्रं पुरुषहितोपदेशाय प्रवृत्तमाम्नायं निबध्यतेऽनेनेति निबन्धनं मूलं तेन सहितां सनिबन्धनां शिष्टपरम्पराचरणानुगृहीतां 'पृषोदरादीनि यथोपदिष्टम्' (6/3/109) इत्यादिरूपां स्मृतिं चाश्रित्य प्रमाणीकृत्य शिष्टैः पाणिन्यादिभिः शब्दानुशासनमारभ्यते क्रियत इत्यर्थः । एका अपराऽपि कारिका व्याकरणपरम्परां निर्दिशति यथा आचार्यः लिखति -

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।**
**अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ।।**[35]

अर्थात् यथा धर्माधर्मवाच्यावाच्यगम्यागम्यविषया व्यवस्थिताः स्मृतयः सन्ति, तासु च निर्दिष्टमाचारं शिष्टा न व्यतिक्रामन्ति, तथैव चेयं वाच्यावाच्यविशेषविषया व्याकरणाख्या

स्मृतिः वर्तते सा चैषा साम्प्रतमुपलभ्यमाना पाणिनीयाऽष्टाध्यायी साधुत्वज्ञानविषया साधुत्वज्ञानं कार्यत्वेन विषयो यस्यास्तथाभूता व्याकरणस्मृतिः विद्यते । तच्च शिष्टस्मृतं व्याकरणं शिष्टानां साधुशब्दानां प्रयोगरूपस्य समाचारस्याविच्छेदेन स्मृतिनिबन्धनम्, शिष्टैः स्मृतो ह्यर्थः पारम्पर्यादविच्छेदेन पुनः पुनर्निबध्यत इति व्याकरणस्य शब्दानुशासनस्य अविच्छिन्नपरम्परा वर्तत ।[36] ताञ्च शब्दानुशासनस्य परम्परां प्रमाणयितुं पाणिनिः स्वाष्टाध्याय्यां स्वपूर्ववर्तिनामाचार्याणां, मतान्यपि स्वीकर्तुं नामोल्लेखपूर्वकं स्मरणं कृतवान् येषां पूर्ववर्ति वैयाकरणानां मतानि तत्र संगृहीतानि ते सन्ति आपिशलिः (वा सुप्यापिशलेः 6/1/92), काश्यपः (तृषिमृषिकशेः काश्यपस्य 1/2/25) गार्ग्यः (अड्गार्ग्यगालवयोः 7/3/99, ओतो गार्ग्यस्य 8/3/20, चाक्रवर्मणः ईड्चाक्रवर्मणस्य 6/1/126) गालव (इको ह्रस्वोऽङ्यो गालवस्य 6/3/60) शाकल्यः (सम्बुद्धौ शाकल्यस्येतावनार्षे 1/1/10), शाकटायनः (व्योलर्घुप्रत्नतरः शाकटायनस्य), सेनकः 8/3/18 (गिरेश्चसेनकस्य 5/4/112)[37] स्फोटायनः (अवङ्स्फोटायनस्य 6/1/119) भारद्वाजः (ऋतो भारद्वाजस्य 7/2/63) । अनया पूर्ववर्तिवैयाकरणस्मरणपरम्परया एतदपि अनुमातुं शक्यते यत् तैरपि पाणिनि-व्याकरणस्मृतैर्वैयाकरणैः स्वपूर्ववर्तिनो वैयाकरणाः स्वस्वव्याकरणेषु स्मृताः स्युरिति । तदेवं शब्दानुशासनस्य परम्परा श्रुतिरिव स्मृतिरिव च अविच्छन्नानादिपरम्परा विद्यते इति नास्ति विप्रतिपत्तिः।

**शब्दानुशासनस्य विधिः**

भाष्यकारः पस्पशाह्निके शब्दस्वरूपनिर्णयपूर्वकं प्रयोजनानि निर्दिश्य शब्दानुशासनविषयं स्मारयन् कथयति । 'उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि शब्दानुशासनमिदानीं कर्तव्यम् ।[38] पुनः शब्दापशब्दविषयिणीं जिज्ञासामुद्भाव्य शब्दापशब्दयोः कस्योपदेशः अर्थात् अनुशासनं कर्तव्यमिति प्रश्नपूर्वकं कथयति किं शब्दोपदेशः कर्तव्य आहोस्विदप शब्दोपदेश आहोस्विदुभयोपदेशः इति अन्यतरोपदशेन कृतं स्यात् ।[39] उभयोः कस्योपदेश कर्तव्यः इति पुनः पृच्छति किं पुनरत्र ज्यायः ।[40] सिद्धान्तं स्थापयन् कथयति लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशः। गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ।[41]

'शब्दोपदेशेन इष्टान्वाख्यानं भवतीत्यस्याभिप्रायोऽस्ति साधुशब्दप्रयोगाद्धर्मावाप्तिः उपादेयोपदेशात्साक्षात्प्रतिपत्तिश्च भवतीति' कैयटः ।[42]

ततोऽग्रे विषयं विवृण्वन् भाष्यकार आक्षेपभाष्येण पृच्छति 'अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपदपाठः कर्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः?'[43]

लाघवगौरवसम्बद्धं विषयं विचिन्त्य आक्षेपं निराकुर्वन् कथयति भाष्यकारः 'नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । ............तस्माद नभ्युपाय एव शब्दानां प्रतिपत्तौ प्रतिपदपाठः । कथं तर्हि शब्दाः प्रतिपत्तव्याः ।[44] अर्थात् शब्दानुशासनं केन विधिना कर्तव्यम्? शब्दानुशासनविधिं संक्षेपेण निर्दिशन् कथयति भाष्यकारः 'किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । किं पुनस्तत् । उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः । कथं जातीयकः पुनरुत्सर्गः कर्तव्यः । कथं जातीयकोऽपवादः । सामान्येनोत्सर्गः कर्तव्यः । तद्यथा 'कर्मण्यण्' तस्य विशेषेणापवादः । तद्यथा आतोऽनुपसर्गे कः ।'

एतेनैवंजातीयकेन शास्त्रेण सुशब्दोपदेशप्रवृत्तिः पाणिनेरुचितेति सूचितमिति उद्योतकारः।[46] तत्र संज्ञापरिभाषाविधिनियमातिदेशाधिकाराः परनित्यान्तरङ्गापवादादीनां बाध्यबाधकभावव्यवस्था असिद्धवदत्राभात्[47] पूर्वत्रासिद्धम्[48] इत्यादिसूत्रप्रतिपादितनिर्देशाश्च शब्दानुशासनविधिं साफल्येन सम्पादयन्ति ।

वार्तिककारभाष्यकारौ च पाणिनिकृतशब्दानुशासनस्य पोषकौ संरक्षकौ च स्तः । यत्र कुत्रापि वार्तिककारेण भाष्यकारेण च सूत्रव्याख्याने नूतनं तत्त्वं योजितं, प्रत्याख्यानपरं भाष्यञ्च प्रस्तुतं तत्सर्वं भाष्यकारस्य परिष्कारशैल्याः एव दिग्दर्शनं विद्यते तथा सा शैली भाष्यकारस्य शोधात्मिका अनुसन्धानपरा शोधदिग्दर्शिका व्याख्यानपद्धतिरेव विद्यते इति वक्तुं शक्यते यतो भाष्यकारः स्वयमेव मनुते यदत्र व्याकरणे एकोऽपि वर्णोऽनर्थकः नास्ति सूत्रस्यानर्थक्यं तु न कदापि भवितुमर्हति यथा वृद्धिरादैच् इति सूत्रभाष्ये शब्दानुशासनकर्तारमाचार्यपाणिनिं स्तुवन् निगदति ।

'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण ।'[49]

**निष्कर्षः**

तदेवं सर्वं शब्दानुशासनमनादिपरम्परया नित्यं श्रुतिस्मृतिरूपं सर्वदा शुद्धं प्रामाणिकं वैज्ञानिकं पूर्णञ्च विद्यते । यस्य श्रद्धयाभ्यासेन आत्मिकं बौद्धं मानसं वाचिकञ्च पावित्र्यं सम्भवति, तथा लौकिकं वैदिकञ्च शब्दतत्त्वज्ञानञ्चावाप्तुं शक्यते । शब्दानुशासनेन शब्दस्य न केवलं व्यावहारिकमपितु आध्यात्मिकं पारमार्थिकं फलञ्च संप्राप्य शब्दज्ञः ब्रह्मतत्त्वं ज्ञात्वा तेनैकीभवितुमर्हति यथा आचार्यः भर्तृहरिः कथयति –

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ।।**[50]

अतः सर्वैरभ्युदयार्थिभिः सर्वविधसिद्ध्यर्थं शब्दानुशासनेन वर्तितव्यं 'नान्यः पन्था विद्यतेऽयनाय' इति शम् ।

**सन्दर्भाः**


1. बृहदारण्यकोपनिषद् 4/3/5 ।
2. महाभाष्यपस्पशाह्निकम् ।
3. तदेव ।
4. तदेव ।
5. तत्रैव प्रदीपः ।
6. पदमञ्जरी पृ. सं. 3 ।
7. शब्दकौस्तुभः पृ. सं. 3 ।
8. महाभाष्यपस्पशाह्निकोद्योतः।
9. महाभाष्यम् 1/1/43 ।
10. महाभाष्यपस्पशाह्निकम् ।
11. तत्रैव प्रदीपः ।
12. तत्रैवोद्योतः ।
13. तत्रैव प्रदीपः ।
14. महाभाष्यपस्पशाह्निकम् ।
15. तत्रैव प्रदीपः ।
16. तदेव ।
17. महाभाष्यपस्पशाह्निकम् ।
18. तत्रैवोद्योतः ।
19. महाभाष्यम् 1/1/5, 1/1/6 ।
20. महाभाष्यप्रदीपः 1/1/6 ।
21. अष्टाध्यायी

    क. 2/4/39, 2/4/73, 2/4/76, 3/2/88, 5/1/122, 6/1/34, 7/1/8, 7/1/10, 7/1/103, 7/3/27, 7/4/78 ।

    ख. 6/4/75 ।

    ग. 3/1/85 ।

    घ. 7/1/38 ।

    ङ. 7/1/39 ।
22. महाभाष्यपस्पशाह्निकम् ।
23. महाभाष्यम् 1/1/1 ।
24. महाभाष्यपस्पशाह्निकम् ।
25. वाक्यपदीयम् 1/146 ।

26. तत्रैव अम्बाकर्त्री टीका ।
27. पातञ्जलयोगसूत्रम् 1/1/1 ।
28. वाक्यपदीयम् 1/28 ।
29. तत्रैव अम्बाकर्त्री टीका ।
30. तत्रैव भावप्रदीपव्याख्यानम् ।
31. वाक्यपदीयम् 1/29 ।
32. तत्रैव भावप्रदीपव्याख्यानम् ।
33. वाक्यपदीयम् 1/43 ।
34. तत्रैव भावप्रदीपव्याख्यानम् ।
35. वाक्यपदीयम् 1/142 ।
36. तत्रैव स्वोपज्ञाम्बाकर्त्रीभावप्रदीपव्याख्या: ।
37. निर्दिष्टसूत्राणि ।
38. महाभाष्यपस्पशाह्निकम् ।
39. तदेव ।
40. तदेव ।
41. तदेव ।
42. तत्रैव प्रदीपः ।
43. महाभाष्यपस्पशाह्निकम् ।
44. तदेव ।
45. तदेव ।
46. तत्रैवोद्योतः ।
47. अष्टाध्यायी 6/4/22 ।
48. अष्टाध्यायी 8/2/1 ।
49. महाभाष्यम् 1/1/1 ।
50. वाक्यपदीयम् 1/132 ।

**आचार्यः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम्**
**विद्याविहार, मुम्बई ।**

★★★

# पस्पशाह्निकग्रन्थिविमोकः

प्रो.बोधकुमारझाः

**शास्त्रानुशीलनं कथं विधेयम्? कथञ्च दृढग्रन्थीनामपि विमोचनं सरलया शैल्या सम्भवम्? सामान्यतो दृष्टेऽपि कथमसामान्यं तत्त्वं निगूढम्? इत्यादिप्रश्नानां समाधानमत्र शोधपत्रेऽवधातुं शक्यम् । एतादृशेन शोधपत्रेण पत्रिकायाः प्रासङ्गिकत्वम्, शास्त्रचिन्तन-धारायाश्च गतिमत्त्वं जायत इति विभावये । (स.)**

अथेदानीं पातञ्जलमहाभाष्यस्य पस्पशाह्निकस्य निर्मन्थनानन्तरं तत्रत्यानामेकादशग्रन्थीनां विमोचनं क्रियत इति प्रतिजाने । ते च ग्रन्थयः इमे -

1. 'शब्दानुशासनम्' इत्यत्र शब्दः कः?
2. अधुना कस्य व्याकरणस्य वेदाङ्गत्वम् ?
3. 'प्रयोजनम्' इत्यत्र भिन्नवचनकत्वं कुतः?
4. अनेकेषु विशेष्यवाचकेषु विशेषणपदे किं लिङ्गम् ? किञ्च वचनम् ?
5. 'हेलयो हेलय' इत्यत्र कोऽपशब्दः?
6. वेदवेदाङ्गाध्ययनयोः समकालिकत्वं भिन्नकालिकत्वं वा?
7. व्याकरणे का नाम जातिः?
8. साधुत्वं किमिति?
9. तादात्म्यं किमिति?
10. 'धर्मनियमः' इत्यत्र त्रिविधसमासोपपत्तिः ।
11. 'वृत्तिसमवायः' इत्यत्र त्रिविधसमासोपपत्तिः ।

## प्रथमो ग्रन्थिः - शब्दानुशासनमित्यत्र कः शब्दः ?

**पाणिनीयप्रवृत्तिः** - साधुत्वज्ञापनाय, न तु शक्तिज्ञापनायेति ।

**प्रमाणम्** - 'साध्वनुशासनेऽस्मिन् शास्त्रे' इति भाष्यवाक्यम् (पा. सू. 1/1/44) ।
'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति वार्त्तिकम्
(म.भा.पस्पशा.)

पाणिनिना धातुपाठे 'भूस्पर्ध - एध' इत्येवं धातव एव निर्दिष्टाः न तेषामर्थाः इति।

**अनुपपत्तिः** - 'लः कर्मणी'त्यादौ तर्हि अर्थनिर्देशः कुतः ?

**समाधानम्** - लादीनां कर्म्माद्यर्थपरत्वे एव साधुत्वमिति बोधनाय ।

**वैयाकरणसिद्धान्तः** - 'ये प्रत्यया येष्वर्थेषु व्याकरणे बोधितास्तेऽन्यार्थे प्रयुक्ताः सन्तो न साधवः' इति ।

**उदाहरणम्** - 1. अत एव पाचकादिपदे पाकादौ (पाचकादिसाध्ये) लक्षणया शोभनः पाकः इत्याद्यर्थे शोभनः पाचकः इत्यादिर्न ।

2. घृतादिपदस्य तु घृतादिसाध्ये आयुष्यादौ लक्षणया 'आयुर्वै घृतमि'ति प्रयोगः ।

**निष्कर्षः** - लक्षणया, आचार्य्यव्यवहाराद् वा 'शब्दानुशासनम्' इत्यत्र शब्दपदेन साधुशब्दो ग्राह्यः। तथाहि 'साधुशब्दानुशासनमि'ति तदर्थः ।

वस्तुतः परमार्थतया शब्दः अर्थात् स्फोटरूपः शब्दः, ब्रह्मरूपो, नित्यश्च । तस्मादत्र शब्दपदेन स्फोटः ग्राह्यः । परमेकस्य अनवयवस्य शब्दब्रह्मणः अनुशासनम् अर्थाद् विवेचनमसम्भवम् । अतः धातूनामनेकार्थत्वात् अनुपूर्वकशासेः प्रतिपादनमर्थो ग्राह्यः । एवञ्च शब्दानुशासनमित्यस्य स्फोटरूपशब्दब्रह्मप्रतिपादनमर्थः । तथा हि 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीइते' इति धिया प्रकृतिप्रत्ययतदर्थकल्पनया शास्त्रप्रक्रियापूर्वकज्ञानेन प्राप्तपुण्येन परमपुरुषार्थप्राप्तिः प्रयोजनम् इत्यपि आयाति । तेन च वाक्यपदीयप्रतिपादितस्य तद्द्वारमपवर्गस्येत्यादेः अपि सङ्गतिः ।

अथवा शब्दपदार्थे लक्षणया शब्दब्रह्मोपायभूतः प्रकृतिप्रत्ययात्मकः शब्दः ग्राह्यः । तथा हि प्रसिद्धेन अनुशासनपदार्थेनैव पङ्क्तिः लापयितुं शक्या इति पण्डितरूपेणानुशोचनीयम् ॥

## द्वितीयो ग्रन्थिः - अधुना कस्य व्याकरणस्य वेदाङ्गत्वम् ?

**ग्रन्थिस्थलम्** - प्रधानञ्च षडङ्गेषु व्याकरणम् इति भाष्यम् (पस्पशा.) ।

**अत्र नागेशभट्टः** -'अस्यैव (पाणिनीयस्यैव) वेदाङ्गत्वमि'ति (ल.श.मा.सूत्रम्)।

**युक्तिः** - 1. 'अइउण्' इत्यादः श्रुतित्वम्, तन्मूलकत्वात् ।

2. वैदिकशब्दानामप्युपदेशात् ।

3. वेदस्येव व्याकरणतत्त्वस्य अनादित्वात् ।

**आपत्तिः** - तदेवं पाणिनीयस्य आधुनिकत्वात् ततः पूर्व्वं वेदस्य निरङ्गत्वम् ।

**निराकरणम्** - पाणिन्यादयस्तु अनादिव्याकरणतत्त्वस्य प्रकाशका एव न तु निर्मातारः' इति।

**अत्र प्रमाणम्** - 'इहान्ये वैयाकरणा अजादौ संक्रमे (क्ङितः संज्ञा प्राचाम्) विभाषावृद्धिमारभन्ते - परिमृजन्ति, परिमार्जन्तीत्याद्यर्थं, तदिहापि साध्यमि'ति भाष्यम् (पा.सू.1/1/3)

**अन्यत्र वेदाङ्गत्वाभावः** - चान्द्रव्याकरणादीनां वेदोपकारकत्वाभावेन न वेदाङ्गपदवाच्यता ।

**निष्कर्षः** - गायत्र्यादेः विश्वामित्रादिरूपऋषितत्त्ववत् अर्थाद् यथा सादीनामपि विश्वामित्र-प्रभृतीनाम् अनादिवेदेन सम्बन्धः, तथैव अनादिव्याकरणेन पाणिनेः सम्बन्धः । अधुना तदनादितत्त्वस्य प्रकाशकत्वात् पाणिनीयस्यैव वेदाङ्गत्वम् ।

## तृतीयो ग्रन्थिः - 'प्रयोजनम्' इत्यत्र भिन्नवचनकत्वं कुतः?

**भाष्यस्थलम्** - 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' ।

**अत्र ग्रन्थिः** - विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमात् कथमत्र विशेषणवाचके प्रयोजनपदे भिन्नवचनत्वम् ?

**समाधानम्** - यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य्यविषयसङ्ख्याविरुद्धसंख्याया विशेषण-वाचकपदोत्तरविभक्त्या अविवक्षा, तत्र विशेष्यविशेषणपदयोः समान-वचनकत्वम् । यत्र च तादृशी विवक्षा तत्त्र भिन्नवचनकत्वमि'ति ।

**आपत्तिः** - प्रयोज्यतेऽनेनेति प्रयोजनः, प्रयोजक इत्यर्थः । प्रयोज्यन्ते यानि तानि प्रयोजनानि, फलानि इत्यर्थः । प्रकृते प्रयोजनः आगमः, रक्षादीनि प्रयोजनानि। तथाहि प्रकृतेः अर्थस्य 'प्रयोजनत्व'स्य (प्रयोजकात्मकस्य, फलात्मकस्य च) अनेकत्वात् कथं तत्र प्रत्ययार्थस्य एकत्वस्य अन्वयः सम्भवः ?

**समाधानम्** - यथा 'वेदाः प्रमाणम्' इत्यत्र प्रमितिकरणत्वनिष्ठमेकत्वं विवक्षितं तत्रचैकत्वान्वयः, तथैवात्र अखण्डस्फोटरूपप्रयोजनशब्दनिष्ठमेकत्वं विवक्षितं तत्त्र चैकत्वान्वयः ।

**विवरणम्** - वैयाकरणनये शब्दस्य शब्दे, अर्थे च खण्डशः शक्तिः । एवञ्च 'शब्दविशिष्टोऽर्थः', 'अर्थविशिष्टो वा शब्दः' इति शब्दस्यार्थः । प्रकृते प्रयोजनशब्दस्य विशेषणता, प्रयोजनपदार्थस्य तु विशेष्यता । एवञ्च विशेषणीभूते प्रयोजनशब्दे स्फोटरूपे एकत्वस्य विवक्षा ।

**आपत्तिः** - एवं 'प्रयोजनशब्दविशिष्टः प्रयोजनपदार्थः' इति अत्र प्रयोजनशब्दार्थः । तर्हि एकस्य प्रयोजनशब्दस्य प्रयोजनपदार्थद्वये कुतो विशेषणता उपपद्यते ?

**समाधानम्** - 'यः शिष्यते स लुप्यमानार्थाभिधायी'ति नियमात् एकस्मिन्नेव प्रयोजनशब्दे तत्तदर्थबोधनसामर्थ्यमि'ति ।

**निष्कर्षः** - अत्र यद्यपि प्रयोजनत्वं भिन्नमेव, तथापि प्रयोजनशब्द एकः । स एव चात्रप्रवृत्तिनिमित्तत्वेन अभ्युपेयते ।

## चतुर्थग्रन्थिः - अनेकेषु विशेष्यवाचकेषु विशेषणपदे किं लिङ्गम्? किञ्च वचनम् ?

**समस्या** - 1. रामः सीता दयावती, दयावत्यौ वा / दयावान् दयावन्तौ वा ?

2. कृष्णरामौ सीता च दयावती / दयावन्तौ वा ?

3. सीता रामकृष्णौ च दयावन्तौ वा / दयावती वा ?

4. कृष्णो रामसीते च दयावत्यौ / दयावन्तौ वा ?
5. वेदाः प्रमाणम् अस्ति वा / सन्ति वा ?
6. वृक्षः पञ्च नौका भवति वा / भवन्ति वा ?
7. एको द्वौ ज्ञायते वा / ज्ञायेते वा ?
8. काष्ठानि भस्म क्रियन्ते वा / क्रियते वा ?
9. एकोऽपि त्रय इव भाति वा / भान्ति वा ?
10. चौत्रो मैत्रश्च गच्छतः / गच्छति वा ?
11. मैथिली तस्य दारा अस्ति वा / सन्ति वा ?
12. रुक्मिणीसत्यभामे कृष्णस्य दाराः स्तः / सन्ति वा ?

**अत्र भाष्यप्रयोगानुगुणं समाधानम्** -

**भाष्यप्रयोगः** - 'इह देवदत्त इत्युक्ते कर्त्ता निर्दिष्टः, कर्म्म क्रियागुणौ चानिर्दिष्टौ, गामित्युक्ते कर्म्म निर्दिष्टम्, कर्त्ता क्रियागुणौ चानिर्दिष्टौ, अभ्याजेत्युक्तौ क्रियानिर्दिष्टा, कर्त्तृकर्म्मणी गुणाश्चानिर्दिष्टाः, शुक्लामित्युक्ते गुणो निर्दिष्टः, कर्त्तृकर्म्मणी क्रिया चानिर्दिष्टा' इति । (पा.स. 1/2/45)

**तथाहि नियमः** - (1) विशेष्यवाचकेषु अनेकेष्वन्तिमं पदं यल्लिङ्गकं भवति, तदनुगुणं लिङ्गवचनञ्च विशेषणपदे साधु । वचनविषये तु विशेष्यद्वयादिगतद्वित्वादिविवक्षायां द्विवचनादिकमपि साधु ।

एवं रामः सीता दयावती / दयावत्यौ वा इति साधु ।

एवं रामः सीता दयावान् / दयावन्तौ वा इत्यसाधु ।

**तथाहि नियमः** - (2.1) एकं विशेष्यपदम् असमस्तम्, अन्यद् विशष्यपदं च समस्तम्, द्विवचनान्तञ्च यदि वर्त्तते, तदा अन्तिमं विशेष्यपदमसमस्तञ्चेत् तदनुसारि लिङ्गं वचनञ्च विशेषणपदे ।

कृष्णरामौ सीता च दयावती इति साधु ।

कृष्णरामौ सीता च दयावन्तौ इति असाधु ।

(2.2) यदि तत्र अन्तिमं विशेष्यपदं समस्तं, तत्रापि उत्तरपदानुसारिलिङ्गम्, समस्तपदानुसारि वचनञ्च ।

सीता रामकृष्णौ च दयावन्तौ । कृष्णो रामसीते च दयावत्यौ इति साधु ।

सीता रामकृष्णौ च दयावती । कृष्णो रामसीते च दयावन्तौ इति असाधु ।

**अत्रापवादः** - क्वचित्तु पूर्वोक्तनियमानां बाधो विशेषणपदे सामान्यतो नपुंसकलिङ्गमेकवचनञ्च।

**उदाहरणम्** - दृढं भक्तिर्यस्य स दृढभक्तिः ।

**अत्र प्रमाणम्** - 'शक्यं क्षुत्' इति भाष्यकारप्रयोगः । 'शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुमिति' (पस्पशा. म.भा.) व्याख्यानावसरे कैयटः - शकेः कर्म्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्तेकृत्प्रत्ययः । ततः पदान्तरसम्बन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गसंस्कारं न बाधत इति शक्यं क्षुदित्युक्तम् । यदा तु पूर्वमेव विशेषविवक्षा, तदा शक्या क्षुदितिभवत्येव ।

**भाष्यप्रयोगः** - 'पुनरावृत्तः सुवर्णपिण्डः पुनरपरया आकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः' इति (म.भा.पस्पशा.) ।

**कैयटः** - 'यथा च प्रकृतेः कर्तृत्त्वं दृश्यते, तथा विकृतेरपि । सुवर्णपिण्डः खदिराङ्गारसवर्णे कुण्डले भवतः' इति विकारसंख्याश्रयद्विवचनदर्शनात् । तथा असङ्घो ब्राह्मणाः सङ्घः सम्पद्यते, अपटस्तन्तवः पटः सम्पद्यत इति विकारसंख्याश्रयवचनं दृश्यते' इति। च्विविषये हि प्रकृतिः कर्त्री, न विकृतिः, तथाहि 'सङ्घीभवन्ति ब्राह्मणाः' 'पटीभवन्ति तन्तवः' इति प्रकृतिसंख्याश्रयवचनं दृश्यते, न विकृतिसंख्याश्रयमपि' इति।

**नियमः ( १ )** - प्रकृतिविकृतिभावस्थले आरोपस्थले च आख्यातस्यैकवचनादि कामचारतः । च्व्यन्तस्थले तु प्रकृत्यनुसारेणैव वचनम् ।

**उदाहरणम्** - वृक्षः पञ्च नौका भवति / भवन्ति - इत्युभयं साधु ।
काष्ठानि भस्म क्रियन्ते / क्रियते - इत्युभयं साधु ।
एको द्वौ ज्ञायते / ज्ञायेते - इत्युभयं साधु ।
एको त्रय इव भाति / भान्ति - इत्युभयं साधु ।

**नियमः ( २ )** - अन्यत्र उद्देश्यानुसारिणी व्यवस्था ।

**उदाहरणम्** - वेदाः प्रमाणं सन्ति - इत्येव साधु ।
मैथिली तस्य दारा अस्ति - इत्येव साधु ।
रुक्मिणीसत्यभामे कृष्णस्य दाराः स्तः - इत्येव साधु ।

**विशेषः** - तत्रापि 'चैत्रो मैत्रश्च गच्छतः' इत्यादौ द्वन्द्वभिन्नकर्तृद्वये प्रत्येकमेकत्व-विवक्षयाऽऽख्यातस्यैकवचनान्तता । उभयगतद्वित्वविवक्षया तु द्विवचनान्त-ताऽऽख्यातस्य साधवी ।

## पञ्चमो ग्रन्थिः - 'हेलयो हेलय' इत्यत्र कोऽपशब्दः ?

अत्रापशब्दत्वं पञ्चधा व्याख्याकृद्भिः व्याहृतम् । तत्र -

**प्रथमम्** - प्लुते, प्लुतत्वप्रयुक्ते प्रकृतिभावे च कर्त्तव्ये तदकरणत्वम् । अत्र प्लुतविधायकं सूत्रम्- हैहेप्रयोगे हैहयोः (पा.सू.8/2/85)

**अरुचिः** - 'सर्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्यः' इति भाष्यवचनान्नैष दोषः । अत आह-

**द्वितीयम्** - 'सर्वस्य द्वे' (पा.सू. 8/1/1) इत्यत्र पदग्रहणस्य वार्त्तिककृतोक्तत्वात् पदद्विर्वचनस्थाने वाक्यद्विर्वचनत्वम् ।

**अरुचिः** - नेदं शास्त्रीयं द्विर्वचनम्, किन्तु तात्पर्य्यद्योतनार्थमैच्छिकम् । अतः सूत्राविषयत्वम्। अत आह-

**तृतीयम्** - आम्रेडितस्वरानुपपत्तिरूपम् ।

**अरुचिः** - आम्रेडितस्वरविनिर्मुक्त एव स पाठः इति । अत आह-

**चतुर्थम्** - अरिशब्दे रेफस्य लत्वमपशब्दः इति ।

**अरुचिः** - उपलब्धासु शाखासु नायं पाठ इति । अत आह-

**पञ्चमम्** - माध्यन्दिनानां शतपथब्राह्मणे तु 'हेलवो हेलव इति वदतः' इति पाठः । तत्र यकारस्थाने वकारस्य अपशब्दत्वम् इति ।

**स्रोतः** - इदं पञ्चधा व्याख्यानं शब्दकौस्तुभे व्याकरणाध्ययनफलनिरूपणे प्रतिपादितम् ।

## षष्ठो ग्रन्थिः - वेदवेदाङ्गाध्ययनस्य काले को निर्णयः?

**समस्या** - प्रयोजनग्रन्थोपपत्तौ भाष्यकारैः 'पुराकल्प एतदासीत्' - इत्यादिना वेदाध्ययनं वेदाङ्गात्परम् उक्तम् । परम्,

**'ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत् ।**
**वेदाङ्गानि रहस्यञ्च कृष्णपक्षेषु सम्पठेत् ॥'** इति

इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीत' इति स्मृत्यनुरोधेन च तयोः वेदवेदाङ्गाध्ययनयोः समकालता लभ्यते ।

**तत्र संदेहः** - उभयोः भिन्नकालः समकालो वेति ?

**समाधानम्** - ऋषिवचनत्वाविशेषात् भाष्यकारोक्तेः मन्वाद्युक्तेश्च ब्रीहियववद् विकल्प एवेति।

## सप्तमो ग्रन्थिः - व्याकरणे का नाम जातिः?

**जातिलक्षणम्** - 'यत्तर्हि तद्भिन्नेष्वभिन्नं, छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः' इति पस्पशाया 'नित्यत्वे सति एकत्वे सति अनेकसमवेतत्वं' जातिरिति ।

**जातिभेदाः** - चतुर्विधा जातिः ।

1.आकृतिग्रहणा जातिः, अर्थात् ईदृशाकारो गौ' रित्याकृत्युपदेशादिव्यङ्ग्या सा ।

2.असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः,

3.अपत्यप्रत्ययान्तः, शाखाध्येतृवाची च जातिकार्य्यभाक्, अतः उभयत्र आतिदेशिकी जातिः,

4.यावद्द्रव्यभाविनी जातिः' इति ।

**उदाहरणानि** - क्रमशः - तटत्वम्, वृषलत्वम्, औपगवत्वम्ध कठत्वम्, गोत्वादिः न तु कुमारत्वयुवत्वादिः ।

**विशेषः** - आकृतिग्रहणा' इति प्रथमलक्षणेन तु कुमारत्वादीनामपि ग्रहणम् ।

**स्रोतः** - म.भा. 4/1/63

**व्याकरणे दर्शनान्तराद् विशेषः** -

1. यावत्सृष्टिस्थायित्वरूपं नित्यत्वं जातेः । अत्र बीजम् - शाब्दिकदर्शने शब्दब्रह्मणोऽतिरिक्तस्य सर्वस्य प्रपञ्चस्य अनित्यत्वमिति ।
2. आकाश-काल-समावायादीनामपि औपाधिकभेदेन भिन्नत्वे आकाशत्वादिधर्मा अपि जातिरूपेति ।
3. 'निःसामान्यानि सामान्यानि' इति सिद्धान्तस्तु नास्माकम्, अपितु दार्शनिकविशेषाणामेवेति (म.भा.प्र. 1/1/64)

वस्तुतस्तु, **सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।**
**सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥ ( वै.भू.सा.-७३ )**
इति पारमार्थिकदृष्ट्या तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति गृहाण ॥

## अष्टमो ग्रन्थिः - साधुत्वं किम् ?

**साधुत्वञ्च व्याकरणे** - व्याकरणानुशिष्टशब्देषु पुण्यजनकत्वम् । इदमेव च व्याकरणस्मृत्या शब्देषु ज्ञाप्यते ।

**प्रमाणम्** - 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवती'ति श्रुतिः (भाष्ये-6/1/84) । शब्दस्य कामप्रदत्वं हि पुण्यजननद्वारैव सम्भवति । तदेतद्वेदवाक्यं शास्त्रप्रक्रियया ज्ञाते यथोचितार्थपरत्वेन प्रयुक्ते शब्दे कामप्रदत्वबोधनद्वारा पुण्यजनकत्वमेव बोधयति ।

**विशेषः** - अत्र एकः शब्दः स्फोटः अनवयवः शब्दो ग्राह्यः (श.कौ. पृ. 26) । सम्यग् ज्ञातः= शास्त्रव्युत्पादनमार्गेण अनुसंहितः इति । सुप्रयुक्तः=शिक्षांक्तरीत्या प्रयुक्तः इति (वै.सि.ल.म., शक्तिनिरुपणम्) ।

**तार्किकखण्डनम्** - तन्मतम् - शक्तत्वं साधुत्वमिति ।

**खण्डनम्** - 1.तन्मते तिब्विसर्गादौ शक्तेरनभ्युपगमेन 'अस्ति' 'घटः' इत्यत्र तिब्विसर्गौ न साधूइत्यापत्तिः।

2. 'अस्ति' 'घटः' इति पदम्, 'अस्ति घटः' इति वाक्यमपि तदा न साध्विति वक्तुं शक्यम् ।

3.'स्तोकं पाकः' इत्यत्र 'घञः प्रयोगे साधुतामात्रमि'ति तार्किकाणां शक्तिशून्यत्वेन अभिमते घञि साधुताप्रतिपादनमसम्भवम् ।

**चतुर्धा साधुत्वम्** - 1. अनपभ्रष्टता साधुता । सा च शक्तिवैकल्यादिप्रयुक्तमन्यथोच्चारणम्

अपभ्रष्टता तद्विरहरूपा । सा चार्थविशेषान्तर्भाविणैव ।

**विवरणम्** - 1. यमर्थं शक्त्या लक्षणया वा बोधयितुं यादृक्शब्दः प्रयुक्तः, तस्मिन्नर्थे दोषादन्यथात्वं प्राप्तः सोऽसाधुः, अन्यथा तु साधुः ।

2. अनादिता साधुता । आदेः अभावः अनादिः, असन्देह इतिवत् तत्पुरुषः ।

3. अभ्युदययोग्यता साधुता ।

4. रत्नतत्त्ववच्छास्त्रपरिशीलनशालिभिर्गम्यो जातिविशेषः साधुता ।

**आपत्तिनिरसनम्** - कत्वादिना सङ्करापत्तिर्न, गुणगतजातौ तस्यादोषत्वात् ।

**अत्र स्रोतः** - शब्दकौस्तुभः, प्रथमाह्निकम् ।

**अन्यत्र साधुत्वसम्भावना तस्याः निराकरणञ्च** -

1. साधयति - बोधयति इति साधुरिति व्युत्पत्त्या बोधकत्वं तदिति चेत्, गाव्यादावपि तत्सत्त्वम् ।
2. वृत्तिमत्त्वं तदिति चेत्, द्योतकेषु निपातेष्वव्याप्तिः ।
3. शक्तत्वं तदिति चेत्, विकरणानामसाधुतापत्तिः, डुपचष्-लट्-इत्यादीनां साधुतापत्तिः।

## नवमो ग्रन्थिः - तादात्म्यं किमिति ?

**जिज्ञासा** - 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र कीदृशः सम्बन्धो ग्राह्यः इति । तत्र सूत्रभाष्यादिसम्मतः पदपदार्थयोः शक्तिरूपः तादात्म्यसम्बन्ध एव । तस्य च किं स्वरूपमिति ?

**प्रमाणम्** - 1. 'वृद्धिरादैच्' 'अदेङ्गुणः' इत्यादिशक्तिग्राहकेषु समानविभक्तिकनिर्देशः ।

2. 'वृद्धिरादैच्' इति सूत्रे भाष्यम् - 'द्वयोरेव सामानाधिकरण्यम्, विशेषणविशेष्ययोर्वा, संज्ञासंज्ञिनोर्वेति' । अत्रैवोद्योतकारः 'तादात्म्यमेव शब्दार्थयोः शक्तिरि'ति ।

**तादात्म्यस्वरूपम्** - तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । तत्र शब्दस्य अर्थे भेदो वास्तवः, अभेदः आरोपितः । तत्र भेदस्योद्भूतत्वविवक्षया 'अस्यार्थस्य अयं शब्दो वाचकः' इत्यादिर्भेदेन व्यवहारः । अभेदस्योद्भूतत्वविवक्षया 'देवदत्तोऽयम्' इति व्यवहारः ।

**अत्रोपोद्बलकम्** - 'तपरस्तत्कालस्य' इत्यादि भेदपक्षस्य । 'वृद्धिरादैच्' इत्यादि अभेदपक्षस्य ।

**न्यायमते** - अभेदस्तादात्म्यम् । स च स्वनिष्ठोऽसाधारणो धर्मस्तद्व्यक्तित्वादिरूपः । (व्यु.) 'नीलो घट' इत्यत्र तद्व्यक्तित्वरूपतादात्म्यसम्बन्धेन नीलविशिष्टो घट इति बोधः।

**पूर्वमीमांसायाम्** - वास्तवभेदाभेदघटितमेव तादात्म्यम् । 'द्रव्यं घटः' इत्यत्र जात्यादिरूपधर्मे भेदः, व्यक्त्यात्मना विशेष्येण अभेद इत्यवच्छेदकभेदेन एकत्रैव वृक्षे कपिसंयोगतदभावयोः सत्त्वमिव न तयोर्विरोधः ।

**अद्वैतवेदान्ते** - अभेद एव तादात्म्यम् । 'सर्वं खल्विदं ब्रह्म' इति श्रुत्या प्रपञ्चमात्रे ब्रह्मणोऽभेदात् परस्परमपि प्रपञ्चेऽभेद एव, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् ।

**निष्कर्षः** - भेदसमानाधिकरणाभेदरूपमेव तादात्म्यम् । तत्र व्यवहारदशायां भेदो वास्तवः अभेदः आरोपितः । परमार्थदशायाम् अभेदो वास्तवः भेदः काल्पनिकः । तदुक्तं नागेशेन - 'तादात्म्यञ्च तद्भिन्नत्वे सति तदभिन्नत्वेन प्रतीयमानत्वम्'। व्यवहारावस्थीय- मेतल्लक्षणमत एव तद्भिन्नत्वेन प्रतीतिर्भ्रमरूपा गृहीता (ल.म. श.नि.)।

**अवधेयम्** - तथाहि व्यवहारदशायां तस्य आत्मा तदात्मा, षष्ठीतत्पुरुषः तदात्मनो भावः तादात्म्यम् इति व्युत्पत्तिः, भेदे एव षष्ठीविधानात् । तत्पदेन चात्र शब्दो ग्राह्यः । परमार्थदशायान्तु सः आत्मा तदात्मेति कर्म्मधारयः । तस्य भावस्तादात्म्यम् इति गृहाण ।

## दशमो ग्रन्थिः -'धर्मनियमः' इत्यत्र त्रिविधसमासोपपत्तिः ।

**भाष्यस्थलम्** - 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' (वार्त्तिकम्, धर्मनियमाधिकरणम्, 1.1.1 आह्निकम्) ।

**समासत्रैविध्यम्** - **१. धर्माय नियमः = धर्मनियमः (षष्ठीतत्पुरुषः) ।**

अत्र सम्बन्धसामान्ये षष्ठीं विधाय समासः । धर्माय नियमः इत्यर्थप्रतिपादनम्, न तु विग्रहः । विग्रहस्तु धर्मस्य नियमः इत्येव । तादर्थ्यस्य षष्ठ्यर्थत्वबोधनाय एवं प्रयोग इति भावः । एवञ्च धर्मोपकारको नियम इति बोधः ।

**बीजम्** - 'चतुर्थी' इति योगविभागो न भाष्यारूढः, 'सुप्सुपा' इति समासोऽप्यगतिकगतिकः।

**२. धर्मार्थो नियमः - धर्मनियमः (कर्म्मधारयः) ।** धर्मश्चासौ नियमः इति विग्रहः। अत्र धर्मार्थत्वान्नियम एव धर्मशब्देन अभिधीयते, तादर्थ्यात् ताच्छब्द्यमिति नियमात् । एवञ्चात्र धर्माभिन्नो नियमः इति बोधः ।

**३. धर्मप्रयोजनो नियमः - धर्मनियमः (षष्ठीतत्पुरुषः) ।** प्रयुज्यते - आक्षिप्यते इति कर्म्मल्युडन्तः प्रयोजनशब्दः । धर्मस्य प्रयोजनः धर्मप्रयोजनः । षष्ठ्यर्थः प्रयोज्यत्वम् । तेन धर्मप्रयोज्यो नियम इति बोधः ।

**प्रदीपसम्मतोऽर्थः** - क्रमशः,1. धर्मोपकारको नियमः । अत्र धर्मः अर्थात् अपूर्वम् ।

2. धर्मफलको नियमः । अत्र धर्मः यागादिः (आदिपदेन दानादीनां ग्रहणम्) ।

3. धर्मप्रयोज्यो नियमः । अत्र धर्मः नियोगः (प्राभाकरमतेलिङ्गा- दीनाम् अपूर्वरूपं कार्य्यमर्थः । अपूर्वमेव स्वस्मिन् पुरुषं प्रयुञ्जानं नियोगः) ।

**उद्योतसम्मतोऽर्थः**- 1. धर्मः अर्थात् प्रत्यवायपरिहारः ।
2. धर्मः अर्थात् यागादिः ।
3. धर्मः अर्थात् अपूर्वम् ।

**भाष्यटिप्पण्याम्** (भार्गवशास्त्रिसम्पादितायाम्) -
1. धर्मः अर्थात् प्रत्यवायपरिहारः ।
2. धर्मः अर्थात् नियमः ।
3. धर्मः अर्थात् अपूर्वम् ।

**उदाहरणानि ( उद्योतानुरोधीनि ) -**

**प्रथमोदाहरणम्** - एकः शब्दः सम्यग्ज्ञातः इत्यादिना श्रौतवचनेन एकविधेस्तदितरनिषेध-फलकत्वात् असाधुशब्दप्रयोगे प्रत्यवायो बोध्यते। व्याकरणे साधुत्वबोधकं समग्रमेव सूत्रमत्रोदाहरणीयम् ।

**द्वितीयोदाहरणम्** - 'नानृतं वदेत्' इति कर्म्माङ्गनिषेधो यागाङ्गत्वाद् याग एव । व्याकरणे 'अनचि' इत्याद्युदाहरणम् ।

**तृतीयोदाहरणम्** - 'साधुभिर्भाषितव्यमि'ति । व्याकरणे 'इको यणची'त्यादि ।

**निष्कर्षः** - व्याकरणशास्त्रेण 'किं कर्त्तव्यम्', 'किमकर्त्तव्यम्' 'तेन किम्' इति नियमः क्रियते ।

**तत्स्वरूपन्तु** - साधुभिर्भाषितव्यम्, नानृतं वदेत्, प्रत्यवायपरिहारः अपूर्वोत्पत्तिश्चेति क्रमशः ।

## एकादशो ग्रन्थिः - 'वृत्तिसमवायः' इत्यत्र त्रिविधा समासोपपत्तिः ।

**भाष्यस्थलम्** - अथ किमर्थो वर्णानामुपदेशः? वृत्तिसमवायार्थ उपदेशः (पस्पशा)

**त्रिविधः समासः** -

१. **वृत्तये समवायः = वृत्तिसमवायः ।** अत्र षष्ठीसमासः धर्मनियम इत्यत्रेव । षष्ठ्यर्थः उपयोग्यत्वम् । वृत्तिः = लाघवेन शास्त्रप्रवृत्तिः, तदुपयोगी समवायः = वर्णानाम् आनुपूर्व्येण सन्निवेशः ।

२. **वृत्त्यर्थः समुदायः = वृत्तिसमुदायः ।** अत्र कर्मधारयः । अत्र लक्षणया वृत्तिः= साधुत्वोपयोगिशास्त्रप्रवृत्त्यनुकूलसमवायः । षष्ठ्यर्थोऽभेदः ।

३. **वृत्तिप्रयोजनः समवायः** - वृत्तिसमुदायः । अत्र षष्ठीतत्पुरुषः । अत्र वृत्तिः= इत्सञ्ज्ञादिसञ्ज्ञाशास्त्रप्रवृत्तिः । षष्ठ्यर्थः प्रयोज्यत्वम् ।

**त्रिविधः वृत्तिपदार्थः** - प्रथमे लाघवेन शास्त्रप्रवृत्तिः ।
द्वितीये समवायः (लक्षणया) ।

तृतीये सञ्ज्ञाशास्त्रप्रवृत्तिः

**उदाहरणम् - प्रथमस्य** - वर्णसमवायादेव अजादिसञ्ज्ञाः सिद्ध्यन्ति । तेन च 'इको यणचि' इति शास्त्रं लघुभूतं सम्पद्यते ।

**द्वितीयस्य** - 'इ उ ऋ लृ' इति, 'य व र ल' इत्येतेषाञ्च वर्णसमाम्नाये क्रमेण सन्निवेशात् 'इग्यणः सम्प्रसारणम्' इति सूत्रे 'यथासङ्ख्यमनुदेशः समानाम्' इत्यस्य प्रवृत्तिः । वर्णसन्निवेशसत्त्वादेव समसङ्ख्यत्वोपपत्तौ यथासङ्ख्यावतारः ।

**तृतीयस्य** - वर्णसन्निवेशसत्त्वादेव णादीनामित्सञ्ज्ञाप्रवृत्तिः । तेन प्रत्याहारसिद्धिः । ततश्च 'ढ्रलोपे' इत्यादिशास्त्रप्रवृत्तिरिति । एवं हि नात्र साक्षाल्लाघवेन शास्त्रप्रवृत्तिः फलमिति प्रथमतोऽस्य विशेषः ।

**उपसंहारः** -

अत्र शोधनिबन्धस्य मर्य्यादामनुरुध्य एकादश ग्रन्थय एव परिशीलनाय गृहीताः । परमेतावता एते एव ग्रन्थयः पस्पशाह्निके सन्तीति चेन्न, ग्रन्थीनां शतस्य तत्र सत्त्वात् महाभाष्यानुशीलनाय बहूनां ग्रन्थानाम् अनुशीलनं कर्त्तव्यम्, तत्र विशेषतः शब्दकौस्तुभस्य, वाक्यपदीयस्य च । पतञ्जलेः तात्पर्य्यावबोधः तदेतद्द्वयं विना अशक्य इव । अत्र शोध पत्रे मया नाना टीकाः, टिप्पण्यः, प्रकरणग्रन्थाश्च समवलम्बिताः । ममैष श्रमः भाष्यपस्पशाह्निकतत्त्वावगाहनाय एको लघीयान् प्रयासः, तत्रैव पाठकानां श्रेयसे अयं भूयादिति द्रढीयान् विश्वासः। परम्पराह्रासेन, हिन्दीव्याख्यानप्रयोज्यभाष्याध्ययनेन च शास्त्रतत्त्वं सत्वरं पृष्ठमनुगच्छतीति चिन्तया एतादृशानां शतशः प्रयासानां महदुपयोगित्वमस्तीति विभावये ।।

**आचार्य्यः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैयासंस्कृतविद्यापीठम् ।**
**विद्याविहार, मुम्बई ।**

★★★

# माहेश्वरसूत्रेषु द्विधा णकारानुबन्धविमर्शः

✍डॉ. अशोकचन्द्रगौडशास्त्री

**माहेश्वरमैन्द्रञ्च व्याकरणसम्प्रदायं निर्दिश्य महाभाष्यदिशा द्विधाणकारानुबन्धस्य प्रयोजनमस्ति न वेति विचार्य्यान्ते तदप्रयोजनं विनिश्चित्य ''व्याख्यानतः०'' इति परिभाषाज्ञापनं द्विधानुबन्धेनेति प्रदर्श्य क्व पूर्वेण क्व च परेणेति निबन्धेऽस्मिन् प्रस्तुतम् । (स.)**

संस्कृतव्याकरणशास्त्रे सम्प्रदायद्वयं प्रसिद्धमस्ति । माहेश्वरम्, ऐन्द्रं च । माहेश्वरसम्प्रदाये पाणिनीयं व्याकरणम् आगच्छति । तत्र पाणिनीयव्याकरणसम्प्रदाये माहेश्वरसूत्राणामतीव महत्त्वमस्ति । चतुर्दश माहेश्वरसूत्राणि आचार्येण महेश्वरेणोपदिष्टत्वाद् 'माहेश्वर सूत्र' नाम्नोपदिश्यन्ते ।

माहेश्वरसूत्रेषु सर्वेऽनुबन्धाः सकृदेवोपदिष्टाः । अयं णकारो द्विरनुबध्यते - 'अ इ उण्', 'लण्'[1] इति । तत्र पुनः 'लण्'[2] सूत्रे णकारस्य किं प्रयोजनम्? इत्याशङ्कामुपस्थाप्य व्याकरणमहाभाष्ये आचार्यः पतञ्जलिराह -

अण् प्रत्याहारे इण् प्रत्याहारे च अचाम्, ऊष्मणो हकारस्य, अन्तः स्थानां य र ल वानां ग्रहणं यथा स्यात् । तथा च 'अणुदित्सवर्णस्य[3] चाप्रत्ययः' इत्यनेन सत्रेण सर्वेषामेतेषां सवर्णसंज्ञा यथा स्यात् ।

ननु चैवम् अण्-इण्ग्रहणेषु सन्देहो भवति पूर्वेण स्युः, परेण वा स्युरिति । कतमस्मिंस्तावदण्ग्रहणे सन्देहः? 'ढ्रलोपे[5] पूर्वस्य दीर्घोऽणः' इति । असन्दिग्धम् पूर्वेण, न परेणेति। पराभावात् । न हि ढ्रलोपे परेऽणः सन्ति । ननु चाऽयमस्ति आतृढः, आवृढः इति । एवं तर्हि उच्चारणसामर्थ्यात् पूर्वेण, न परेण । यदि हि परेण स्यात् 'ढ्रलोपे पूर्वस्य दीर्घोऽचः' इत्येव ब्रूयात् । अथवा एतदपि न ब्रूयात्, अचो ह्येतत् भवति ह्रस्वः, दीर्घः, प्लुत इति ।

अतः परम् महाभाष्यकारः पतञ्जलिराह-अस्मिंस्तर्हि अण्ग्रहणे सन्देहः 'केऽणः[6]' इति । असन्दिग्धम् पूर्वेण, न परेण, पराभावात् । नहि के परेऽणः सन्ति । ननु चाऽयमस्ति गोका, नौका इति । अत्राऽप्युच्चारणसामर्थ्यादेव पूर्वेण । यदि हि परेण स्यात्, अण् ग्रहणमनर्थकं स्यात्, 'केऽचः' इत्येव ब्रूयात् । अथवा एतदपि न ब्रूयात् । अचो ह्येतद् भवति ह्रस्वो, दीर्घः, प्लुत इति। अस्मिंस्तर्हि अण्ग्रहणे सन्देहः - 'अणोऽप्रगृह्यस्याऽनुनासिकः[7]' असन्दिग्धं पूर्वेण न परेण स्यात् अण् ग्रहणमनर्थकं स्यात्, अचोऽप्रगृह्यस्याऽनुनासिक इत्येव ब्रूयात् ।

अथवा एतदपि न ब्रूयात् । अच एव हि प्रगृह्या भवन्ति । अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः - 'उरण्रपर्ः[8]' इति ।

असन्दिग्धं पूर्वेण, न परेण । कुत एतत् पराभावात् । न ह्यः (ऋकारस्य) स्थाने परेऽणः सन्ति । ननु चाऽयमस्ति कर्त्रर्थम्, हर्त्रर्थम् इति । यद्यत्र रपरत्वं स्यात् द्वयोः रेफयोः श्रवणं प्रसज्येत । 'हलो[9] यमां यमि लोपः' इत्येवमेकस्य लापो भविष्यति-इति । विभाषा स लोपो भविष्यति, तेन विभाषा द्वयोः रेफयोः श्रवणं प्रसज्येत । अयं तर्हि नित्यो लोपः 'रो[10]रि' इति । पदान्तस्येत्येव सः । न शक्यः स पदान्तस्येत्येवं विज्ञातुम् । इह हि लोपो न स्यात् यङ्लुकि जगृधेर्लङ् अजर्घाः (गृध् धातोः) पास्पर्द्धेः अपास्पाः (स्पर्द्धधातोः) इति । इह तर्हि मातृणाम्, पितृणाम् इति रपरत्वं प्रसज्येत । आचार्यप्रवृत्तिर्ज्ञापयति नाऽत्र रपरत्वं भवतीति, यदयं 'ॠत[11] इद्धातोः' इति धातुग्रहणं करोति । कथं कृत्वा ज्ञापकम् धातुग्रहणस्यैतत् प्रयोजनम् इह मा भूत् रपरत्वं मातृणाम्, पितृणाम् इति । यदि चाऽत्र रपरत्वं स्याद् धातुग्रहणं व्यर्थं स्यात् । रपरत्वे कृतेऽनन्त्यत्वाद् रत्वं न भविष्यति । पश्यति त्वाचार्यः नाऽत्र रपरत्वं भवतीति, ततो धातुग्रहणं करोति । इहापि तर्हि इत्वं न प्राप्नोति चिकीर्षति, जिहीर्षति इति । मा भूदेवम् 'उपाधायाश्च[12]' इत्यनेन इत्वं भविष्यति । इहापि तर्हि मातृणाम्, पितृणाम् इत्यत्र रपरे दीर्घे सति उपधाया इत्वं स्यात् । तस्मात्तत्र (ॠत[13]इद्धातोः) धातुग्रहणं सार्थकम्, न तु ज्ञापकमभूत् । एवं तर्हि 'अण्' इत्युच्चारणसामर्थ्यादेव पूर्वेण, न परेण । यदि हि परेण स्यात्, अण्ग्रहणमनर्थकं स्यात्, उरञ्रपर इत्येव ब्रूयात् ।

अस्मिंस्तर्हि अण्ग्रहणे सन्देहः 'अणुदित्सवर्णस्य चाप्रत्ययः[14]' इति । असन्दिग्धं परेण, न पूर्वेण । कुतः एतत्? सवर्णेऽण् तु परं ह्युर्ऋत् । यदयमाचार्यः 'उर्ऋत्[15]' इति ऋकारस्य स्थाने ऋकारविधाने ते तपरं करोति तज्ज्ञापयत्याचार्यः परेण, न पूर्वेणेति । अर्थादत्र अण् प्रत्याहारः परेण णकारेण गृह्यते न पूर्वेण ।

इण्ग्रहणेषु तर्हि सन्देहः । असन्दिग्धं परेण, न पूर्वेण । कुत् एतत्य्वारन्यत्र परेणेण् स्यात् । यत्रेच्छति पूर्वेण, संमृद्य (यणादेशात् निवृत्तिपूर्वकं) ग्रहणं तत्र करोति य्वोरिति - 'अचि श्नु-धातुभ्रुवां[16] 'य्वोरियङ्उवङौ' इति सूत्रे । तच्च गुरु भवति । कथं कृत्वा ज्ञापकम्? यणादेशं विधाय तत्र विभक्तिनिर्देशे संमृद्य ग्रहणे चार्द्धचतस्रो मात्राः । प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः । सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद् गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः परेण, न पूर्वेणेति ।

पुनः शङ्का जायते यत् प्रत्याहारसूत्रेषु णकारोऽनुबन्धः कथं द्विधा क्रियते ? न कश्चनाऽपरोऽनुबन्धः कर्तुं युज्यते? तदाह भाष्यकारः - व्याख्यानाच्च द्विरुक्तितः । णकारस्य द्विधाऽनुबन्धकरणमेतज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा - 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति । अत्र अणुदित्[17] सवर्णस्य चाप्रत्ययः इत्येतत् परिहृत्य पूर्वेणाऽण् ग्रहणम्, परेण इण् ग्रहणमिति व्याख्यास्यामः । तदुक्तम् -

**परेणैवेण् ग्रहाः सर्वे पूर्वेणैवाण् ग्रहाः मताः ।**
**ऋते अणुदित् सवर्णस्येत्येतदेव परेण तु ॥**

निष्कर्षत इदं वक्तुं शक्यते यत् केवलम् अणुदित्सवर्णस्येत्यत्र अण् प्रत्याहारः परेण णकारेण गृह्यते । अन्यत्र सर्वेषु स्थलेषु अण् प्रत्याहारः पूर्वेण णकारेण गृह्यते । इण् प्रत्याहारस्तु परेणैव णकारेण गृह्यते-इति शम् ।

**पादटिप्पणी**

1. माहेश्वरसूत्रम् - 1 ।
2. तदेव, सूत्रम् - 6 ।
3. तदेव, सूत्रम् - 6 ।
4. पाणिनि-अष्टाध्यायी 1/1/69 ।
5. तदेव 6/3/111 ।
6. पाणिनि-अष्टाध्यायी 7/4/13 ।
7. तदेव 8/4/57 ।
8. तदेव 1/1/51 ।
9. तदेव 8/4/64 ।
10. तदेव 8/3/14 ।
11. तदेव 7/1/100 ।
12. तदेव 7/1/101 ।
13. पाणिनि-अष्टाध्यायी - 7/1/100 ।
14. तदेव 1/1/69 ।
15. तदेव 7/4/7 ।
16. तदेव - 6/4/77 ।
17. तदेव 1/1/69 ।

**सन्दर्भग्रन्थाः**

1. पतञ्जलिः व्याकरणमहाभाष्यम्
2. कैयटः - प्रदीप टीका ।
3. नागेशभट्टः उद्योतटीका ।
4. पाणिनि - अष्टाध्यायीसूत्रपाठः ।

**सहाचार्यो व्याकरणविभागाध्यश्च,**
**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. ),**
**वेदव्यासपरिसरः,बलाहारः ( हि. प्र. ) ।**

❖❖❖

# भाष्यानुसारिशब्दार्थसम्बन्धविमर्शः

✍डॉ. शरदचन्द्रसाहुः

**कात्यायनस्य प्रथमं वार्त्तिकमाश्रित्य महाभाष्यदिशा विवरणकर्त्ता लेखकोऽत्र शाब्दिकसम्मतं स्फोटसिद्धान्तमनुरुध्य शब्दार्थयोः सम्बन्धो नित्य इति निष्कर्षति । तत्र भाष्यस्थाः कोटयः, मीमांसकानां वर्णानां नित्यत्वं वाचकत्वञ्चेति सिद्धान्तस्य शेषकृष्णोक्तप्रमाणन पदर्श्य खण्डनं च पस्तूयन्ते । ( स. )**

महाभाष्यकारेण पतञ्जलिना लौकिकवैदिकशब्दा उक्ताः, स्वरूपमप्युक्तं, प्रयोजनान्यपि निगदितानि । एतदनन्तरं शब्दानुशासने कर्त्तव्ये सति प्रश्नः उत्पद्यते तत्कथं कर्तव्यमिति किं शब्दोपदेशः कर्तव्यः, आहोस्विद् अपशब्दोपदेशः, आहोस्विद् उभयोपदेशः इति । अत्र सैद्धान्तिकरूपेण समाधीयते यत् - अन्यतरोपदेशेन कृतं स्यात् । उदाहरति भक्ष्याऽभक्ष्यनियमान् किन्तु किं पुनरत्र ज्यायः? इत्युक्ते स्पष्टयति लघुत्वात् शब्दोपदेशः करणीयः । कथं तर्हीमे शब्दाः प्रतिपत्तव्या? इति जिज्ञासायाम् उत्तरं दीयते -

किञ्चित सामान्यविशेषवल्लक्षणं कर्तव्यम् । किं पुनस्तत्? उपसर्गापवादौ । कश्चिद् उत्सर्गः, कश्चिद् अपवादश्च । तद्यथा - 'कर्मण्यण्' सूत्रम् उत्सर्गरूपेण स्वीकृतमस्ति, तस्यापवादरूपं सूत्रम् 'आतोऽनुपसर्गे कः' ।

पतञ्जलिमहाभाष्यस्य प्रथमे पस्पशाह्निके शब्दस्य नित्यत्वाऽनित्यत्वविचारे किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः? इति प्रश्ने कृत सति सिद्धान्तयति यत् आचार्येण व्याडिना विरचिते 'संग्रहः' इतिनाम्नि ग्रन्थे विषयेऽस्मिन् तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः - 'यद्येव नित्योऽथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति ।'

शास्त्रस्य धर्मजनकताधिकरणे आक्षेपं विदधाति - कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्? पाणिनीये शास्त्रे शब्दस्य नित्यत्वानित्यत्वयोर्विषये किं निर्द्देशितमिति जिज्ञासायां समादधाति आचार्यः कात्यायनः 'सिद्धे शब्दार्थसम्बन्धे' प्रथमवार्तिकमिदं वर्तते । एनदवलम्ब्य महाभाष्ये पतञ्जलिना भाष्यं विलेखितम् - 'सिद्धे शब्देऽर्थे सम्बन्धे चेति ।' अत्र सिद्धशब्दपदार्थः कः? इत्याक्षेपे भाष्यस्य समाधानं दीयते - नित्यपर्यायवाची सिद्धशब्दः । पुनः 'कथं ज्ञायते' इति प्रश्नभाष्ये कृते सति उत्तरभाष्ये समादधाति यत् - 'यत् कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा - सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ।'

अतः पुनः प्रश्नं करोति पूर्वपक्षः ननु च भोः कार्येष्वपि वर्तते । तद्यथा - सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति । लौकिकव्यवहारेऽपि जनाः सिद्धशब्दस्य प्रयोगं कुर्वन्तो वदन्ति मम एतत्कार्यं सिद्धम् । अतोऽत्र प्रश्नो ज्यायान् । एवं सन्देहे सति उदाहरति- 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहाद् अलक्षणम्' इति सिद्धशब्दः नित्यपर्यायवाची वर्तते । पुनरत्र आक्षेपं करोति - किं पुनः अनेन वर्ण्येन? किं न महता कण्ठेन नित्यशब्द एवोपात्तो यस्मिन्नुपादीयमानेऽसन्देहः स्यात्? पूर्वपक्षः सन्देहम् उपस्थापयति यत् - किमर्थं कात्यायनाचार्येण सन्देहयुक्तं पदं प्रयुक्तं तदा भाष्ये उत्तरपक्षः समादधाति - मङ्गलार्थम् । 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दम् आदितः प्रयुङ्क्ते, 'मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ।'

आचार्योऽत्र निणयं विदधाति - व्याख्यानेनैव शब्दस्यार्थस्य प्रतिपत्तिर्भविष्यति । अतः मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यावाचिनं वर्णयितुमिति।

इत्थं सुनिश्चिते सति येषां शब्दानाम् उपदेशः क्रियते, तेषां किं पुनराकृतिः पदार्थः, अहोस्विद् द्रव्यम्? उभयमित्याह । कथं ज्ञायते? आचार्येण पाणिनिना उभयथा हि सूत्राणि पठितानि । यथा - आकृतिं पदार्थं मत्वा - 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' द्रव्यं मत्वा 'सरूपाणामेकशेष एकविभक्तौ' इति शास्त्रे पक्षद्वयं समादृतम् अस्ति ।

पदार्थनिर्णयाधिकरणे आशङ्कामुपस्थाप्य - कथं पुनरिति प्रश्नः क्रियते यत् शब्दस्यार्थौ द्वौ जातिः व्यक्तिश्च । अत्र कं पुनः पदार्थं मत्वा एष विग्रहः करणीयः? 'सिद्धे शब्दे अथ सम्बन्धे चेति ।' नित्यो हि अर्थवताम् अर्थैरभिसम्बन्धोऽस्ति अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः - 'सिद्धे शब्देऽर्थे सम्बन्धे चेति । द्रव्यं हि नित्यम् आकृतिरनित्या। कथं ज्ञायते? उदाहरति महाभाष्यकारः - एवं हि दृश्यते लोके मृत् कयाचित् आकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिम् उपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिम् उपमृद्य कुण्डिकाः क्रियन्ते । एवं सुवर्णं कयाचिद् व्याकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिम् उपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिम् उपमृद्य कटकाः क्रियन्ते, तानुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः, पुनः अपरयाऽऽकृत्यायुक्तः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिः अन्या चान्या च भवति, द्रव्यं पुनस्तदेव । आकृत्युपमर्दने द्रव्यमेवाऽवशिष्यते ।'

आकृतावपि पदार्थ एष विग्रहो न्याय्यः - 'सिद्धे शब्देऽर्थे सम्बन्धे चेति । ननु चोक्तम् - आकृतिरनित्या इति । समाधानभाष्येण समाधीयते भाष्यकारेण । नैतदस्ति । नित्याऽऽकृतिः । कथमिति प्रश्ने सति - न क्वचिद् उपरतेति कृत्वा । सर्वत्रोपरता भवति ।

द्रव्यान्तरस्था उपलभ्यते। अनेन विज्ञायते यत् - एकस्मिन् स्थले आकृतेः तिरोहितत्वेऽपि अन्यत्र तस्याः स्थितिः भवति एव, अतआकृतिः नित्यैव विद्यते ।'

विषयेऽस्मिन् नित्यत्वाऽनित्यत्वविचाराऽनवसरबोधकभाष्येण समाधानं विधीयते - किं न एतेन एदं नित्यम् इदम् अनित्यम् इति । यन्नित्यं तं पदार्थं मत्वा एष विग्रहः क्रियते - सिद्धे शब्देऽर्थे सम्बन्धे चेति । कथं पुनर्ज्ञायते - 'सिद्धः शब्दोऽर्थः सम्बन्धश्चेति?'

लोकतः - यल्लोकेऽर्थमुपादाय शब्दान् प्रयुञ्जते । नषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा तेषां निर्वृत्तौ यत्नः क्रियते । तद्यथा - घटेन कार्यं करिष्यन् कुम्भकार कुलं गत्वाऽहघटं कुरु अनेन कार्यं करिष्यामीति । न तद्वत् शब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽहशब्दान् कुरु प्रयोक्ष्ये इति । तावत्येवार्थम् उपादाय शब्दान् प्रयुञ्जते । अतोऽस्माभिः विज्ञायते यत्- शब्दः, अर्थः, सम्बन्धश्च नित्यो वर्तते ।

**शब्दार्थयोः नित्यत्वनिरूपणे स्फोटसिद्धान्तः** - तत्र शब्दगताः वर्णाः प्रत्येकं मिलिताः वा अर्थस्य वाचका इति शङ्कायाम् एतद् द्वयमपि नैव सम्भवति । वर्णानां मध्ये प्रत्येकवाचकत्त्वे घटशब्दे 'घ' वर्णेनैव कम्बुग्रीवादिमदर्थस्य बोधे शेषाणां वर्णानां मेलनमपि नैव सम्भवति । येन क्रमेण वर्णाः उच्चरिताः तेनैव क्रमेण तेषां स्मरणं भवेदिति नैव वक्तुं शक्यते । दृश्यते च अनुभूतानां स्मरणस्य क्रमविपर्ययोऽपि । तेन सरः, रसः, नदी, दीन इत्येतेषु शब्देषु क्रमविपर्यये सर्वथा भिन्नार्थबोधः सम्भवति । अत एव कल्प्यते यद् उच्चारितैर्वर्णैः स्फोटात्मकः नित्य शब्दः अभिव्यज्यत इति तदुक्तं शेषकृष्णमहाभागैः स्फोटतत्त्वनिरूपणे -

**न प्रत्येकं न मिलिता न चैकस्मृतिगोचराः ।**
**अर्थस्य वाचका वर्णाः किन्तु स्फोट स च त्रिधा ॥**

तत्र वर्णस्फोटः, पदस्फोटः वाक्यस्फोटश्च इति त्रैविध्येऽपि पदस्फोटः वाक्यस्फोटश्च मुख्यौ, लोके पदवाक्ययोरेव अर्थबोधकत्वदर्शनात् । स्फोटात्मकः शब्दः अर्थबोधकः ब्रह्मरूपो नित्यश्च । स्फुटत्यर्थः अस्मात् इति व्युत्पत्त्या यौगिकार्थसम्भवेऽपि स्फोटशब्दः पङ्कजादि- शब्दवत् योगरूढः । नित्यानामपि वर्णानां तत्तद्व्यञ्जकवायुभिः ध्वनिभिर्वा व्यवधाने सति वर्णसमुदायात्मकः शब्दः नैव प्रत्यक्षः स्यात्, अतः नित्यानां वर्णानां मेलनाऽसम्भवात् प्रत्येकं वाचकत्वाभावात् शब्दनित्यत्वपक्षेऽपि अर्थबोधो नैव सम्भवति । तत्प्रतिपादितं स्फोटतत्त्वनिरूपणे-

**नित्यानामपि वर्णानां तत्तद्व्यञ्कवायुभिः ।**
**ध्वनिभिर्वा तिरोधाने न वर्णसमुदायधीः ॥**

घटशब्दम् उदाहृत्य वर्णयति यत् - घटशब्दे घकारः, अकारः, टकारः, अकारश्च इत्येते चत्वारो वर्णाः क्रमिकाः कम्बुग्रीवादिमदर्थस्य वाचका इति मीमांसकैरपि स्वीकरणीयम्। क्रमविपर्यये तदर्थस्य बोधः नैव भवितुं शक्यते । मीमांसकमते शब्दस्य नित्यत्वात् विभुत्वाच्च

क्रमो नैव सम्भवति । उपलब्धिनिमित्तकोऽपि सः क्रमः तस्याः उपलब्धेरेकत्वात् नैव सुलभः, तदुक्तं स्फोटतत्त्वनिरूपणे–

**नित्यानाञ्च विभूनाञ्च क्रमो नास्त्येव वास्तवः ।**
**उपलब्धिनिमित्तश्चेत् सा चेदेका कुतः क्रमः ।।**

किञ्च यदि सोऽयं गकारः प्रत्यभिज्ञाबलाद् वर्णाः नित्याः, इति स्वीक्रियते तर्हि उत्पन्नो गकारः, नष्टो गकारः इति प्रतीतिबलाद् तेषामनित्यतापि सम्भवत्येव । तच्चोक्तं स्फोटतत्त्वनिरूपणे–

**वर्णानां प्रत्यभिज्ञानबलात् स्यान्नित्यता यदि ।**
**अनित्यतैव किं न स्यादुत्पादादिधियां बलात् ।।**

अतः स्फोटस्वीकारं विना मीमांसकमतेनाऽपि अर्थबोधनिर्वाहासम्भवात् स आवश्यकः। एवं विधस्फोटसिद्धान्तेनैव ज्ञायते यत् शब्दार्थयोः सम्बन्धः नित्यो वर्तते ।

**प्राचार्य्यः**
श्रीमुक्तानन्दसंस्कृतमहाविद्यालयः
शान्तिमन्दिरम्, मगोदम्, वलसाडम्,
गुजरातम् ।

❖❖❖

# सैषा संस्कृते भाषितभङ्गी

✍डॉ. दीपेश कतिरा

**चारुदेवशास्त्रिमहाभागः १९५७ तमे ईशवीये वर्षे वाग्व्यवहारादर्शनामकं ग्रन्थं प्राणयत् । तत्र चिन्तनाधीनेषु वाक्येषु ५४९ तमस्य वाक्यस्य विमर्शावसरे स लिखति, 'इति प्रचलद्भाषानुकृतिः । नैषा संस्कृते भाषितभङ्गी' इति । अपि च ६५४ तमस्य वाक्यस्य विमर्शावसरे स लिखति, 'राज्याभिषेकं ददुरित्यागन्तुकोऽसाम्प्रदायिको वाग्व्यवहारः । संस्कृतवाङ्मये नैकत्रा- प्येष समाश्रितः पूर्वैः सूरिभिरिति नायमादृत्यः । राज्ये कश्चित्त- दर्होऽभिषिच्यते.... इत्येव संस्कृते भाषितभङ्गी' इति । किं मासः (मासात्मकः कालः) नेयो भवति, याप्यो वा? इति चेत् याप्य एव इति बालोऽपि अवगच्छति । तथा सति 'यक्षः तस्मिन् अद्रौ कतिचित् मासान् अनयत्' इति प्रयोगः किं संस्कृते व्यवहारानुपाती उत न? इति चेत् अस्त्येव व्यवहारानुपाती । यतः सैषा संस्कृते भाषितभङ्गी । तत्र मेघदूते महाकविप्रयोगः प्रमाणम् । भाषितभङ्ग्याः ज्ञानं शिष्टप्रयोगात् भवति। तस्मात् शिष्टप्रयोगाः परिशीलनीयाः भवन्ति । एतया दृष्ट्या रामायण-भारत-पुराणादयः ग्रन्थाः क्रमशः अवलोकनीया भवन्ति तस्मिन्नेव क्रमे भाष्यमपि अवश्यमवलोकनीयं भवति । शोधपत्रेऽस्मिन् महाभाष्यस्य प्रथमे आह्निके भाषितभङ्गीनामध्ययनं विहितं वर्तते । (स.)**

**भूमिका**

संस्कृतेन स्वाभिप्रायाभिव्यक्तिः, काव्यरचना, टीकानां रचना च बहोः कालात् जायमाना अस्ति । राष्ट्रियसंस्कृतसंस्थानसदृशानां नैकेषां पारम्परिकविश्वविद्यालयानाम् उदये जाते प्रशासने, इतिवृत्तवर्णने, सद्यस्कविषयाणां चर्चासु अपि संस्कृतस्योपयोगः प्रवृद्धो दृश्यते। यथा मराठी-सदृशीनां भाषाणां प्रयोक्तारः सुलभाः तथैव केचित् संस्कृतभाषायाः अपि नित्यशः प्रयोक्तारः विद्यन्ते । मराठीभाषाप्रयोक्तृभिः यथा वंशपरम्परया इयं भाषा अधिगता वर्तते, तथैव वंशपरम्परया संस्कृतभाषामधिगतवन्तः संस्कृतभाषाप्रयोक्तारः अङ्गुलिगणनीया एव स्युः । तथा स्थितौ नैकदा प्रयुज्यमानायां संस्कृतभाषायां आधुनिकभारतीयभाषाणां छाया सुलभा । चारुदेवशास्त्रिणा प्रकाशितात् संस्कृतसाहित्यात् नैकानि तथाविधानि वाक्यानि उद्धृत्य स्वीये वाग्व्यवहारादर्शे चर्चितानि, तत्र संशोधनानि च सूचितानि । सेयं मातृभाषाच्छाया न

सदैव भ्रामिका भवति । यतो हि प्रचरद्भारतीयाः भाषा अपि संस्कृतादेव उद्भूताः 'माता चलच्चित्रं द्रष्टुं न ददाति' इति वाक्ये 'देखने नहीं देती' इत्येव भूतस्य हिन्दीवाक्यस्य अनुकृतिः सुस्पष्टा । किन्तु तस्मादेव इदं वाक्यं संस्कृतभाषितभङ्गीम् अतिक्रामति इति वक्तुं न शक्यम् । कालिदासेन अभिज्ञानशाकुन्तलस्य षष्ठऽङ्के द्वाविंशतितमे श्लोके 'वाष्पश्च न ददात्येनां द्रष्टुं चित्रगतामपि' इति तत्सममेव प्रयोगं करोति । अतोऽस्मिन् सन्दर्भे भाषाविज्ञानस्थायाः 'इडियम्' इत्यस्याः कल्पनायाः विचारः कर्तव्यः ।

**इडियम्** -

इडियम् - शब्दः प्रायः द्वयोः अर्थयोः प्रयुज्यते । 'गिरिम् आरोढुं प्रयतमानस्य मम प्रथमग्रासे एव मक्षिकापातः' इति पदसमुदायः इडियम् इति उच्यते । एषः पदसमुदायः अपरिवर्ती । प्रयोगवेलायाम् अस्य पदानाम् अस्मिन्नेव क्रमे उच्चारणम् अनिवार्यम् । अस्य अभिधातः भिन्नः एव अर्थो ग्राह्यो भवति श्रोत्रा । अस्य भाषान्तरे अनुवादे कर्तव्येऽपि अभिहितार्थः सर्वथा त्याज्यो भवति । एतादृशानां इडियम्-रूपाणां भूयान् प्रयोगः सर्वासु भाषासु भवति । संस्कृतम् अपि तत्र नापवादभूतम् । 'संस्कृतवाङ्मयस्थानां वचोविच्छित्तीनां समीक्षा' इति शीर्षकयुता त्रिदिवसीया अखिलभारतीया कार्यशालापि कर्णाटक-संस्कृतविश्वविद्यालयेन 2014 तमे ईशवीये वर्षे समायोजिता आसीत् । तत्र Idiomatic Expressions इत्यस्य कृते 'वचोविच्छित्ति' - शब्दः प्रयुक्तः विद्वद्भिः । इतोऽन्यस्मिन्नपि अर्थे 'इडियम्' - शब्दः प्रयोज्यते । कयाचित् भाषया कस्यचिदर्थस्य प्रकटनाय यां शैलीं तन्मातृभाषिकः समुचितां मन्यते सा शैली तस्याः भाषायाः इडियम् भवति । भाषायाः वाक्यरचनापद्धतिः यादृच्छिकी भवति । तां पद्धतिम् अननुसृत्य उक्तं वाक्यम् अपि अर्थसमर्पकं तु भवति एव । तथापि तन्मातृभाषिकाया तद् म्लेच्छितमिव (Solecistic) भाति । सेयम् अर्थप्रकटनस्य शैली 'इडियम्' इति उच्यते । लौकिकभाषायाः इडियम् - परिज्ञाने लोकः एव प्रमाणम् । तत्र भगवता भाष्यकारेणापि सिद्धशब्दस्य पदार्थम् अन्विष्यता लौकिकप्रयोगाः एव समाश्रिताः (दृश्यताम् पृ. 23 - 'नित्यपर्यायवाची सिद्धशब्दः । कथं ज्ञायते । यत्कूटस्थष्वविचालिषु भावेषु वर्तते । तद्यथा सिद्धा द्यौः, सिद्धा पथिवी……') । चारुदेवशास्त्रिणा वाग्व्यवहारदर्शकनामके ग्रन्थे किञ्चित् वाक्यम् उदाहृतम् । तदित्थम् - 'त्यागस्तपस्या च नः संस्कृतेरात्मा, शब्दान्तरेऽध्यात्मप्रधानेयम्' इति । अस्य वाक्यस्य विमर्शे स कथयति, 'संस्कृतिः संस्कार इत्यनर्थान्तरम् । अधुनातनास्तु तत्तच्छिक्षादिसंसकारसंस्कृतायाः कस्याश्चिज्जातेराचारविचारसमुच्चयेऽस्य संकेतमभ्युपयन्ति । पूर्वे तु सभ्यताशब्दमेवात्रार्थे प्रयुयुजिरे। शब्दान्तरे इति प्रचरद्भाषानुकृतिः । नैषा संस्कृते भाषितभङ्गी । आत्मप्रधानेयम् । इत्युक्तं भवति इत्येव वक्तव्यम् । आत्मानमधिकृत्य अध्यात्मम् । इदं च प्रधानशब्देनोत्तरपदेन दुःश्लिष्टम् ।' अत्र चारुदेवशास्त्रिणा भाषितभङ्गी-शब्दः इडियम् इत्यस्मिन्नेवार्थे प्रयुक्तः इति भाति ।

**अनुसन्धानपद्धतिः**

संस्कृते तावत् वंशपरम्परया संस्कृतभाषामधिगतवन्तः संस्कृतभाषाप्रयोक्तारः अङ्गुलिगणनीया एव स्युः इति आदावेव उक्तम् । तर्हि संस्कृते इडियम् इत्यस्य स्वरूपं कथङ्कारं परिशीलयितुं शक्यम् ? तत्र शिष्टैः विरचितं संस्कृतसाहित्यमेव प्रमाणम् । इत्थमेव वाग्व्यवहारादर्शे, शब्दापशब्दविवेके च चारुदेवशास्त्रिणा नैकानि संस्कृतभाषित-भङ्ग्यननुसारीणि वाक्यानि प्रत्याख्यातानि । प्रस्तावतरङ्गिणीवाक्यमुक्तावल्यादिषु संस्कृत-भाषितभङ्ग्यनुगुणानि वाक्यानि च प्रदर्शितानि । वामनशिवराम आप्टेमहाभागेनापि संस्कृत-भाषितभङ्ग्याः यथार्थतयाधिगमाय 'गाईड टू संस्कृत कम्पोजिशन' नामके स्वीये ग्रन्थे नैकानि वाक्यानि उदाहृतानि । स्पाये महाभागेन 'संस्कृत सिन्टेक्स' - नामके ग्रन्थे अपि अस्याः विचारः कृतः । किन्तु भाषितभङ्गी प्रतिलेखकमपि भिद्यते । सर्वैरमीभिः शिष्टैः प्रयुक्तानां भङ्गीनां समाहार एव अस्मत्कृते संस्कृतभाषितभङ्गी । तया दृष्ट्या आरामायणात् शास्त्रीयग्रन्थान् यावत् आयुर्वेदात् अर्थशास्त्रं यावत् प्रतिग्रन्थम् अमीषां भाषितभङ्गीनामध्ययनं कर्तव्यं भवति । विदुषां मते व्याकरणमहाभाष्यम् आकरग्रन्थः । अत्र सर्वविधानि तत्त्वानि समुपलभ्यन्ते । अतः अस्मिन् पस्पशाख्ये प्रथमे आह्निके इत्थं संस्कृतभाषितभङ्गीनामध्ययनं विधाय निष्कर्षभूताः अंशाः प्रस्तूयन्ते ।

**नकारस्य वाक्यादौ प्रयोगः**

नकारेण यत्र समग्रं वाक्यं निषेध्यं स्यात् तत्र नकारः वाक्यादौ एव प्रयुक्तो वर्तते । समग्रे अपि पस्पशाह्निके ईदृशाः एकादश प्रयोगाः दृष्टाः । नैकत्रापि एतस्याः परिपाट्याः व्यभिचारः लक्ष्यते । उदाहरणानि -

- न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । (पृ. 5)
- न तज्ज्वलति कर्हिचित् । (पृ. 8)
- नात्यन्तायाज्ञानं शरणं भवितुमर्हति । (पृ. 9)

स्पायेमहाभागेनापि नकारविषये लिखितम् - '(न) It negatives as well single words or notions as whole statements....... on eis tolerabley free where to put the negation. Commonly two places are perferred: either at the head of the whole sentence & so regularly for rhetorical purposes, as in the case of antithesis, epanaphora, also in emphatical denials.......' (पृ. 315)

**परिगणनार्थे खल्वपि**

लौकिकान् शब्दान् उक्त्वा 'वैदिकाः खल्वपि' (पृ. 2) इति उक्त्वा वैदिकान् शब्दान् अपि परिगणयति । समग्रे अपि पस्पशाह्निके परिगणनाय 'खल्वपि' इत्यस्यैव पदसमूहस्य प्रयोगः कृतो दृश्यते । इतराणि उदाहरणानि यथा -

- ऊहः खल्वपि (पृ. 5) ।

- अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम् इति अविद्वांसमाहार्धम् (पृ. 13) । अत्र खलु + अपि इति पदसमूहस्य क्रमः विपर्यस्तः दृश्यते ।
- इष्टान्वाख्यानं खल्वपि भवति । (पृ. 19)

**पुनः भूयः**

पुनश्शब्दः भूयश्शब्दः च जातायाः क्रियायाः आवृत्तिं द्योतयतः इति प्रसिद्धमेव । पस्पशाह्निके विशिष्टाः भाषितभङ्गीः वहन्तः पुनश्शब्दयुतानि एकादश वाक्यानि दग्गोचरताम् आयान्ति उदाहरणानि -

- कानि पुनः शब्दानुशासनस्य प्रयोजनानि (पृ. 4) । किं पुनस्तत् । कथन्जातीयक पुनरुपसर्गः कर्तव्यः, कथञ्जातीयकोऽपवादः ? (पृ. 20) का पुनराकृतिः ? (पृ. 22), किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः? (पृ. 22), कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्? (पृ. 22), किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे? (पृ. 36), का पुनर्वृत्तिः? (पृ. 45), उक्तादधिकं बोद्धुम् अग्रिमः प्रश्नः क्रियमाणः पुनश्शब्देन ज्ञायते । अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते - सिद्धे शब्देऽर्थे सम्बन्धे चेति? (पृ. 25) अत्र पुनश्शब्दाधिक्ये अथशब्दोऽपि पठितः इति विशेषः ।
- किं पुनरद्यत्वे? (पृ. 20), यावता कार्येष्वपि वर्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणं न पुनः कार्ये यः सिद्धशब्द इति? अत्र पुनश्शब्देन विपर्यासः द्योत्यते ।

**कस्मात्/किमर्थम्/ कुतः -**

त्रयाणामपि एषां शब्दानां समाने अर्थे प्रयोगः शक्यः । कस्मात्, किमर्थं च इत्यनयोः अपेक्षया कुतश्शब्दः । उदाहरणम् - कुत एतत्? (पृ. 8), कुत ए तन्नित्यपर्यायवचिनो ग्रहणं न पुनः कार्ये .... (पृ. 23) ।

**हिशब्दः**

इदम् अव्ययं कारणताप्रदर्शनाय प्रयुज्यते प्रायः । पस्पशाह्निके अस्य एकादशसु स्थानेषु प्रयोगः दृष्टः । नैकत्रापि एषः वाक्यादौ प्रयुक्तो वर्तते । उदाहरणानि-

- यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति । (पृ. 8)
- यो हि अजानन्नेव सुरां पिबेत् ... (पृ. 9)
- एवं हि श्रूयते ... (पृ. 19) ।
- सूत्रत एव हि शब्दान् प्रतिपद्यन्ते (पृ. 44)
- उच्चार्य हि वर्णानाह उपदिष्टा इमे वर्णा इति (पृ. 45)

मोनियर विल्यम् महाभागः कोषे स्पष्टं लिखति 'Generally used as particle usually denoting for, because, on account of never standing first in sentence, but generally after the first word......'

**अस्तिसन्ती वाक्यादौ**

संस्कृते क्रियापदानि प्रायः कर्तृकर्मभ्यां परं वाक्यान्ते दृश्यन्ते । किन्तु अस्‌धातोः लटि रूपं समगऽपि पस्पशाह्निके सप्तकृत्वः वाक्यारम्भे एव प्रयुक्तम् । उदाहरणानि -

- सन्त्येकपदान्यपि अवधारणानि (पृ. 23)
- अस्त्यप्रयुक्तः (पृ. 32)
- सन्ति वै शब्दा अप्रयुक्ताः (पृ. 36)
- अस्ति अन्यत् गर्गादिबिदादिपाठे प्रयोजनम् (पृ. 48) ।

अस्-धातोः, लिङि रूपं तु वाक्यान्ते दृश्यते एव । तद्यथा - किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसन्देहः स्यात् । वामन शिवराम आपटे महाभागेन कोशे उक्तम् ‘Often used at the commencement of a tale or narrative in the sense of ‘so it is’, ‘there’, or merely as an expletive.’ अत्र तु अयं प्रयोगो न तथा । गद्यस्य कस्यचित् वाक्यस्य अन्ते शिष्टप्रयुक्तः अस्तिप्रयोगो मृग्यः ।

**इतरे विशेषाः**

- **विषम उपन्यासः (पृ. ९)** - विषमशब्दः समत्त्वाभावम् अभिधत्ते । किन्तु अत्र अनुचित - अर्थे अत्र विषमशब्दः प्रयुक्तः । ‘अनुचितं कथम्’, ‘विपर्यस्तं वा कथम्’ इति वक्तव्ये ‘विषम उपन्यासः’ इति प्रयोगः कृतो वर्तते ।
- **वेदमधीत्य त्वरिता वक्तारो भवन्ति (पृ. १७)** - सहसा अविमृश्य वदन्ति इति अर्थे अभिधातव्ये ‘त्वरिता वक्तारो भवन्ति’ इत्येवम् एषः अर्थः अभिधीयते । तेन त्वरितवादिता इह अविचिन्त्यवादितामपि अभिधातुं समर्था इति विज्ञायते ।
- **महतो महतः शब्दौघान् प्रतिपद्येरन् (पृ. २०)** - चारुदेवशास्त्रिणा अस्य अनुवादः इत्थं कृतः ‘बडी-बडी शब्दराशियों को जाना जाए ।’ तथा स्थिते ‘महतः महतः’ इति पदसमूहः वीप्सामात्रम् । विशेषणानां वीप्सा हिन्द्यां तु श्रूयते । तद्यथा ‘मीठी मीठी बातें’ किन्तु संस्कृते तावत् ‘मधुरः मधुरः वार्तालापः’ इत्थं विशेषणस्य वीप्सा हृद्या न भाति । तस्मात् प्रायः ‘बडी-बडी शब्दराशियों को जाना जाए’ इत्यस्य अपेक्षया उपरितनस्य वाक्यस्य अनुवादः ‘बडेसे बडी शब्दराशियों को जाना जाए’ इत्थं स्यात् । अन्यत्रापि ‘अणोरणीयान्, महतो महीयान्’ इत्यादिप्रयोगश्रवणात् । ओघः जलवेगः इति कोशः । किन्तु शब्दानां महान्तं राशिं द्योतयितुम् ओघः शब्देनापि युज्यते । पद्-गतौ प्रतिना सहितः ज्ञानवाचकः नैकत्र श्रूयते ।
- **पूर्वपदलोपोऽत्र द्रष्टव्यः (पृ. २३)** - दृशिर्-प्रेक्षणे अत्र ज्ञाने प्रयुक्तः । ‘पश्यन्नपि च न पश्यति मूढः’ इति चर्पटपञ्जरिकायामपि तथा ।
- **किं न महता कण्ठेन नित्यशब्द एवोपात्तः (पृ. २३)** ‘महता कण्ठेन उपात्तः’ इत्यनेन ‘सुस्पष्टतया उच्चारितः’ इत्येतावानेव अर्थः बोद्धव्यः । आचार्यस्य शङ्करस्य (13.13) गीताभाष्ये अस्मिन्नेव अर्थे ‘कण्ठरवेण उद्घुष्य प्रवक्ष्यामि’ इत्येवं प्रयोगः ।

- **क्षुत्प्रतिघातार्थमुपादीयते (पृ. ३०)** - अत्र क्षुधा सम्बद्धः प्रतिघातशब्दः शान्त्यर्थकः एव । क्षुत्शान्त्यर्थमिति वक्तव्ये प्रतिघातशब्दः प्रयुक्तो वर्तते ।
- **दोषो निर्हण्यते (पृ. ३९) दोषो निर्घानिष्यते (पृ. ३९)** - अपाकृतो भवति इति अर्थे अभिधातव्ये निर्हण्यते इति दोषशब्दस्य योगे प्रयोगार्हः ।
- **शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् (पृ. ३०), शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् (पृ. ३१), शक्यं चानेन यत्किञ्चिदपि काष्ठम् . .. (पृ. ३१)** - सर्वेषु अपि एतेषु प्रयोगेषु शक्यम् इति क्लीबे प्रयोगः विशिष्टः । 'शक्यमम्बरमारुह्य अलङ्कर्तुं दिवाकरः', 'शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः' इत्यादिरामायणस्थेषु अपि प्रयोगेषु शक्यशब्दः विशेष्यमनुसरन् क्लीबे प्रयुक्तः । एतत् शक्-धातोः लिङ्गसर्वनाम-नपुंसकयुक्त-कर्मसामान्ये यति प्रत्यये कृते सिध्यति । ततः परं क्षुत्शब्देन योगे अपि 'अन्तरङ्गसंस्कारो बहिरङ्गसंस्कारेण न बाध्यते' इति न्यायेन शक्यशब्दः क्लीबे एव प्रयुज्यते ।
- **द्विगतापि हेतवो भवन्ति तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिताः (पृ. ५०)**- एषा उक्तिः अथवा मुहावरा कोटौ प्रविशति । तस्मात् एषा वचोविच्छित्तिः इति वक्तुं शक्नुमः ।

**उपसंहारः**

इत्थम् अत्र पत्रे इडियम् इत्यस्य पदस्य विवरणपुरःसरं संस्कृते भाषितभङ्ग्याः अध्ययनस्य सरणी काचित् उपस्थापिता । तामेव विशदीकर्तुं व्याकरणमहाभाष्यस्य पस्पशाह्निकस्थप्रयोगाणां भाषाभङ्गीदृष्ट्या विश्लेषणं प्रस्तुतम् । अनेन अव्ययानां वाक्यरचनायां समुचितस्थानस्य विषये, तत्र तत्र तेषां विशेषार्थद्योतकताविषये, अस्तिक्रियापदस्य वाक्यादौ प्रयोगौचित्यविषये, कैश्चित् शब्दैः सह विशिष्टक्रियापदानां प्रयोगौचित्यविषये च संस्कृतभाषाभिव्यक्तौ प्रयोगार्हाः नैके सूक्ष्मांशाः दृष्टिपथमायाताः इति ।

**सन्दर्भग्रन्थाः**

1. व्याकरणमहाभाष्यम्, प्रकाशकः - भार्गव शास्त्रि जोशी, चौखम्बा विद्याभवन वाराणसी, संस्करणम्- 2011 । 2. व्याकरणमहाभाष्यम्, प्रकाशकः - प्रो. वेम्पटि कुटुम्बशास्त्री, प्रतिभा प्रकाशन, संस्करणम्- 2006 ।

**श्रीसोमनाथसंस्कृतविश्वविद्यालयः**
**वेरावलम्, गुजरातम् ।**

❖❖❖

# शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे

✍डॉ. माधवदत्तपाण्डेयः

**धर्मः अदृष्टमप्युच्यते । दृष्टस्य कृते पत्यक्षादिप्रमाणानां सावकाशत्वम् । परमदृष्टं शब्दैकप्रमाणगम्यम् । शब्दप्रामाण्याच्च याज्ञे कर्म्मणि प्रयोगे तत्रापि शब्दज्ञानपूर्वके पयोगे धर्मः । व्यवहारे च भवतु यथा तथा, न कापि क्षतिः । मुक्तये 'ऋते ज्ञानान्न मुक्तिरि' ति श्रुत्या ज्ञानादेव मुक्तिरिति लभ्यते । तथाहि महाभाष्यकृता अधिकारिभेदेन व्यवस्था कृतेति प्रत्येमि । तत्र स्वर्गादिफलकाङ्क्षिणां कृते प्रयोगे धर्मः, अकामिनां मोक्षैकमात्रपथिकानां कृते च ज्ञाने धर्म इति आस्थेयम् । विदुषा लेखकेन अत्रतत् सर्वं विमृष्टम् । (स.)**

धर्मार्थकाममोक्षाणां चतुर्विधपुरुषार्थानां सञ्चयः मानवस्य परमं लक्ष्यं वर्तते अस्माकं संस्कृतौ । तेषु पुरुषार्थचतुष्टयेषु धर्मस्यैव प्रधानता दरिदृश्यते सर्वत्र । तद्यथा श्रीमन्महाभारते व्यासवचनम् -

**ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ।।**[1]

**सुखस्य मूलं धर्मः**[2]

ब्रह्मोपासनं धर्मः । स एव मोक्षसाधनम् । शाब्दिकसमवायेषु प्रधानतया शब्दब्रह्मणः समुपासनं भवति -

**अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यथा ।।**[3]

**वाग्वै ब्रह्म**[4]

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।**[5]

अथात् शब्दब्रह्मोपासनं धर्मः । तेन शब्दब्रह्मोपासकाः शाब्दिकाः शब्दतत्त्ववेत्तारो वा शाब्दिकत्वेन धार्मिकाः भवन्ति । मनसा वाचा कर्मणेति त्रिभिः प्रकारैः धर्माचरणं क्रियते। यादृशं मनः भवति तादृशी वाक् कर्म च बुद्धिः भवति । तथैव च सिद्धिर्भवति । तद्यथा -

**देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।**
**यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।।**[6]

मोक्षसाधने वागुपासनधर्मप्रसङ्गे साधुशब्दाः असाधुशब्दाश्च ज्ञानात्मनि आयान्ति । यतो हि – 'ज्ञानाधिकरणमात्मा'[7] तेन ज्ञानप्रसङ्गे साधु–असाधुशब्दानां ज्ञानं भवति । ज्ञानस्य अधिकरणम् आत्मा विद्यते तत्र ज्ञानार्जनप्रसङ्गे साधुशब्दैः सह असाधुशब्दानां ज्ञानं भवत्येव।

धर्मसाधने साधुशब्दाः व्यवहर्त्तव्याः न च असाधुशब्दाः । अतः समाधानमपेक्षते यत् शब्दज्ञाने धर्मः आहोस्वित् प्रयोगे ? वाग्ब्रह्मोपसनप्रसङ्गे चर्चा एवमपि स्यात् यत् कीदृशी वाग्भवेत् धर्मसाधने साधुः असाधुः वा? एतत् पाक् चतुर्विधा हि वाग् भवति तदुत्पत्तिविषयेऽपि ध्यातव्यम् ।

तद्यथा –

**आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।**[8]

तदनन्तरम्

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।**[9]

स बिन्दुवायुः परारूपेण मूलचक्रस्थाने पश्यन्ती रूपेण नाभिस्थाने मध्यमारूपेण हृदिस्थाने वैखरीरूपेण च कण्ठपर्यन्तमागता 'अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालु, ऋटुरषाणां मूर्धा, लृतुलसानां दन्ताः, उपूपध्मानीयानामौष्ठौ, ञमङणनानां नासिका च, एदेतौः कण्ठतालु, अदोतौः कण्ठोष्ठम्, वकारस्य दन्तोष्ठम्, जिह्वामूलोयस्य जिह्वामूलम्'[10] नासिकानुस्वारस्येति वर्णाः पदवाक्यरूपेण परश्रवणगोचराः शब्दशक्तित्वेन अर्थद्योतकाश्च भवन्ति । तत्र साध्वसाधुरूपेण शब्दाः लोके सन्ति तेषु स्वरतो वर्णतो वा दृष्टानां शब्दानां व्यवहारमुपपादयन्नुदाहरति भगवान् भाष्यकारः –

**दुष्टः शब्दः स्वरता वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।**
**स वाग्व्रजो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**[11]

अपरञ्चेदं व्याकरणशास्त्रं वाङ्मलानां चिकित्साशास्त्रमपि वर्तते । मन्ये शरीरेष्वपि यन्त्राणि सन्ति। उदाहरणार्थम् – यथा आभियान्त्रिकीप्रयोगे अन्यस्य स्थाने अन्यस्य प्रयोगो भवति तर्हि यन्त्रे विकृतिः भवति । तथैव व्याकरणनियमं विना अन्यस्य स्थाने अन्यानां वर्णानां प्रयोगो भवति तर्हि मानवीये शरीरेष्वपि आभ्यन्तरबाह्यविकारो भवत्येव । साध्वसाधुशब्दानां प्रभावः केवलम् उच्चारणे एव न दोषो भवति । अपितु तस्य श्रवणेऽपि दोषो भवति । तदेवं निर्दिशति भगवान् भाष्यकारः म्लेच्छा मा भूमेत्येध्ययं व्याकरणम् 'म्लेच्छो नापभषितवै' इति । (व्या. म. भा. पस्पशाह्निकम्)

तदर्थं वाङ्मलानां चिकित्सितमपि व्याकरणशास्त्रं वर्तते । तदाह गुरुणा श्रीभर्तृहरिणा–

**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते । ( वाक्यपदीये ब्रह्मकाण्डे )**

मानवस्य परमं लक्ष्यं मोक्षसाधनम् । पुरुषार्थचतुष्ट्यषु प्रथमः धर्मः मोक्षस्य आद्यं सोपानं वर्तते। ब्रह्मोपासनं धर्मः । 'वाग्वै ब्रह्म' तच्च ब्रह्मसंसाधकमिदं व्याकरणशास्त्रं प्रथमं सिद्धिसोपानम्, अजिह्मराजपद्धतिश्च वर्तते मोक्षमाणानामेतत् समीक्ष्य उपदिशन्नाह श्रीभर्तृहरिणाः -

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**
**इयं सा मोक्षमाणानामजिह्म राजपद्धतिः ॥ (वाक्यपदीये ब्रह्मकाण्डे)**

साङ्गं वेदाध्ययनम् ब्राह्मणानां नैसर्गिकं कर्तव्यम् 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञयश्च । नैकेषु स्थलेषु ब्राह्मणानां हत्या सुरापानञ्च महापातकं ज्ञापयति भगवान् पतञ्जलिः तद्यथा ''यो ह्यजानन् ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्'' अर्थात् धर्म संचयितुं, वेदशास्त्रोपनिषदां सम्यक् अर्थान् बोधितुं, रक्षार्थं च 'रक्षोहागमघ्वसंदेहाः प्रयोजनम्' इति मुख्यगौणानि च प्रयोजनानि निर्दिष्टानि व्याकरणाध्ययनस्य भगवता पतञ्जलिना । व्याकरणाध्ययनस्य प्रधानं लक्ष्यं मोक्षसाधिका धर्मसंसिद्धिः । व्याकरणेन साधुशब्दाः मोक्षसाधकाः भवन्ति नैव च असाधुशब्दाः । एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। तर्हि भाष्यवर्णिताः बहवोऽपभ्रंशशब्दाः एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य शब्दस्य गावी, गोणी, गोता, गोपोतलिकेत्येवमादयो बहवोऽपभ्रंशाः । तर्हि यदि शब्दज्ञाने धर्मः तर्हि अपशब्दज्ञानेप्यधर्मः । एवं भवति सति अल्पोयांसः साधुशब्दाः भूयानपशब्दाः । तेन अल्पोयांसः धर्मः भूयांसोऽधर्मः । यो हि शब्दान् जानाति सः अपशब्दानपि जानाति तर्हि धर्मसाधनमल्पं भूयानधर्मसाधनम् । कथं मोक्षसाधनम् । किं करणीयम् ? कश्च निर्णयः ?

इति निर्णयार्थमुदेति प्रश्नः भगवता पतञ्जलिना कृते व्याकरणमहाभाष्ये शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे । एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः, सप्रयुक्तः स्वर्गे लोके कामधुग् भवति। (ऋक्. 6/1/84) अनया श्रुत्या पूर्णमनोरथस्य ज्ञानं भवति । कस्यचित् शब्दस्य सुप्रयागं दृष्ट्वैव तस्य शब्दस्य सम्यग्ज्ञानस्यानुमानं भवति । सम्यग्ज्ञाने सति शब्दस्य सुप्रयोगः दृश्यते । अत एव प्रसङ्गेऽस्मिन् प्रथमे सति द्वितीये वा सति धर्मस्योत्पत्तिभवतीति निर्णेतुं भाष्ये भवति प्रश्नः ''शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे''-

अत्र त्रयः पक्षाः समाधातुम् उपस्थाप्यन्ते -

**प्रथमः पक्षः -**

**केवलं ज्ञाने धमः इति स्वीकृते दोषः** - यदि केवलं ज्ञाने धर्मः स्वीकृतो भवति तर्हि धर्मेण सह अधर्मस्यापि प्रवृत्तिः भविष्यति । 'ज्ञाने धर्मः इति चेत्तथाऽधर्मः' [12] यतो हि यथा शब्दस्य ज्ञाने धर्मः उदेति तथैव अपशब्दज्ञानेऽप्यधर्मः भवति । वस्तुतः अपशब्दानामाधिक्य सति अधर्मः अधिकः भाति । ये साधु शब्दान् जानन्ति ते असाधु शब्दानपि जानन्ति । अत एव स्वाभाविकं वर्तते अधर्मस्य आधिक्यम्। एतदतिरिक्तं 'तेऽसुरा

हेऽलयो हेऽलयः कुर्वन्तः पराबभूवुः' इति वैदिकाख्यानेऽपि प्रयोगे एव धर्माधर्मयोः समर्थनं भवति । 'आचारे नियमः'[13] ज्ञाने धर्मः इति स्वीकृते विरोधो भवति । अतः केवलं ज्ञाने धर्मः न हि अपितु प्रयोगे धर्मः स्वीकर्त्तव्यः । इति वरम् ।

**द्वितीयः पक्षः**

**केवलं प्रयोग दोषः** - ज्ञाने अधर्मः भवति इति निराकरणार्थं केवलं प्रयोगे धर्मः स्वीक्रियते तर्हि यः व्याकरणादिशास्त्राध्ययनं विनैव शब्दप्रयोगं करोति सोऽपि धार्मिकः भविष्यति?।[14] परिणामस्वरूपं व्याकरणादिशास्त्रे परिश्रमशीलाः असफलाः अन्ये च सफला भविष्यन्ति । व्यतिरेकोऽपि वै लक्ष्यते । कृतप्रयत्नाश्चाप्रवीणाः अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ।[15] अतः प्रयत्नस्य वैयर्थ्यं सुस्पष्टम् । अस्तु केवलं प्रयोगे धर्मः न स्वीकर्तव्यः ।

**तृतीयः पक्षः**

शब्दे प्रयोगे च धर्मः इति स्वीक्रियते चेत् गौरवम् - अत्र तृतीयः पक्षः एवं वर्तते ज्ञानपूर्वकप्रयोगे धर्मः । यथा ज्ञानपूर्वकं वैदिकानुष्ठानेन फलं भवति धर्मो वा भवति 'शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ।'[16] अर्थात् वैदिकशब्दाः सनियमं पठनेन फलप्रदाः भवन्ति तदेवं शब्दप्रयोगेऽपि बोद्धव्यम् । अस्तु सनियमं व्याकरणाध्ययनेन शब्दं यः प्रयुङ्क्ते स एव धार्मिकः ।

**सिद्धान्तपक्षः**

केवलं ज्ञाने धर्मः । वस्तुतः साधुशब्दानां ज्ञाने एव धर्मः भवति । यतो हि प्रारम्भे श्रुत्यादि प्रमाणत्वेन ज्ञाने धर्मः । तन अपशब्दानां ज्ञाने अधर्मः न ज्ञाप्यते । श्रुत्यादिशब्दानां प्रमाणं वैयाकरणाः स्वीकुर्वन्ति । ''शब्दप्रमाणकाः वयम् यच्छब्द आह, तदस्माकं प्रमाणम्'' ।[17] अतः शब्देन यावत् विधानं वा निषेधो न क्रियते तावत् धर्माधर्मयोः उत्पत्तिनं भवति । अर्थात् केवलमपशब्दप्रयोगेणव अधर्मोत्पत्तिर्भवति नहि अपशब्दज्ञानेन । एवं स्वीकर्तव्यम् - विषयेऽस्मिन् अपरमापि समाधानं प्रस्तूयते भाष्यकारेण ''अथ वा कूपखानकवदेतद्भविष्यति'' तद्यथा कोऽपि कूपखानकः कूपं खनन् पांसुपंकादिभिः लिप्तो भवति परमप्सु संजातासु तेनैव शुद्धजलेन क्षालितो भविष्यति सहैव धर्मलाभोऽपि भवति एवमिहापि साधुशब्दप्रयोगेण यत् पुण्यं भवति तेनैव अपशब्दज्ञानजन्यदोषाणां हानिः अपि भवति । एवञ्च भूयसा अभ्युदयेन योगो भवति । 'एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाऽभ्युदेन योगो भविष्यति ।'[18]

वैदिकाख्यानेनापि ज्ञायते यत् साधुशब्दप्रयोग नियमः यज्ञाद्यनुष्ठाने एव वर्तते नहि अन्यत्र । 'याज्ञे कर्मणि स नियमः, अन्यत्रानियमः ।'[19] अतः सामान्यव्यवहारे अपशब्दप्रयोगः ज्ञानम् वा अधर्मस्य जनकः न भविष्यति । एतदर्थं 'यर्वाणः', 'तर्वाणः' इति प्रयोगं कुर्वन्तः ऋषयः अधर्मभागिनो न बभूवुः । अतः केवलं ज्ञाने एव धर्मः अधिकाधिकं शुद्धशब्दानां

ज्ञानं भवति तथैव अधिकाधिको धर्मो भवति । अयमेव पक्षः स्वीकर्तव्यः । वस्तुतस्तु ज्ञानेऽपि धर्मः प्रयोगेऽपि धर्मः परं तत्रायं निष्कर्षो ध्यातव्यः ऐहलौकिकः पारलौकिकश्च धर्मः संसाध्यते शाब्दिकैः । तत्र ज्ञाने आमुष्मिकः (पारलौकिकः) धर्मः, प्रयोगे च ऐहलौकिकः पारलौकिकश्चेति द्वयोः अपि धर्मसाधनत्वं भवति । तेनैव अभ्युदयः संसाध्यत । इति शम् ।।

**सन्दर्भाः**


1. महाभारतम् - स्वर्गारोहणपर्व 5.62
2. चाणक्यसूत्रम् 1/2
3. वाक्यपदीयं ब्रह्मकाण्डम् 1
4. शतपथब्राह्मणम् 14/4/1/23
5. मैत्रायणी उपनिषद्, प्रपाठक 6, कण्डिका 22
6. सुभाषितरत्नभाण्डागारः
7. तर्कसङ्ग्रहः
8. पाणिनीयशिक्षा
9. परमलघुमञ्जुषा
10. लघुसिद्धान्तकौमुदी संज्ञाप्रकरणम्
11. दुष्टः शब्दः, पस्पशाह्निके व्याकरणमहाभाष्यम्
12. का. वा. पृ. 110 व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
13. का. वा. पृ. 111, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
14. ''प्रयोगे सर्वलोकस्य'' का. वा. पृ. 111, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
15. पृ. 112, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
16. का. वा. पृ. 113, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
17. पृ. 115, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
18. पृ. 117, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)
19. पृ. 118, व्याकरणमहाभाष्यम्, चौखम्बा कृष्णदास अकादमी, वाराणसी (प्रो. जयशंकरलाल त्रिपाठी)



**संविदाध्यापकः व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**


❖❖❖

# णकारानुबन्धत्वविचारः

✍डॉ. नवीनकुमारमिश्रः

**णकारानुबन्धद्वयसम्बद्धं साङ्गोपाङ्गविवेचनं शास्त्रीयविचारसरण्याऽत्र निबन्धे प्रतिपादितम् । तत्र सन्देहपदार्थविवेचनम्, शक्तौ तात्पर्य्ये वा कुत्र सन्देहः? सति च तस्य का नो हानिः? 'अजर्घा' इत्यस्य ससूत्रसिद्धिः, भाष्यानुसारिविचारः, परिभाषाज्ञापनप्रकारः, कपिञ्जलाधिकरणन्यायसञ्चारः, 'यथोत्तरं मुनीनाम्प्रामाण्यमि' त्यस्य सिद्धार्थानुवादकत्वञ्च विशेषतोऽवलोकनीयतां धत्ते । (स.)**

माहेश्वरसूत्रेषु सर्वेऽनुबन्धवर्णाः सकृदुच्चारिताः किन्तु णकारानुबन्धः द्विधा उच्चारितः। तत्र अइउण्, लण् सूत्रयोरुभयत्र तदुच्चारणस्य किं वा प्रयोजनम ? एकेन णकारेणैव विधिसंभवे णकारद्वयोपादानं व्यर्थं स्यादिति चेन्न । तत्र महाभाष्ये पतञ्जलिराह-

**असन्दिग्धं पराभावात् सवर्णेऽण् तपरं ह्युर्र्ऋत् ।**
**य्वोरन्यत्र परेणेण् स्याद्व्याख्यानाच्च द्विरुक्तितः ॥ म.भा.**

तथाहि अणिण्ग्रहणेषु प्रत्यासत्तिन्यायेन पूर्वेण वा स्युः भूयसामनुग्रहणाय परेणैवेति सन्देहः । सन्देहो नाम एकधर्मिकविरुद्धकोटिकधर्मद्वयावगाहि ज्ञानम् । यथा-स्थाणुर्वा पुरुषो वा। एवमेव प्रकृतावसरे अण्पदमकारादिणान्तसमुदायघटकवर्णत्रयबोधतात्पर्येणोच्चारितम् अथवा तादृश - वर्णचतुर्दशबोधतात्पर्येणोच्चारितमिति तात्पर्यरूप संदेहः । सन्देहे निश्चयात्मकः शाब्दबोधो न स्यात् । यथा घटः घटत्वावच्छिन्न शक्तिमान् इति ज्ञाते सति घटपदे इतरघटनिरूपिता शक्तिः उत तद्घटनिरूपिता शक्तिः इति सन्देहो न भवति तथैव आदिरन्त्येन इत्यनेन 'अ' तः 'ण' पर्यन्तं समस्तवर्णेषु अण्पदं शक्तमिति बोध जाते सति अण्पदम् अ, इ, उ इत्यस्य बोधकम् अथवा अ, इ, उ, ऋ लृ, ए, ओ, ऐ, औ, ह्, य्, व्, र्, ल् इत्यस्य बोधकम् इति सन्देहो न भवितुमर्हति। एवमेव तात्पर्येऽपि तावत् सन्देहो मन्तुं न शक्यते । यतो हि 'मदीयः पुत्रो धनवान् भवतु पण्डितश्च भवतु' इत्यत्र एक एव पुत्रः इच्छाद्वयस्य विषयो भवति तथैव एकस्मिन्नेवाणि इच्छाद्वयं भवितुमर्हति ।

वस्तुतस्तु तात्पर्य एव सन्देहः, ऋषीणाम् इच्छाया अप्रतिहतत्वात् । एकेनाण्पदेन ऋषिणोच्चारितेन सकृदुच्चरितन्यायात् बोधद्वयं भवितुं नार्हति । अर्थात् आचार्ये समवायसम्बन्धेन विद्यमानस्य तात्पर्यद्वयस्य विषयः अण्पदं न स्यात् येनाष्टाध्यायीसूत्रस्थं अण्पदं दृष्ट्वा सन्देहो भवतु । यदाचार्येण अण्पदं एतत्तात्पर्येण उत तत्तात्पर्येण उच्चारितमिति

तत्र शाब्दबोधे तात्पर्यनिश्चयस्य हेतुत्वात् तात्पर्यनिर्णयः आवश्यकः । तदर्थं व्याख्यानद्वारा तात्पर्यं निर्णीय सन्देहोऽपाकरणीयो भवति । अण्ग्रहणानि च पञ्च -

ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/110, अणुदित्सवर्णस्य चाप्रत्ययः 1/1/69, उरण् रपरः 1/1/51, केऽणः 7/4/13 अणोऽप्रगृह्यस्यानुनासिकः, 8/4/57 इत्यादिशास्त्रप्रवृत्तेरसंभवः संदेहात् । तत्र च व्याख्यानाद्विशेषप्रतिपत्तेः परिहारः । अणुदित्सवर्णस्य चाप्रत्ययः सूत्रमिदं परित्यज्य सर्वत्र पूर्वेण अइउण्घटकणकारेण प्रत्याहारः ग्राह्यः । यदि ढ्रलोपादिषु परेणाण् स्यात्तर्हि अणः स्थाने णकार सूत्रेऽजित्येव ब्रूयात् । अणुदित्सूत्रे अण् परेणैव गृह्यते ऋत उत् 6/1/111 इत्यत्र ऋति तपरकरणात् । तद्धि तपरकरणं दीर्घऋकारस्य वारणाय क्रियते । यथा पितृशब्दस्य षष्ठ्यकवचने पितुरिति रूपं तथा कृशब्दस्य षष्ठ्यैकवचने कुरिति रूपं न सम्पद्यते किन्तु क्र इत्येव । यदि अणुदित्सूत्रेऽपि पूर्वणकारेणैमाण् प्रत्याहारः सिद्ध्येत तर्हि ऋकारस्याण्त्वाभावात्सवर्णग्राहकत्वाप्राप्त्य स्वत एव दीर्घऋकारस्य ग्रहणाप्राप्तौ तद्वारणार्थं ऋत उत् 6/1/111 इत्यत्र ऋति तपरकरणं व्यर्थं स्यात् ।

अयं णकारः द्विरनुबध्यते पूर्वश्च परश्च । ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/110-ढरेफौ लोपयतीति तथा, तस्मिन्वर्णेऽर्थाद् ढकारे रेफात्मके परे पूर्वस्याणो दीर्घः स्यात् । पूनारमते, हरीरम्यः, शम्भू राजते अणः किम् - तृढः, वृढः इत्यादौ तृहु हिंसायाम्, वृहु उद्यमने पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घः । अजर्घाः, अपास्पाः इत्यादीनां सिद्धिः । ढलोपेऽपि न दीर्घः अणि प्रत्याहारे ऋकारग्रहणाभावात् । प्रकृतसूत्रे सनदेहावसर एव नास्ति असन्दिग्धं (भा.वा.) पूर्वेण न परेण पराभावात् । (भा.वा.) नहि ढ्रलोपे परेऽणः सन्ति । आतृढः, आवृढः इत्यादौ दीर्घाभावात् । एवम् तर्हि सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादण् ग्रहणमनर्थकम् । ढ्रलोपे पूर्वस्य दीर्घोऽच इत्येव पठेत् । उत इदमप्यनावश्यकमजादीनां स्थाने ऊकालोऽझ्- स्वदीर्घप्लुतः 1/2/27 इति शास्त्रस्वभावादेव ह्रस्वदीर्घप्लुतस्वरादीनां विधानात् । तत्र च -

**अजर्घाः**

**गृधेर्यलोपे लङि सेरिलोपे हल्ङ्यादिलोपे रपरे गुणे च ।**
**भष्भावजश्त्वे च रुरेफरत्वे ढ्रलोपदीर्घे च भवेदजर्घाः॥**

**गृधु अभिकाङ्क्षायाम्**

| | | |
|---|---|---|
| गृध + य | यङ्प्रत्ययः | धातोरेकाचो 3/1/22 |
| गृध् | यङ्ः लुक् | यङोऽचि च 2/4/74 |
| गृध् धातु | धातुसञ्ज्ञा | सनाद्यन्त धातवः 3/1/32 |
| गृध + गृध् | द्वित्वम् | सन्यङोः 6/1/9 |
| ग + गृध् | अत्वम् | उरत् 7/4/66 |
| गर् + गृध | रपरत्वम् | उरण् रपरः 1/1/51 |

| | | |
|---|---|---|
| गर्गृध् | रुगागमः | रुग्रिकौ च 7/4/91 |
| अ गर्गृध + सिप् | अडागमः | लङ्लङ्लृङ् 6/4/71 |
| अ जर्गृध् + स् | इकारलोपः | इतश्च 3/4/100 |
| अ जर्गृध + स् | चुत्वम् | कुहोश्चुः 7/4/62 |
| अ जर्गर्ध + स् | गुणः | गुणो यङ्लुकोः 7/4/82 |
| अ जर्घर्ध् + स् | भष्भावः | एकाचो बशो भष् 8/2/37 |
| अ जर्घर्द् + स् | जश्त्वम् | झलां जशोऽन्ते 8/2/29 |
| अजर्घर् र् + स् | रुत्वम् | दश्च 8/2/75 |
| अजर्घर् र् | सलोप | हङ्याब्भ्यो दीर्घात् 6/1/68 |
| अजर्घ र् | रलोपः | रो रि 8/3/14 |
| अजर्घा र् | दीर्घः | ढ्रलोपे पूर्वस्य दीर्घोऽणः 6/3/111 |
| अजर्घाः | विसर्गः | खरवसानयोर्विसर्जनीयः 8/3/15 इति सिद्धम् । |

केऽणः 7/4/13 के परेऽणो अङ्गस्य ह्रस्वः स्यात् । यथा ज्ञका, कुमारिका, किशोरिका । अण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः? तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । गोका, नौका, उपानत्का, धूष्काः, गीष्काः इत्यादौ के परेऽपि न ह्रस्वः । राका, धाका इत्यत्र बाहुल्कात् न ह्रस्वः अणि प्रत्याहारे ओकारग्रहणाभावात् । सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादण्ग्रहणमनर्थकम् । सूत्रे केऽच इत्येव वदेत् ।

अणोऽप्रगृह्यस्यानुनासिकः, 8/4/57 अप्रगह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । नृँरू पाहि, नृरूपाहि दधिँ, दधि मधुँ, मधु कुमारीँ, कुमारी । अत्रण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः । तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । कर्तृ, हर्तृ इत्यादौ अप्रगृह्यसंज्ञके अणः परे अण्प्रत्याहारे ऋकार-ग्रहणाभावसामर्थ्यात् पूर्वेण न परेण अण्ग्राह्यः। यदि परेण स्यादण्ग्रहणमनर्थकम् । सूत्रेऽचोऽप्रगृह्यस्यानुनासिकः इति पाठः स्यात् । तदपि न पठेत् प्रकृत्या अचस्स्थानिक-ह्रस्वादिविधिः ।

उरण् रपरः 1/1/51 ऋकारस्य स्थाने योऽण् सः रपरः सन्नेव प्रवर्त्तते । आन्तरतम्यात् कृष्णर्द्धि, तवल्कारः, कर्ता, हर्ता, किरति, गिरति, द्वैमातुरः उरदिति किम् ? खेयम्, गेयम् । प्रकृताण्विषये सन्देह उत्पद्यते यद् पूर्वणकारेण उत परणकारेण पाठः। तर्ह्यत्र असन्दिग्धं पूर्वेण न परेण पराभावात् । न हि के परेऽणः सन्ति । कर्त्रर्थम्, हर्त्रर्थमिति, सौधातकिः इत्यादौ रपरत्वाभावसामर्थ्यात् पूर्वेण न परेण अण्ग्राह्यः। यदि परेण स्यादण्ग्रहणमनर्थकम् । यदि कर्त्रर्थम् इत्यादौ रपत्वे क्रियते चेदपि तत्र रेफद्वयश्रवणं स्यात् । तस्य रफेस्य हलो समां यमि लोपः इति सूत्रेणापि लोपासंभवः विकल्पबलात् । एवं हि रो

रि इत्यपि सूत्रं न प्रवर्तते अपदानत्वात् पदान्तविषयैव तस्य प्रवृत्तिः। जगृधोर्लङि् रेफस्य लोपो न स्यात् । इह तर्हि मातृणाम्, पितणामित्यादौ न इत्वविधिः ऋकार सत्वेऽपि प्रातिपदिकत्वात् । ऋत इद्धातोः 7/1/100 ऋदन्तस्य धातोरङ्गस्य इत्स्यात् तरति । प्रकृतसूत्रे धातुर्ग्रहणात् आचार्यप्रवृत्तिर्ज्ञापयति कर्त्रर्थम् इत्यादौ इको यणचि 6/1/77 इति सूत्रेण यणि कृते अणप्रत्याहारे रेफाभावे नहि रेफरस्य परे रपरः। तर्हि चिकीर्षति, जिहीर्षतीत्यादावपि न प्राप्नोति उपाधायाश्च 7/1/101 इति सूत्रेण इत्वविधानमिति । एवम् तर्हि । सामर्थ्यात् पूर्वेण न परेण । यदि परेण स्यादण्ग्रहणमनर्थकम् । सूत्रे उरज्रपर इत्येव वदेत् ।

ननु परेणापि ग्रहणे उर् इत्यनेन स्थानिना दीर्घे सत्यपि ऋदित्यनेन भाव्यमानपरिभाषाप्रभावादृकारस्य स्थानित्वमादेशत्वं वाऽप्रसक्तमित्यनर्थकम् ? उच्यते । असति तपरकरणे भाव्यमानस्यैवासिद्धिः तथाहि अपूर्वनिष्पत्तेः प्रत्यासत्तिन्यायेन बाधितस्य प्रतिप्रसवे च तस्य लाघवं भवतीति। अचीकृतत्, अवीवृतत् इत्यादौ वर्णस्य विनाशे प्राप्ते स्वरूपमेवावस्थितमभ्यनुज्ञायते । सम्भवति च स्वरूपाभ्यनुज्ञानं सवर्णग्रहणे सति स्वरूपाभ्यामनुज्ञानार्थमेव सवर्णग्रहणं स्यात् । सति तु तपरकरणे सवर्णग्रहणाभावात् स्वरूपाभ्यनुज्ञानासम्भवादपूर्वविधिरेव सम्पद्यते । भाव्यमानपरिभाषासिद्धये कर्त्तव्यं तपरकरणमिति ज्ञापकमेव ।

हकारादिषु ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् वा. अत्र अनयोः सवर्णसंज्ञायाः उपसंख्यानात् ऋकारः लृकारमपि गृह्णाति, ततश्च उरण् रपरः इति लृकारस्याप्यण् रपरः स्यात्, लपरश्चेष्यते, तस्मादनुनासिकः प्रतिज्ञायते ऋकारस्याण् रपरः, लृकारस्य तु लपरः इति तवल्कारः पुनः अनुबन्धोऽपि पिनर्णकारः एवानुबध्यते

एवम्हि अणिण्ग्रहणेषु संदेहोत्पद्यते ज्ञापयितुं भवत्येषा परिभाषा व्याक्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् । परिभा.1

अणुदित्सवर्णस्य चाप्रत्ययः 1/1/69 अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रण् परेण णकारेण् ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् इति वार्त्तिकात् ऋकारस्य त्रिंशद्भेदाः भवन्ति । प्रत्ययं विना । आद्गुणः, अस्य च्वौ, यस्येति च, चुटू .लशक्वतद्धिते इत्यादिषु सवर्णग्राहकं भवति । अत्रण्विषये तु असन्दिग्धं परेण न पूर्वेण सवर्णेऽण् तपरं ह्युर्ऋत् । भा. वा. यदयं - उर्ऋत् 7/4/7 इत्यृकारे तपरकरणं तज्ज्ञापयत्याचार्यः परेऽण् न पूर्वेणाणः सन्ति ।

इण्ग्रहणेषु सन्देहः । असन्दिग्धं परेण न पूर्वेण य्वोरन्यत्र परेणेण् स्यात् । भा.वा. अचि श्नुधातुभ्रुवां य्वोरियङ्व्वौ 6/4/77 इत्यत्र य्वोरिति निर्देशात् यत्रेच्छति पूर्वेण संमृद्य ग्रहणे ग्रहणं तत्र करोति य्वोरिति । कथं य्वोरिति गुरुपाठः ज्ञापकमिति प्रश्ने ? विभक्तिनिर्देशे चार्धचतस्रः मात्राः प्रत्याहारग्रहणे पुनस्तिस्रो मात्रः । व्याख्यानपरिभाषायां ज्ञापयति आचार्यः । अतः व्याख्यानाच्च द्विरुक्तितः। भा.वा.

ननु यथा कपिञ्जलानालभेतेति वाक्ये बहुवचनेन सर्वेषां कपिञ्जला-नामालम्भनासम्भवात् त्रयाणामेव कपिञ्जलानां पूर्वोपस्थिततत्वात् ग्रहणेन वाक्यार्थरक्षा क्रियते तथैव पूर्वणकारस्य पूर्वोपस्थिकत्वेन ग्रहणमस्तु, इत्थमत्र कपिञ्जलाधिकरणन्यायेन प्रथमोपस्थितेन पूर्वणकारेणैव ग्रहणे सिद्धे न सन्देहः परिभाषा अप्यनुत्थापिता इति चेन्न निजां त्रयाणाम् 7/4/75 इत्यत्र त्रयाणामिति पदकथनेन व्याकरणे सकृदुच्चारणस्य सकृद्ग्रहणाच्छाब्दबोधः इति व्याकरणनयः । शाब्दबोधे तात्पर्यनिश्चयः हेतुः। किन्तु तात्पर्ये संदेहे शाब्दबोधोऽपि संदिग्धाः ।

ननुबन्धद्वयोच्चारणं कथं व्याख्यानपरिभाषायां ज्ञापकं भवति ? तदुत्तरानुबन्धान्तरोच्चा-रणेनाऽपि सिद्धे स्वांशे चारितार्थ्याभावात् । न हि स्वांशे चारितार्थ्यमन्तरा ज्ञापकं संभवति । विपरीतार्थस्यापि ज्ञापनापत्तेः । नापीयमन्यथसिद्धेन केनचित्प्रयोजनवती । ज्ञापकाश्रयणेनैव तत्र तत्र संदेहनिवारणसंभवात् इयमनुपादेयैव परिभाषा । विपरीतार्थकल्पनानिरासायैव स्वांशे चारितार्थ्यस्यापेक्षितत्त्वेन यत्र तादृशार्थकल्पनाप्रसक्तिस्तत्रैव तदपेक्षा नान्यत्र । सा च प्रसक्तिर्यत्र सर्वथाऽसिद्धस्यैवार्थस्य शास्त्रेण बोधनं तत्रैव । स्वांशे चारितार्थ्य-मन्तराऽपूर्वार्थकल्पनायां विनिगमनाविरहादर्थन्तरकल्पनापि कुतो नेति । प्रकारान्तरेण सिद्धस्यार्थबोधने न विपरीतार्थकल्पनाप्रसक्तिः । क्लृप्तस्यार्थकल्पनापेक्षया सर्वथाऽसिद्ध-स्यार्थकल्पनायां प्रतिपत्तिगौरवस्य सत्त्वेन तादृशशङ्कानुत्थापनेन । एवञ्चात्र व्याख्यानतो-विशेषप्रतिपत्तेर्लोकसिद्धतया तमेवार्थमनुबन्धद्वयेनोच्चारणेन महेश्वरो नात्र स्वांशे चारितार्थ्यम-पेक्षितम् । अत एव उभयोर्ज्ञानसामान्यार्थकत्वाऽविशेऽप्यभिधानस्वाभाव्यादपूर्वार्थबोधने-ज्ञाधातोस्सिद्धस्यार्थस्यावगमे बुधधातोश्च वृत्तिः ।

एवं तर्हि सिद्धे सति यदप्रत्ययः इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भाव्यमानेनेत्युणादिसूत्रस्थभाष्ये ज्ञापयति अस्य यथाश्रुतार्थपरत्वमेव । अत्यल्पमिदमुच्यतेऽप्रत्यय इति, अप्रत्ययादेशटितिकिन्मित इति वक्तव्यम् । इत्युपक्रमभाष्येण तत्रत्यप्रत्ययपदस् प्रत्ययमात्रबोधकतया एव लाभेनागमादेशयोस्सवर्णग्रहणनिषेधस्य सूत्रतोऽलाभेन प्राचीनपठित-भाव्यमानेनेत्यादिपरिभाषाबोधितस्य तदंशस्याप्रत्यय इत्यनेनैकदेशानुमत्या बोधनात् । तत्रापि न स्वांशे चारितार्थ्यापेक्षा । तस्याप्यर्थस्यांशतस्सूत्रक्षरैस्सिद्धतया विपरीतार्थकल्पनाया असिद्धिः । एतेन लण्सूत्रस्थभाष्यज्ञापयतीत्यस्य बोधयतीत्यर्थकरणप्रयासो मूलकृतो विफल एवेति हरिमतमपास्तम् । अपूर्वार्थ नानेन बोध्यते तद्योतनाय आवश्यकम् । अणादिपदेषु संदेहनिर्वर्त्तकं पदार्थोक्तिरूपं व्याख्यानमेव शरणमिति ।

वैयाकरणसिद्धान्ते यथोत्तरं मुनीनां प्रामाण्यम् इत्येतद् वचनमेतत्परिभाषासिद्ध्यर्थानु-वादकमेव । यथोत्तरं मुनीनां प्रामाण्यमित्यस्योत्तरोत्तरमुन्यभिप्रेतेऽर्थे पूर्वपूर्वमुनीनां तात्पर्य-मित्येवार्थः, न तु पूर्वमुनीनामाप्रामाण्यमिति, अन्यथैतद्दृष्टान्तेन सम्पूर्णसूत्रस्याप्रामाण्यापत्तिः । यथोत्तरमित्यत्र प्रमाणन्तु धिण्विकृण्व्यो र च इति सूत्रेण वलोपविधानेनैव न धातुलोपार्ध-

धातुके 1/1/04 एत्यनेन गुणनिषेधात् धिनोतीत्यस्यसिद्धावकारविधानमेव । ज्ञापिते च भाष्यकारेण न धातुलोपार्धधातुके 1/1/ इत्यस्य प्रत्याख्यानात् गुणाभावाय चरितार्थम् । तथाहि लण्सूत्रभाष्यव्याख्यानेन अणुदित्सवर्णस्येतत्परिहाराय पूर्वेणाणग्रहणम् परेणेण् ग्रहणमिति बोध्यम्।

णकारानुबन्धद्वयं शास्त्रे सन्देहकारकम्, एकं विना तु पूर्वेण सर्वत्रण् ग्रहणं तथा । ऋतेऽणुदित्सवर्णस्य केऽणादौ तु सर्वदा, दीर्घादिविधानार्थं शिवसूत्रे प्रयोजितम् ।। इति दिक् ।

**सन्दर्भग्रन्थसूची-**


1. लण्सूत्रभाष्यम् पृ.सं. 143
2. अष्टाध्यायी (पं.ईश्वरचन्द्रः
3. वैयाकरणसिद्धान्तदिग्दर्शनम् -प्रो. बोधकुमारझाः
4. लण्सूत्रकाशिका
5. लण्सूत्रपदमञ्जरी
6. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषा
7. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषायाः सुबोधिनीटीका
8. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषायाः दुर्गाटीका
9. परिभाषेन्दुशेखरस्य प्रथमव्याख्यानतो---परिभाषायाः नागेशगूढार्थदीपिका
10. वैयाकरणसिद्धान्तकौमुदी ढ्रलोपादिसूत्रप्रसङ्गः
11. लौकिकन्यायकोशः-कपिञ्जलाधिकरणन्यायः
12. पाणिनीयव्याकरणोदाहरणकोशः-अजर्घाः सिद्धिविचारः
13. वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमाटीकायां ढ्रलोपादिसूत्रप्रसङ्गः
14. धातुरूपनन्दिनी-जनार्दन हेगडे
15. वाचस्पत्यम् - एँण्ड्रायड मोबाईल अप्लीकेशन - प्रो.मदनमोहनझाः



**संविदाध्यापकः**
**व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**


❖❖❖

# महाभाष्यपस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम्

✍श्रीसुरेशचेमटे

**निबन्धेऽस्मिन् भाषा, भाषाविज्ञानम्, शब्दः, अर्थस्वरूपम्, अर्थश्चतुष्प्रकारकः, अर्थज्ञानस्य महत्त्वम्, भाषाभाषिसङ्केतः, अर्थोपादानम्, क्रिया, अर्थज्ञानप्रक्रिया, पदम्, विशिष्टोच्चारणेनार्थभेदः, उपसर्गेणार्थसङ्कोचः, अर्थज्ञानस्य साधनानि, शब्दार्थसम्बन्धः इत्येतानि सविवरणानि उपशीर्षकाणि प्रकल्प्यान्त निष्कर्षभूत उपसंहारो निबद्धः। (स०)**

**भाषा**

भाष व्यक्तायां वाचि इत्यस्मात् धातोः गुरोश्च हलः इति सूत्रेण अप्रत्यये कृते भाषा इति पदं निष्पन्नं भवति । भाषाशब्दस्य आङ्गलभाषायां Language इति पदं समानार्थकं भवति । भाषा विचारविनिमयाय भवति । भाषा विविधवाक्यानां समूहः । वाक्यं विविधपदयुक्तं भवति संज्ञा-विशेषण-क्रिया-सर्वनामेत्यादिरूपम् । विचाराः वाक्येन वाक्यैः वा प्रस्तूयते। वाक्यरूपनिबद्धा भवति भाषा ।

**भाषाविज्ञानम्**

**ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूतिमत् ।**
**ध्वनि-वाक्य-पद-ज्ञानं-भाषाविज्ञानमिष्यते ॥ (कपिलस्य)**

यद्यपि भाषाविज्ञानस्य भाषाशास्त्रस्य च वर्तमानं रूपम् आधुनिकमेव । विद्यारूपेण वा नास्य विज्ञानस्य पुरा नामोल्लेखः प्राप्यते । तथापि भारतवर्षे वैदिककालाद् आरभ्य भाषाविषयकं चिन्तनं विवेचनं विश्लेषणं चोपलभ्यते । अस्मिन् शोधपत्रे महाभाष्य पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् समासतः प्रस्तूयते । पतञ्जलिरचितमहाभाष्ये प्राचीनभाषाविज्ञानस्य स्वरूपमवलोक्यत एव । तात्कालिकम् भाषाविज्ञानम् व्याकरणादिभिः मिश्रितमासीत् । ध्वनिविज्ञानं, पदविज्ञानं, वाक्यविज्ञानं, अर्थविज्ञानमित्यादिविषयाणामध्ययनं भाषाविज्ञानस्य क्षेत्रं समागच्छति ।

**शब्दः**

शब्दो ध्वनिरूपः क्षणिकोऽनित्यश्चेति बौद्धाः । शब्दो पौद्गलिकः कार्यो द्रव्यरूपो वर्णात्मकोऽनित्यश्चेति जैनाः । शब्दतन्मात्रैवाकाशः अतः आकाशवच्छब्दोऽपि व्यापकः । ध्वन्यात्मको वर्णरूपः शब्द इति साङ्ख्ययोगौ । वर्णा एव तु शब्द इति भगवानुपवर्षः । शब्द आकाशमात्रस्य गुण इति नैयायिकाः । वर्णा एव तु शब्दः, वाय्वादीनामपि शब्दो गुणः-

अद्वैतवेदान्तिनः । स्फोट एव शब्द इति वैयाकरणाः । शब्दश्रवणादर्थप्रतीतिर्भवति । शब्दार्थज्ञानं शक्तिमाध्यमेन भवति । तस्याः शक्तेः संस्थापको भवति भाषाभाषिजनः । प्रोक्तं पतञ्जलिना शब्दविषये - शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र नियतविषया दृश्यन्ते । अपि च - येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तस्मात् ध्वनिः शब्दः । अपि च - एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः । कथम्, भेर्याघातवत् । स्फोटस्तावानेव भवति । ध्वनिकृता वृद्धिः । अपि च - श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः ।

**अर्थस्वरूपम्**

ऋच्छन्तीन्द्रियाणि यं सोऽर्थः अर्थादिन्द्रियग्राह्यं सर्वमपि विषयजातमर्थः । प्रायः यावन्तः अर्थास्तावन्तः शब्दाः इति शब्दार्थयोः स्थितिर्वर्तते जगति । शब्दो विनाऽर्थं न तिष्ठति अर्थश्च शब्दं विनाऽपि तिष्ठति । यथा - चाक्षुषप्रत्यक्षे अर्थो भवति किन्तु शब्दो नास्ति । अर्थः क्वचन साक्षाद् नेत्रादिभिश्च गृह्यते । शब्दार्थसृष्ट्यर्ज्ञानजनकं बुद्ध्यादिसहितं मन एवास्ति । स्वरूपतः कश्चिच्छब्दोऽर्थस्याभिधायको न भवति । अर्थे प्रणिहितमेव चक्षुर्यथा चाक्षुषमर्थं जनयति तथा गृहोतः शब्दोऽपि अभ्यासादिना जातसंस्कार एवार्थं बोधयति। अश्रुतपूर्वैः अगृहीतसम्बन्धैश्च शब्दैरर्थाऽवगतिर्नावलोक्यते संसारे । अर्थस्वरूपविषये प्रोक्तं पतञ्जलिना - शब्दश्च शब्दाद् बहिर्भूतः । अर्थोऽबहिर्भूतः । अस्त्यन्यद् रूपात् स्वं शब्दस्येति । किं पुनस्तत् अर्थः । शब्देनोच्चारितेनार्थो गम्यते । गामानय दध्यशानेति, अर्थ आनीयते अर्थश्च भुज्यते । अपि च - कथं पुनर्ज्ञायते - सिद्धः शब्दोऽर्थः सम्बन्धश्चेति । लोकतः । यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुज्यते ।

**अर्थश्चतुष्प्रकारकः**

जातिः (यथा-वृक्षादयः) गुणः (यथा - मधुरादयः) क्रिया (यथा - पठत्यादयः) यदृच्छा (यदृच्छानामसु नामकर्तुः मनःस्थितेः योगदानं भवति । ) (यथा - डित्थादयः) प्रोक्तं पतञ्जलिना - चतुष्टयी शब्दानां प्रवृत्तिः, जातिशब्दाः, गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चतुर्धा ।

**अर्थज्ञानस्य महत्त्वम्**

यथा अग्निं विना शुष्केन्धनमपि न प्रज्वलति, तथैव अर्थज्ञानं विनैव यदि शब्दोच्चारणं क्रियते तर्हि तत् कदापि अभीप्सितं कमपि अर्थं न प्रकाशयति । यः अर्थावबोधं विना वेदाध्ययनं करोति, स केवलं भारं वहति । प्रोक्तं पतञ्जलिना -

**यदधीतमविज्ञातं निगदेनैव शब्द्यते ।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥**

**भाषाभाषिसङ्केतः**

यथा - वृद्धिपदस्याकारैकारौकारेषु पाणिनिसङ्केतः भवति । यः सम्प्रदायः शास्त्रं वा यं शब्दं यस्मिन्नर्थे स्वीकुरुते स भवति शब्दस्य अर्थः । भाषाविज्ञानदृष्ट्या एतत् सुस्पष्टं यद् वाच्यवाचकविनिश्चयः तयोः सम्बन्धनिर्णयश्च भाषाभाषिजनानां व्यवहाराधीन एव । अयं पशुः ''अश्व'' पदवाच्यः, अयं च ''गर्दभ'' पदव्यवहार्यः (अर्थात् केन शब्देन कस्यार्थस्य सम्बन्धो वर्तते), एवमर्थज्ञानं भवति गुरु-मातृ-पितृ-प्रभृतिपुरुषादिवचनात् । जातादीनां बालादीनां नामकरणं कृत्वा जनाः तत्तन्नाम्ना तांस्तान् आवाहयन्ति अर्थादअर्थाऽवगतये शब्दः प्रयुज्यते (अर्थगत्यर्थः शब्दप्रयोगः ) । प्रत्यर्थमभिधादिशब्दः कल्पितो वर्तते अर्थात् यः शब्दो यत्रार्थे लोकेन स्वीकृतः स एव तस्य शब्दस्यार्थो विद्यते । कस्याऽर्थस्याभिव्यक्तये कः शब्दः प्रयोक्तव्यः इत्येषः निर्णयः भाषायाः प्रयोक्तुरेवाधोनो भवति । केन वा शब्देन कोऽथाऽभिधेयः इति विनिश्चयोऽपि कश्चनोऽपौरुषेयो नास्ति । भाषायाः प्रवक्ता प्रतिवक्ता चैको हि शब्दस्य तदर्थस्य तयाश्चाभिसम्बन्धस्य भवति संस्थापकः । प्रोक्तं पतञ्जलिना-याज्ञिकाः पठन्ति-दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्, तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्त तद्धितम् इति ।

**अर्थोपादानम्**

शब्दो व्यवहारे अर्थबोधनाय कारणं भवति । श्रोता अर्थजातं दृष्ट्वा अनुभूय वा शब्दमुच्चारयति । व्यवहारे अर्थोपादनं द्विधा क्रियते सङकेतैः शब्दैश्च । सङ्केताः द्विधा । क्रियारूपाः उल्लिखिताश्च । हस्तसञ्चालनेन आगमनप्रत्यागमनाद्यर्थमुपादीयते, लिप्यादिना सर्वोऽप्यर्थ उपादीयते । इङ्गितेन चेष्टितेन निमिषितेन महता वा शब्दप्रबन्धेन आचार्याणामभिप्रायोऽभिगम्यत । प्रोक्तञ्च -

**आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।**
**नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ॥**

लोके श्रोत्रेन्द्रियेण ग्राह्यऽर्थे शब्दशब्दस्य प्रयोगो भवति । ततोऽपि अर्थोपादनं भवति अर्थात्शब्देनोच्चारिते अर्थो गम्यते । प्रोक्तं पतञ्जलिना - अर्थगत्यर्थः शब्दपयोगः ।

**क्रिया**

क्रियायाः प्रत्यक्षं भवति लोकानुभवबलात् । यथा - पश्य मृगो धाावति इत्यादिलोकव्यवहारानुरोधेन एकैकक्षणभाविन्या अवयवभूतायास्तु प्रत्यक्षं भवति । कुत्रचिन्न भवति - क्रियानामत्यन्तापरिदृष्टा शक्या पिण्डीभूता निदर्शयितम् । यथा - गर्भो निर्लुठितः इति । क्रियापदाभावेऽपि अर्थज्ञानं भवति । कुत्र? लघुषु वाक्येषु, प्रश्नोत्तरवचनेष् वा क्रियापदाभावेऽपि वाक्यार्थज्ञानं जायते । यथा - कुतो भवान् इति प्रश्ने पाटलिपुत्रादित्युत्तरे क्रियापदाभावेऽपि वाक्यार्थावगतिर्भवति । अत्र प्रमाणं पस्पशाह्निकम् ।

**अर्थज्ञानप्रक्रिया**

पूर्वं वक्तार्थं परिकल्प्य शब्द प्रवर्तते । श्रोता तु पूर्वं शब्दं सश्रुत्याऽर्थं निर्धारयति । अत एव कतिपये आचार्याः शब्दनिमित्तकमर्थं मन्वते, कतिपये चाचार्याः अर्थनिमिकं शब्दं स्वीकुर्वते । अत्र स्वमतं प्रोक्तं पतञ्जलिना - अर्थनिमित्तकं भवति शब्दं न तु शब्दनिमित्तकोऽर्थ इति । अर्थाद् अर्थाऽवगतये शब्दप्रयोगं मनुते पतञ्जलिः ।

**पदम्**

पद्यते गम्यतेऽर्थोऽनेनेति पदम् । विभक्तिसंवलितं विभक्त्यन्तं वा पदसञ्ज्ञकं भवति । प्रकृतिप्रत्ययद्वयस्य पदसञ्ज्ञा विधीयते । प्रत्येकस्य पदस्य कश्चन प्रतीकात्मकः अर्थ भवति। प्रोक्तं पतञ्जलिना - अर्थनिमित्तको भवति शब्दः (शब्दपूर्वको ह्यर्थसम्प्रययः) । पदं चतुर्विधम्। प्रोक्तञ्च महाभाष्ये -

**चत्वारि श्रृङ्गा त्रयो अस्य पादा, द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति, महादेवो मर्त्यां आविवेश ॥**
**चत्वारि वाक् परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः ।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥**

अत्र चत्वारि श्रृङ्गा इत्यनेन चत्वारि वाक् परिमिता पदानि इत्यनेन च पदस्य नामाख्यातोपसर्गनिपारूपेण चातुर्विधत्वं गृहितं भवति । क्रमश उदाहरणानि - रामः, पठति, अनु, वै ।

कौटिल्यार्थशास्त्रे, ऋक्प्रातिशाख्ये, शुक्लयजुःप्रातिशाख्ये, ऋक्प्रातिशाख्यभाष्ये उव्वटेन, ऋक्संहिताभाष्ये सायणाचार्येण, निरुक्ते यास्केन, ऋक्संहिताभाष्ये स्वामिदयानन्देन, च उपरिनिर्दिष्टभेदः प्रोक्तं स्वीकृताश्च ।

**विशिष्टोच्चारणन अर्थभेदः**

स्वरादीणां विशिष्टोच्चारणेन (स्वरस्य वर्णस्य वा अपभाषेण) विशिष्टोऽर्थः प्रकटितो भवति (अर्थात् ईप्सितः अर्थः नायाति) । प्रोक्तं पतञ्जलिना -

ते सुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवैः, म्लेच्छो ह वा एष यदपशब्दः । यथा - हे हेऽरय इति । अपि च -

दुःष्ट शब्दः स्वरता वर्णता वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्व्रजो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो पराधात् । यथा - इन्द्रशत्रुशब्दः ।

**उपसर्गेण अर्थसङ्कोचः**

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**
**प्रहाराहारसंहार विहारपरिहारवत् ॥ इति ।**

अर्थात् हृ धातोः अर्थः हरणमिति, परन्तु प्र उपसर्गयोगेन प्रहारः इति रूपम् अर्थस्तु ताडनम् इति, सम् उपसर्गयोगेन संहार इति रूपम् अर्थस्तु मारणम् इति, आङ् उपसर्गयोगेन

आहार इति अर्थस्तु भोजनमिति, वि उपसर्गयोगेन विहारः इति रूपम् अर्थस्तु भ्रमणमिति, परि उपसर्गयोगेन परिहारः इति अर्थस्तु त्यागः इति । प्रोक्तं पतञ्जजिना - शब्दस्तु खलु येन येन विशेषेणाभिसम्बध्यते, तस्य तस्य विशेषको भवति ।

**अर्थज्ञानस्य साधनानि**

तत्र शक्तिग्राहकं च व्याकरणादिञ्चानेकविधम् । तथाहि-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥**

अर्थात् अष्टप्रस्थानमिन्द्रचन्द्रकाशकृत्स्नपाणिन्यादिप्रणीतशब्दशास्त्रम्, उपमानं (सादृश्य ज्ञानात्मकं प्रमाणम्) निघण्टुकोशामरसिंहादिविरचितकोशग्रन्थाः, आप्तवाक्यम्, (प्रयोगहेतुभूत-यथार्थज्ञानिपुरुषोच्चरितवाक्यम्), व्यवहारः (प्रयोज्य वृद्धमुद्दिश्य उत्तमवृद्धादिकृतः गामानय इत्यादिरूपः चेष्टात्मकः), वाक्यस्य शेषः (प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थ-बोधोपयोगी पदसमूहोऽर्थवादात्मकः), विवृतिः विवरणम् पर्यायादिकम्, सिद्धपदस्य सान्निध्यम् एते शक्तिग्राहकाः हेतवः कथिताः (अथात् शब्दविशेषोऽर्थविशेषे कथं प्रयुज्यते अमुकं नाम वस्तुविशेषस्य कथं जातं तथा चाऽमुकेऽर्थे शब्दविशेषः कथं प्रयुज्यते, अथ चार्थोऽयं तस्मात् कथं द्योत्यते इत्यत्र सर्वत्र अर्थज्ञाने भाषाभाषिजनाः, तत्कृताः ग्रन्थादियुक्तय एव कारणानि) । प्रोक्तं पतञ्जलिना - उदाहरणं प्रत्युहादरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति । अपि च-याज्ञिकाः पठन्ति - दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तः स्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्, तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् इति । अपि च - असन्देहार्थं चाध्येयं व्याकरणम् (शब्दानामर्थावगमाय व्याकरणं व्युत्पत्तिनिमित्तकं कारणम्) अपि च - लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः । इत्यादिपस्पशाह्निकस्य वचनात् ।

**शब्दार्थसम्बन्धः**

भाषायाः मूलाधारः शब्दः योऽर्थावबोधं जनयति । एतयोः पारस्परिकसम्बन्धे शास्त्रेषु बहु विचारितम् । परन्तु पतञ्जलिना भाषाशास्त्रिणाऽनयोः अर्थशब्दयोः नित्यसम्बन्धः स्वीकृतः - प्रोक्तञ्च सिद्धे शब्दार्थसम्बन्धे इति तथा गामुच्चारय, गां बधान, इत्युक्त्या च परस्परमध्यासश्च सम्बन्ध इति । येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः इति पतञ्जलेरूक्तं शब्दलक्षणं शब्दस्य स्फोटात्मकान्तरिकं स्वरूपं सङ्केतयति । यः शाब्दः सङ्केतः लोके यत्रार्थे निश्चीयते, तेन शाब्देन सङ्केतेन स एवार्थोऽभिधीयते । अतो लोकव्यवहारादेव मनुष्यः शब्दप्रयोगसमर्थो भवति । कात्यायनः सिद्धे शब्दार्थसम्बन्धे । लोकतः । लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः, अस्त्यप्रयुक्ते चेन्नार्थे शब्दप्रयोगाद्, इत्यादिभिः वार्त्तिकैः विषयममुमुक्तवान् ।

**उपसंहारः**

विस्तारेण निरूपितस्य महाभाष्य-पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् इत्यस्य शोधपत्रस्य भाषाविज्ञानदृष्ट्या सारांशकथनेन तन्निरूपणसमापनमिदम् -

1. नित्य एवार्थसहितः शब्दः प्रयुज्यते ।
2. अर्थस्य शब्दादभिन्नत्वं वर्तते ।
3. शब्दार्थयोः सम्बन्धः - प्रतीकात्मकः ।
4. अर्थशब्दयोः सम्बन्धः नित्यसम्बन्धः (परस्परमध्यासश्च सम्बन्धः)
5. गहीतः शब्दोऽभ्यासादिना जातसंस्कार एवार्थं बोधयति ।
6. शब्दस्य तदर्थस्य, तयोश्चाऽभिसम्बन्धस्य भवति भाषाभाषिजनः संस्थापकः ।
7. सर्वे सर्वार्थवाचकाः भवन्ति शब्दाः व्यवहारादिवशात् ।

इत्यादिरूपेण पतञ्जलेः भाषावैज्ञानिकविचाराः महाभाष्यस्य पस्पशाह्निके ।

**सन्दर्भग्रन्थसूची**


1. भाषाशास्त्र का परिभाषिक शब्दकोश - राजेन्द्र द्विवेदी, आत्माराम एण्ड सन्स, काश्मीरी गेट, दिल्ली - 6, प्रथम संस्करण, 1963
2. संस्कृत का भाषाशास्त्रीय अध्ययन - डॉ. भोलाशंकर व्यास, विश्वविद्यालय प्रकाशन, चौक, वाराणसी - 221001
3. न्यायकोशः - महामहोपाध्यायः - भीमाचार्यः, S. K. Bolvalkar, Bhandarkar Oriental Institute, Poona, No. 4, तृतीय संस्करण, 1928 खिस्ताब्दः
4. अर्थविज्ञान और व्याकरणदर्शन - कपिलदेव द्विवेदी आचार्य, हिन्दुस्तानी एकेडेमी, उत्तरप्रदेश, इलाहाबाद, प्रथम संस्करण 1951
5. भाषिकी और संस्कृत भाषा - डॉ. देवीदत्त शर्मा, हरियाणा साहित्य अकादमी, चण्डीगढ, प्रकाशन वर्ष - 1990
6. संस्कृत व्याकरणदर्शन - रामसुरेश त्रिपाठी, राजकमल प्रकाशन, दिल्ली - 6, प्र. सं. 1972
7. शब्दार्थतत्त्व - डां. शोभाकान्त मिश्र, बिहार हिन्दी ग्रन्थ अकादमी, प्रेमचन्द मार्ग, राजेन्द्र नगर, पटना - 800 004, प्र. सं. 1986
8. अर्थतत्त्व की भूमिका - डॉ. शिवनाथ, नागरी प्रचारिणी सभा, काशी, प्रथम संस्करण, सं. 2018
9. प्रतिभा दर्शन (Ancient Indian Linguistics) - हरिशंकर जोशी, चाखम्बा विद्याभवन, वाराणसी 7 1, सन् - 1964
10. स्फोट-मीमांसा - आचार्य चन्द्रभानु त्रिपाठी, शक्ति प्रकाशन, 34, बलरामपुर हाउस, इलाहाबाद, प्रथम संस्करण, 1997

11. शब्दार्थ विमर्श (संस्कृत साहित्य दर्शनशास्त्र एवं व्याकरणशास्त्र के सन्दर्भ में) - देवनारायण मिश्र, सीतापुर, प्रथम संस्करण, 1980
12. संस्कृत भाषाविज्ञान - प्रो. शिवबालक द्विवेदी, प्रो. अवधेश कुमार चतुर्वेदी, ग्रन्थम्, रामबाग, कानपुर - 208012, प्रथम संस्करण, प्रकाशन वर्ष - 1978
13. भाषा विज्ञान एवं भाषाशास्त्र - द्विवेदी डॉ. कपिलदेव, प्रकाशक - विश्वविद्यालय प्रकाशन, चौक, वाराणसी - 221001, संस्करण द्वादश, सन् - 2010
14. महाभाष्यम् (पस्पशाह्निकम्) - पतञ्जलि, (व्याख्याकार - रमण कुमार शर्मा), ईस्टर्न बुक लिंकर्स, दिल्ली - 110007, प्रथम संस्करण, 1982

**आन्तर्जालकानि**

1. www.sanskritdocuments.org
2. www.dli.serc.iisc.ernet.in
3. www.archive.org
4. www.pid;.osmania.ac.in

**शोधच्छात्रः,**
**व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

❖❖❖

# पस्पशाह्निके प्रयुक्तविशिष्टशब्दानां परिशीलनम्

श्रीमती ऋतम्भरा पाण्डेयः

**काञ्चिन्नवीनां दिशं दिशन्तीयं शोधच्छात्रा पस्पशाह्निकस्थानां विलक्षणानां पञ्चविंशतिशब्दानां शास्त्रदृशा विश्लेषणमत्र विदधाति, संदिशति चैतादृशं कञ्चिन्महाभाष्यकोशं विनिर्मातुम् । सत्यमेतत् । शब्दशास्त्रीयकोशस्य निर्माणं प्रामाणिकरूपेण यदि भवति तदा महानुपकारः स्याद् व्याकरणेऽधीतिनाम् । ( स० )**

चतुर्दशविद्याविस्तरेषु शास्त्रेषु व्याकरणशास्त्रस्य महत्त्वं सर्वातिशायि, समेषा-मुपकारकत्वाद् इति वयं जानीमः । व्याकरणे सूत्रं वार्त्तिकं वृत्तिः भाष्यं टीकाग्रन्थः परिष्कारग्रन्थः दर्शनग्रन्थ इति नैके प्रकाराः ग्रन्थानां वर्त्तते । तत्र यथोत्तरं मुनीनां प्रामाण्यम् अर्थात् उत्तरोत्तरमुनौ पूर्वपूर्वमुनीनां तात्पर्यं निहितमिति कृत्वा पातञ्जलमहाभाष्यस्य महन्महत्त्वं सर्वैः शास्त्रज्ञैः अविश्रान्तैः अविगीतम्। नैकाभिः दृष्टिभिः महाभाष्यस्य प्रत्येकमाह्निकं विमर्शनीयं भवतीति तत्त्वज्ञाः आमनन्ति । तत्राराहमिदानीं विलक्षणानां कतिपयानां शब्दानां निर्वचनं विदधामि ।

**१. आह्निकमिति**

'अह्ना निर्वृत्तम्' इति विग्रहे 'तेन निर्वृत्तम्' इत्यनेन ठक्प्रत्यये आह्निकशब्दो व्युत्पाद्यते । अनया व्युत्पत्त्या ज्ञायते यत् पतञ्जलिना प्रतिदिनं यद्भाष्यं क्रियते स्म, तस्य आह्निकमितिसञ्ज्ञा तेन कृता । महाभाष्ये चतुरशीतिः आह्निकानि विद्यन्ते ।

**२. पस्पशेति**

महाभाष्यस्य प्रथमाह्निकं पस्पशाह्निकशब्देनास्ति प्रसिद्धम् । तत्र 'स्पश बाधनस्पर्शनयोरि'ति भौवादिको धातुः । 'स्पशनं ग्रन्थनम्' इति क्षीरस्वामो । पुनः पुनः अतिशयेन वा स्पशतीति विग्रहे पस्पशधातोः यङ्लुगन्ताद् अचि कृते 'सञ्ज्ञापूर्वको विधिरनित्यः' इति नियमादभ्यासदीर्घाभावात् अकारान्तात् पस्पशशब्दात् स्त्रीत्वविवक्षायां टापि पस्पशाशब्दः सिद्धो भवति । एवञ्च पुनः पुनः अतिशयेन कस्यापि पदार्थस्य ग्रन्थनं पस्पशाशब्दस्यार्थो बोध्यः । ततश्च पस्पशापदार्थ उपोद्घातो भवितुमर्हति । तदित्थमस्मिन्नाह्निके महाभाष्यस्योपोद्घातरूपेण सर्वे विषयाः सूक्ष्मतया सन्निवेशिता इति स्पष्टं भवति ।

**३. अथ इति**

तत्र तावद् 'वृद्धिरादैच्' इति सूत्रे 'वृद्धि' पदेन पाणिनिना, 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिके 'सिद्ध' पदेन कात्यायनेन मङ्गलाचरणं विहितम्, तथैव पतञ्जलिना महाभाष्यादौ 'अथ' इत्यनेन मङ्गलं क्रियते । अथ शब्दस्य मङ्गलत्वन्तु –

**'ऊँकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।**
**कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङलिकावुभौ ॥'**

इति स्मृत्या 'मङ्गलाऽनन्तराऽऽरम्भप्रश्नकार्त्तस्न्येष्वथो अथ' इति कोशाच्च सिद्ध्यति। न च स्वयं भाष्यकृता 'अथेत्ययं शब्दोऽधिकारार्थः' इत्युक्तत्त्वात् सकृदुच्चरितन्यायात् न तस्य माङ्गलिकत्वमित्याशङ्क्यम्, अथशब्दस्य अन्यार्थं नीयमानदध्यादिवत् स्वरूपेणमङ्गल-फलत्त्वात् । तदुक्तं शङ्कराचार्यैः 'अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति' इति ।

अधिकारार्थे इति । अधिकारः प्रस्तावः प्रारम्भ इति यावत् । अर्थशब्दः प्रयोजनवाची। प्रादीनामिव निपातानामपि द्योतकत्त्वात् 'अथ' इत्यस्य निपातत्त्वात् 'अथेत्ययं शब्दोऽधिकारार्थः' इत्यत्र अथशब्दद्योत्योऽधिकाररूपोऽर्थ इत्यर्थो बोद्धयः । उपसर्गवत् निपातानां द्योतकत्त्वादेव 'अनुभूयते सुखम्', 'उपास्यते गुरुः' इत्याद्युपसर्गविशिष्टधातुप्रयोगवत् 'अलङ्क्रियते कन्या', 'साक्षात्क्रियते गुरुः' इत्यादौ निपातविशिष्टधातुस्थलेऽपि तत्तदर्थस्य धातोर्वाचकत्वात् धातुवाच्यफ- लाश्रयत्वात् कन्यादेः कर्मत्वात् कर्मणि लकारसिद्धिः । एवमेव 'सह' निपातस्य साहित्यद्योत्यत्वादेव तं विनाऽपि 'वृद्धो यूना' इत्यादौ तृतीया सिद्धिः ।

नागेशस्तु - अत्र वाचकत्वेमेवेच्छन्ति । 'अधिकृतं' इति च तदर्थ वदन्ति । भाष्ये 'प्रयुज्यते' इत्यनेन वर्त्तमाननिर्देशेन सर्वलोकसिद्धमस्याधिकारार्थत्वं, न तु वृद्धयादिवत् पारिभाषिकमिति धवनितम् ।

**४. शब्दानुशासनमिति**

अनुपूर्वकः शासिर्विविच्य ज्ञापने दृश्यते । तथा च अनुशिष्यन्ते विविच्य असाधुभ्यो विभज्य बोधयन्ते येनेति करणे ल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यम् । ततश्शब्दानामिति कर्मणि षष्ठी, तदन्तेन समासः । न च 'कर्मणि च' इति सूत्रेण समासनिषेधः शङ्क्यः, तत्र 'च' शब्दस्य इतिशब्दार्थकतया कर्मणीतिशब्दवता 'उभयप्राप्तौ' इति सूत्रेण या षष्ठी, तदन्तं न समस्यते इत्यर्थात् । इयं षष्ठी तु 'कर्त्तृकर्मणो' रिति विहिता न तु 'उभयप्राप्तौ' इति, आचार्यस्य कर्त्तुर्वस्तुतः सत्त्वेऽपि इहाऽनुपादानात् । 'चित्रं गवां दोहोऽगोपेन' इत्यत्र हि आश्चर्यं प्रतिपाद्यम्, तच्च यद्यशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धाव्यास्तदैव निर्वहति, न त्वन्यथा । अतः कर्तृकर्मणोर्विशिष्योपादानादस्त्युभयप्राप्तिः । इह तु शब्दानामिदमनुशासनं न त्वर्थानामिति अर्थनिवृत्तिपरं वाक्यं न तु कर्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः ।

**५. 'म्लेच्छितवै' इति**

म्लेच्छनं नाम अपशब्दोच्चारणम् । 'म्लेच्छितवै' इत्यस्य अपभाषितवै इति पर्यायः । अत्र धातूनामनेकार्थतया निन्दावचनान्म्लेच्छधातोः 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति तवैप्रत्ययः। 'हैहेप्रयोगे हैहयोः' इति प्लुते प्रकृतिभावे च कर्त्तव्ये 'हे3 अरयः' इति ।

तदकरणमनुच्चारणं म्लेच्छनमिति । पदद्विर्वचने वाक्यद्विर्वचनं लत्वं च म्लेच्छनमित्यपरे । न म्लेच्छितवै इत्येतन्म्लेच्छभाषाविषयमिति भ्रमनिवृत्त्यर्थं तद्विवरणं नापभाषितवै इति ।

**६. 'म्लेच्छ' इति**

म्लेच्छ इति कर्मणि घञ् । अपशब्दे असंस्कृतशब्दे इत्यर्थः । 'म्लेच्छो ह वा नाम यदपशब्द' इति श्रुतिः । म्लेच्छ इत्यस्य देश्योक्तौ, देश्या ग्राम्या उक्तिर्देश्योक्तिर-संस्कृतकथनमित्यर्थः । परं म्लेच्छयति वा म्लेच्छति असंस्कृतं वदतीति म्लेच्छ्शब्दात् अचि प्रत्यये कृते म्लेच्छ इति । पामरजातौ, नीचजातौ च 'किरातशवरपुलिन्दादिजातिः' इत्यमरः । पामरभेदः, पापरक्तः, अपभाषणम् इति मेदिनी । 'गोमांसखादको यस्तु विरुद्धं बहु भाषते । सर्चाचारविहीनश्च म्लेच्छ इत्यभिधीयते' इति बौधायनः । ननु म्लेच्छो नाम पुरुषविशिषो देशविशेषो वा कथमपशब्दोऽत आह घञिति । निन्दावचनान्म्लेच्छतेरिति भावः । निन्दा च शास्त्रबोधितविपरीतोच्चारणेन पापसाधनत्वात् । एवं म्लेच्छा इत्यस्य निन्द्या इत्यर्थः ।

**७. 'वाग्योगविदः' इति**

वाचो योगः प्रकृतिप्रत्ययविभागेनार्थविशेषपरत्वं, तद्वेत्तीति वाग्योवित् । वाग्योगवि-द्वैयाकरणः इत्यर्थः ।

**८. 'आर्त्विजीनाः' इति**

आर्त्विजीना इति यजमाना ऋत्विजश्चेत्यर्थः । ऋत्विजमर्हत्यार्त्विजीनो यजमानः । ऋत्विक्कर्मार्हतीति याजकोऽप्यार्त्विजीनाः । 'यज्ञर्त्विग्भ्यां घखञा'विति सूत्रेण 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसङ्ख्यान'मिति वार्त्तिकेन च खञ् । 'विद्वान्यजत', 'विद्वान्याजये'दिति द्वयोरपि विदुषोरधिकारात् ।

**९. 'आहोस्वित्' इति ।**

'आहोस्वित्' इत्यव्ययमस्ति । अहो च स्विच्च इति द्वन्द्वसमासः । विकल्पे, प्रश्ने च।

**१०. वाकोवाक्यमिति**

'वाकोवाक्यम्' इति शब्देनोक्तिप्रयुक्तिरूपो ग्रन्थ उच्यते । यथा 'किं स्विदावपनं महत्', 'भूमिरावपनं महदि'ति । एवं वाचस्पत्ये 'ग्रन्थभेदे' इत्यर्थ उक्तः । 'वाकोवाक्येतिहासेत्यादि' छान्दोग्यम् ।

**११. 'उतत्वः' इति**

'उतत्व' इत्यत्र त्वशब्दोऽन्यवाची । उतशब्दोऽपिशब्दस्यार्थे । स च भिन्नक्रमः । प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽप्यर्थाऽपरिज्ञानान्न पश्यतीत्यर्थः । 'उत' इत्यत्र 'उ शब्दे' धातोः कृप्रत्ययः, अत्यर्थम् । विकल्पः, समुच्चयः, वितर्कः प्रश्ने, पादपूरणे इति मेदिनी । एवञ्च 'वेञ् धातोः' कृप्रत्यये सम्प्रसारणे च कृते 'उत' इति । स्यूते ग्रथिते इत्यमरः ।

**१२. 'अनूकम्' इति**

'अनूकम्' इति अनुपूर्वकात् उच् धातोः घञर्थे कः 'न्यङ्क्वादीनाञ्च' इति कुत्वम्। कुलं, वंशः, शीलं, स्वभावः इति मेदिनी । उक्तञ्च महाभाष्ये 'त्रिपुरुषानूकमि'ति नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यभिधत्त इति त्रिपुरुषानूकम् ।

**१३. 'कूटस्थम्' इति**

कूटस्थ इव प्रकाशते यदिति अर्श आदेचप्रत्ययः । निर्विकारेण निश्चलः सन् तिष्ठतीति, एकरूपतया यः कालव्यापी सः कूटस्थ इत्यमरः । 'कूटस्थ' इत्यस्य अविनाशीत्यर्थः । कूटमयोघनस्तद्वत्तिष्ठति यः सः । संसर्गिनाशेपि स्वयमनष्ट इत्यर्थः । 'अयोघन' इति यत्र संस्थाप्य लौहं मुद्गरैर्लौहकारेण ताड्यते स लौहकारोपकरणविशेषो-ऽयोघनः । प्रचलत्स्वपि विनश्यत्स्वपि च लौहमुद्गरादिषु कूटं यथा निश्चलमेव तिष्ठति तथैव निश्चला इत्यर्थः ।

**१४. 'संवृतः' इति**

सम्पूर्वकवृञ्धातोः क्तप्रत्ययेन निष्पन्नः । आवृते, कृतगोपने, संवृतरूपे वर्णोच्चारणाभ्यान्तरयत्ने च इति त्रिष्वर्थेषु सम्वृतशब्दः प्रयुज्यते ।

**१५. 'कलः' इति**

'कलः' इत्यत्र कलधातोः भावे घञ् वृद्धयभावः। मधुरास्फुटध्वनिः इत्यमरः । द्वितीयं कलयति मान्द्यं नयति जाठराग्नीत्यर्थे णिजन्तकलधातोः अचि प्रत्यये 'कलः' इति । 'स्थानान्तरनिष्पन्नः काकलिकत्वेन प्रसिद्धः' इति तदर्थः ।

**१६.'ध्मातः' इति**

'ध्मातः' इति 'ध्मा' धातोः क्तप्रत्यये निष्पद्यते । संधुक्षिते श्वासभूयिष्ठतया दीर्घभावेन, लक्ष्यमाणे वर्णे च, शब्दिते च एष्वर्थेषु 'ध्मातः' शब्दः । 'श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते' इति तदर्थः ।

**१७. 'एणीकृतः' इति**

एणीकृत इत्यस्य 'अविशिष्टः' इत्यर्थः । अत्र 'एणी' इति शब्द एति द्रुतं गच्छतीत्यर्थे 'इ-गतौ' धातोः बाहुलकात् णः, स्त्रियां ङीपि कृते एणीति भवति । तस्य राजनिर्घण्टौ 'कृष्णा हरिणी' इत्यर्थः, मृगविशेषः इत्यमरे । 'अविशिष्टे'ति स्वगतभेदकविशेषरहित इत्यर्थः । अत एव सन्देहाभिधानोपपत्तिः 'किमयमोकार अथौकार' इति यत्र सन्देहः' इति ।

**१८.'अम्बूकृतः' इति**

अनम्बु अम्बु सम्पद्यमानं कृतम् अम्बु + च्वि (अभूततद्भावे च्विः) + कृ + क्त । श्लेष्मकणनिर्गम सहितवाक्यम् । सनिष्ठीवम् इत्यमरः । सथूत्कारम् इति हेमचन्द्रः । 'अम्बूकृतो यो व्यक्तोऽप्यन्तर्मुख इव श्रूयते' इति तदर्थः ।

**१९. 'अर्धकः' इति ।**

'ऋध् वृद्धौ' धातोः भोवादिकात् घञप्रत्यये अर्ध इति, तस्मात् स्वार्थे कन् समभागः, समानांश इत्यमरः । 'अर्धको दीर्घोपि ह्रस्व इव'इति भाष्ये ।

**२०. 'ग्रस्तः' इति**

ग्रस्यते स्म इत्यर्थे ग्रसुधातोः कर्मणि क्ते उदित्त्वात् 'यस्यविभाषा' इति इडभावः । भक्षिते लुप्तवर्णपदे ग्रस्तशब्दः । असंपूर्णोच्चारितशब्दे इत्यमरः । 'ग्रस्तः' इति जिह्वामूले निगृहीतः । अव्यक्त इत्यपरे ।

**२१. 'निरस्तः' इति**

निर्पूर्वकाद् 'अस् क्षेपणे' धातोः कर्मणि क्तप्रत्यये 'निरस्तः' इति । प्रत्याख्याते निवारिते इति अमरः । एवं त्वरितोदिते, त्यक्तस्वरे, निष्ठ्युते, प्रतिहते, निष्ठीवने, निवारणाद्यर्थे 'निरस्तः' शब्दः । अत्र भाष्ये 'निष्ठुरः' इत्यर्थः ।

**२२. 'प्रगीतः' इति**

'प्रगीतः' इत्यत्र 'प्रकृष्टेन गीयते' इति विग्रहे प्रपूर्वकात् 'गै गाने' धातोः कर्म्मणि क्तप्रत्ययः । 'प्रगीतः' इत्यस्य सामवदुच्चारित इत्यर्थः ।

**२३.'उपगीतः' इति**

'उपगीतः' इत्यत्र उपपूर्वकात् 'गै गाने' धातोः कर्मणि क्तप्रत्ययः । अस्य समीप-वर्णान्तरगीत्याऽनुरक्त इत्यर्थः ।

**२४. 'क्ष्विण्णः' इति**

'ञिक्ष्विदा स्नेहनमोचनयोः' इति धातोः क्तप्रत्यये क्ष्विण्ण इति रूपम् । 'क्ष्विण्णः' इत्यस्य कम्पमान इव इत्यर्थः ।

**२५. 'रोमशः' इति**

रोमाणि सन्त्यस्येतिविग्रहे रोमन्शब्दात् 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति शः। प्रचुररोमयुक्ते, मेषः, पिण्डालुः, कुम्भी, शूकरादयः । 'रोमशः' इत्यस्य गम्भीरः इत्यर्थः।

अनेन प्रकारेण पञ्चविंशतेः विशिष्टशब्दानां निर्वचनं मया कृतम् । तत्र श्रीनागेशभटट्कृतस्य उद्योतस्य, श्री कैयटकृतस्य प्रदीपस्य, श्रीगुरुप्रसादशास्त्रिकृतायाः राजलक्ष्म्याः, अमरकोशस्य च सहयोगः गृहोताः । शास्त्रीयदृष्ट्या महत्त्वास्पदानां लोके चाप्रसिद्धानाम्, अथवा तत्र अर्थान्तरे प्रसिद्धानां पस्पशाह्निकोक्तानां शब्दानामत्र यथामति निर्वचनं मया कृतम् । शब्दानां निर्वचनावसरे प्रत्येकं शब्दानां प्रकृतिप्रत्ययविभाजनपूर्विका तेषां व्युत्पत्तिः प्रदर्शिता, एवं तेषां तेषां पर्यायवाचकशब्दा अपि प्रदर्शिताः ।

अत्र अतीव न्यूनाः केवलप्रथमाह्निकशब्दा एव निरुक्ताः, एवमेव महाभाष्यस्य प्रत्यकाह्निकं विशिष्टशब्दानां निर्वचनं यदि भवेत् तर्हि महानुपकारः स्यादिति मन्ये । येनैकं महाभाष्यकोशस्यापि निर्माणं भवितुमर्हति । येन च महाभाष्याध्ययनाय छात्राणां क्लेशो न

भवेत् । एवं प्रकारेण न केवलं महाभाष्यस्य अपितु अन्यमहत्त्वपूर्णग्रन्थानामपि विशिष्टशब्दानां निर्वचनाय एतत् शोधपत्त्रम् अभिप्रेरयिष्यतीति मे मतिः । एवञ्च छात्त्राणाम् अन्यग्रन्थाध्ययनसमयेऽपि शब्दानां चिन्तनं प्रमाणयितुं एतत् शोधपत्त्रं प्रेरणादायकं भूयादिति शम् ।

**उपयुक्तग्रन्थसूची**


1. व्याकरणमहाभाष्यम्, षष्ठसंस्करणम्, चौखम्भा प्रकाशन, वाराणसी, सम्वत् - 2067.
2. महाभाष्यम्, प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 1982.
3. व्याकरण महाभाष्यम्, प्रथमसंस्करण, श्री मोतीलाल बनारसीदास, दिल्ली, सम्वत्-2025.
4. पातञ्जलं महाभाष्यम्, द्वितीयं संस्करणम्, वाणीविलास प्रकाशन, वाराणसी, 1988.
5. व्याकरणमहाभाष्ये नवाह्निकम्, पञ्चमं संस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, 1951.
6. Critical studies on the MAHABHASHYA, by V.P. Limaye, V.V.R.I. press Hoshiyarpur, 1974.
7. व्याकरणमहाभाष्यम् - राष्ट्रियसंस्कृतसंस्थानम् नवदेहली
8. व्याकरणमहाभाष्यम् (नवाह्निकम्, प्रदीपोद्योततत्त्वालोकटीकासमुल्लसितम्), षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् -2067.
9. अमरकोषः, (रामाश्रमीसुधाटीकासहितः), द्वितीयसंस्करणम्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987.
10. महाभाष्यम् (हिन्दीव्याख्यया सहितम्), युधिष्ठिरमीमांसकाः, प्रथमसंस्करणम्, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट), दिल्ली, वि.सं.2029.
11. पाणिनीयः अष्टाधयायीसूत्रपाठः, सप्तदशं संस्करणम्, राधाप्रेस, दिल्ली, 2005.
12. धातुपाठः, षष्ठसंस्करणम्, मन्त्री रामलाल कपूर ट्रस्ट, सोनीपत, 2000.
13. वैयाकरणसिद्धान्तदिग्दर्शनम्, प्रो.बोधाकुमारझाः, प्रथमसंस्करणम्, रचना प्रकाशन, जयपुर, 2006.


**उपयुक्तसंसाधनम् -**

1. धातुरूपाणि ।  2. वाचस्पत्यम् ।  3. शब्दकल्पद्रुमः ।


**शोधच्छात्त्रा, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्, ( मा. वि. )**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**


❖❖❖

# लृकारोपदेशविमर्शः

✍सत्यराजरेग्मी

**महाभाष्यस्य रचना सहस्रमुखेन कृतेति काचनास्माकं परम्परा महाभाष्ये सकृदेव विविधविधविषयोपस्थापनं वोक्ष्यैव प्रवर्त्तते इति न तिरोहितम्। तस्मात् महाभाष्यकृतः अभिप्रेतः क इति निर्णये प्रेक्षावतामपि कदाचिद् व्यामोहः सम्भवः । तादृशमेव स्थलमिदमपि । परं सधैर्योऽयं गवेषकः वार्त्तिककारसम्मतं लृकारोपदेशप्रत्याख्यानम्, भाष्यकारसम्मतञ्च लृकारोपदेशसार्थक्यमिति निबन्धेऽत्र प्रस्तौति । (स०)**

प्रसिद्धिं गतस्य पाणिनीयव्याकरणशास्त्रस्य '**अथ शब्दानुशासनम्**' इत्यत आरम्भ पाणिनिमहर्षेः सूत्राष्टाध्यायीग्रन्थस्य 'अ अ' इत्यन्तं महर्षिपतञ्जलिना कृतं व्याख्यानं महाभाष्यपदेनाऽभिधीयते । सर्वैः वैयाकरणैः पतञ्जलेर्महाभाष्यं व्याकरणशास्त्रस्यातीव प्रामाणिकः ग्रन्थ इति जोघुष्यते । नव्याः प्राचीनाश्च सर्वे विद्वांसः पाणिनीय-व्याकरणमहाभाष्यसम्मुखे नतमस्तकाः भवन्ति । अत्र चेदं मुख्यं कारणमस्ति यद् महर्षिपतञ्जलिः व्याकरणसदृशं क्लिष्टं शुष्कं दुरूहञ्च विषयम् अतीव सरलतया सरसया च व्यरचयत् ।

व्याकरणमहाभाष्यस्य प्रथमाह्निकम् पस्पशाह्निकशब्देन तथा द्वितीयाह्निकञ्च प्रत्याहाराह्निकत्वेन व्यवह्रियते । महर्षिपतञ्जलिना द्वितीयाह्निके चतुर्दशमाहेश्वरसूत्रेषु 'अ इ उण्' इति प्रथमसूत्रादारभ्य 'झ भञ्' इत्यष्टमसूत्रपर्यन्तम् अष्टौ सूत्राण्येव व्याख्यातानि सन्ति। तेषु 'ऋलृक्' इत्यस्मिन् सूत्रे लृकारप्रयोजनविवेचनस्य यदृच्छाऽशक्तिजविवेचनं लृकारो-पदेशप्रत्याख्यानसमाधानादिभाष्यवचनानि चास्मिन् शोधपत्रे सरलतया अध्येतुं यत्नः कृतः ।

अक्षरसमाम्नाये लृकारोपदेशस्य किमपि प्रयोजनं न दृश्यते इति कृत्वा भाष्यकारेण आक्षेपभाष्यमुपस्थाप्यते - '**अथ लृकारोपदेशः किमर्थः?**' इति । **किं विशेषण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्येत । यदि किञ्चिदन्येषामपि वर्णानामुपदेशः प्रयोजनमस्ति, लृकारोपदेशस्यापि तत् भवितुमर्हति**'इति आक्षेपबाधकभाष्यद्वारा वर्णानामुपदेशे चतुर्दशमाहेश्वरसूत्रेषु प्रत्येकस्यापि वर्णस्य प्रयोजनमस्ति, तर्हि लृकारस्यापि भवितुमर्हतीति विचार्य आक्षेपसाधकभाष्यञ्च प्रस्तौति। तद्यथा -

'**अयमस्ति विशेषः - अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः । यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्य । क्लृपेश्च लत्वमसिद्धम् तस्यासिद्धत्वाद् ऋकारस्यैवाच्कार्याणि भविष्यन्ति नार्थ लृकारोपदेशेन**' इति ।

अत्रायं सारः - नन्वक्षरसमाम्नाये लृकारोपदेशस्य न किमपि प्रयोजनं दृश्यते । यच्च कथञ्चिद् दृश्यते तदपि क्लृपिस्थस्यैव । क्लृपेश्च लत्वस्यासिद्धत्वात् ऋकारस्यैवाच्कार्याणि भविष्यन्ति । तन्नास्ति लृकारोपदेशस्य किञ्चिद् फलमिति चेन्न । यदृच्छाऽशक्तिजानुकरण-प्लुत्याद्यर्थं तस्यावश्यकत्वात् ।

तदुक्तं भाष्यकारेण समाधानवार्त्तिकम् - '**लृकारोपदेशा यदृच्छाऽशक्तिजानुकरण**' इति। वार्त्तिकस्यास्य भाष्यञ्च विधीयते, यथा -

'**यदृच्छाशब्दार्थस्तावत् - यदृच्छया कश्चित् लृतको नाम, तस्मिन्नच्कार्याणि यथा स्युः । दध्य्लृतकाय देहि, मध्व्लृतकाय देहि, उदङ्लृतकोऽगमत्**' इति ।

शब्दानां प्रवत्तिः चतुष्ट्यी भवति - जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चेति । अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाशब्दश्चेति । अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाशब्द इति प्रदीपटीकायामुक्तम् ।

वार्त्तिकविवरणं कुर्वन्नाह - 'अशक्तिजानुकरणार्थः । अशक्त्या कयाचित् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तम् । तस्यानुकरणम् - ब्राह्मण्य्लृतक इत्याह, कमार्य्लृतक इत्याह ।' चतुर्विधशब्देष्वनुकरणशब्दः कुत्रान्तर्भवतीति समाधातुं वाक्यमेतदुक्तम्।

पुनः कथयति - 'प्लुत्याद्यर्थश्च लृकारोपदेशः कर्तव्यः' इति । तेन क्लृ3प्तशिखः, क्लृप्तः, प्रक्लृप्तिः, इत्यादिषु प्लुतादिकार्येषु कृपेर्लत्वं सिद्धं भवति । तस्य सिद्धत्वादच्कार्याण्यपि सिद्ध्यन्ति । तस्माद् लृकारोपदेशः कर्तव्यः ।।

लृकारोपदेशप्रयोजनप्रत्याख्यानं वार्त्तिकपुरस्सरमुपस्थापयन्नाह - '**नैतानि सन्ति प्रयोजनानि । न्याय्यभावात्कल्पनं संज्ञादिषु । न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु साधु मन्यते - ऋतक एवासौ न लृतक इति ।**' तद्वाधितुं पुनरुच्यते - **अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः । लृफिडः, लृफिड्डः । एषोऽपि ऋफिडः, ऋफिड्डश्च ।** तत् कथमिति चेत्? अर्तिप्रवृत्तिश्चैव हि लोके दृश्यते । फिडफिड्डौ औणादिकप्रत्यया । शब्दानां प्रवृत्तिः त्रिधा भवति, तच्च यथा - जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाश्चेति । न सन्ति यदृच्छाशब्दाः । इत्येवं प्रयोजनप्रत्याख्यानपक्षः ।

उपदेशप्रयोजनपक्षे तु - '**अन्यथा कृत्वा प्रयाजनमुक्तम्, अन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः ।**' इत्येवं समाधानपक्षः ।

लृतकशब्द एव यदा संज्ञात्वेन विनियुज्यते तदा कुत्रचित् पिण्डे तच्छब्दस्वरूपाध्यासः, ऋतकशब्दे तु विपर्ययः । भिन्नस्वरूपौ शब्दावेतौ भावयितुमाह - '**समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति । तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन् ।**'

यदृच्छाशब्दसद्भावाश्रयेण उपदेशप्रयोजने उक्ते तदनाश्रयेण तत्प्रयोजनमयुक्तमिति निराकर्तुमुच्यते - **'नैष दोषः, पक्षान्तरैरपि परिहाराः भवन्ति'** । तद्यथा वार्त्तिकम् - **'अनुकरणं शिष्टाशिष्टप्रतिषिद्धेषु यथा लौकिकवदिकेषु ।'** शिष्टस्य अनुकरणमेव साधु भवति, अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति न चाभ्युदयाय । यथा लौकिकवैदिकेषु। यथा लौकिकष् वैदिकेषु च कृतान्तेषु ।

सर्वमेतदुदाहरणपुरस्सरम् उपस्थापयति भाष्यकारो यथा - लोके तावत् - य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते इति तस्यानुकुर्वन् दद्याच्च यजेत वाऽधीयोत च सोऽप्यभ्युदयेन युज्यते । एवञ्च वेदेऽपि - 'य एवं विश्वसृजः सत्राण्यध्यासते ।' इति तेषामनुकुर्वन् तद्वद् सत्राण्यध्यासीत सोऽप्यभ्युदयेन युज्यते ।

वैदिकस्यात्र अभावादनुक्तिः, इत्यतः लौककमात्रोदाहरणम् - अशिष्टाप्रतिषिद्धम् - य एवासौ हिक्कति, य एवासौ हसति, य एवासौ कण्डूयति इति तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च नैव तद्दोषाय स्यात्, नाभ्युदयाय इति ।

प्रकृतोपयोग्यर्थम् आर्थिकत्वेनाह - यस्तु खलु एवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबति - इति तस्यानुकुर्वन् ब्राह्मणं हन्यात्, सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात् । तदनुकरणवत्तदनुकरणं निषिद्धमिति न तदर्थता अस्या इति भावः ।

प्रयोजनसमर्थयितुमाह - **'विषम उपन्यासः'** इति । **'अनुकरणं शिष्टाशिष्टप्रतिषिद्धेषु यथा लौकिकवैदिकेषु'** इत्यस्य वार्त्तिककारस्य शिष्टाशिष्टानुकरणं साधु इत्यर्थः । यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः । यश्चापि पिबति, यश्चानु पिबति, उभौ तौ पिबतः । यस्तु खलु एवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबति इति तस्यानुकुर्वन् स्नातानुलिप्तौ माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्, पयो वा पिबेत् स न मन्ये पतितः स्यात्।

उक्तवार्त्तिकार्थनिगमार्थम् - एवम् इहापि य एवमपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन् अपशब्दं प्रयुञ्जीत सोऽप्यपशब्दभाक् स्यादिति प्रोक्तम् ।

उपदेशप्रयोजनभाष्यं तु यथा - अयं तु अन्योऽपशब्दपदार्थकः शब्दः, यदर्थ उपदेशः कर्तव्यः । न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति । अवश्यञ्च एवदेवं विज्ञेयम् । यो हि मन्यते - अपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्दः स्यात् । न चैषोऽपशब्द इति ।

प्रयोजनानन्तरञ्चात्रोच्यते - अयं खल्वपि भूयोऽनुकरणशब्दार्थोऽपरिहार्यः । यदर्थ उपदेशः कर्तव्यः - साध्व्लृकारमधीते, मध्व्लृकारमधीते इति ।

अन्यथासिद्धिरिति बोधयितुं च भाष्ये कथितम् । तच्च यथा - क्वस्थस्येदमनुकरणम्? क्लृपिस्थस्य । यदि क्लृपिस्थस्य क्लृपेश्च लत्वमसिद्धम्, तर्हि तस्यासिद्धत्वाद् ऋकार एवाच्कार्याणि भविष्यन्ति ।

पुनः प्रत्याख्यानञ्च प्रस्थाप्यते - **'न कर्तव्यः'** इत्यादिना । इदमवश्यं कर्तव्यम्, 'प्रकृतिवदनुकरणं भवति' इति । किं प्रयोजनम्? 'द्विः पचन्त्वित्याह', 'तिङ्ङतिङः' इति निघातो यथा स्यात् । 'अग्नी इत्याह', 'ईदूदेद्द्विवचनं प्रगृह्ययम्' इति प्रगृह्यसंज्ञा यथा स्यात्। खण्डनस्योपसंहारं करोति - **'यदि प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति 'कुमार्य् लृतक इत्याह, ब्राह्मण्य् लृतक इत्याह । अपशब्दो हि अस्य प्रकृतिः'** इति वाक्येन । प्रयोजनं समाधातुं पुनरुच्यते - **न चापशब्दः प्रकृतिः । न हि अपशब्दा उपदिश्यन्ते । न चानुपदिष्टा प्रकृतिरस्ति** इति ।

पुनश्च प्रयोजनप्रत्याख्यानवार्त्तिकमुपस्थापयति भाष्यकारः - **'एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः'** इति । **'एकदेशविकृतमनन्यवद् भवति'** इति प्लुतादयोऽपि भविष्यन्ति । यदि **'एकदेशविकृतमनन्यवद् भवति'** इत्युच्यते तर्हि **'राज्ञः क च' राजकीयम्,** अत्र **अल्लोपोऽनः** इत्यनेन सूत्रेण अकारस्य लोपः प्राप्नोति ।

एवं तर्हि **'एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्येति वाच्यम्'** । यदि षष्ठीनिर्दिष्टस्येत्युच्यते 'क्लृप्तशिखः' इत्यत्र प्लुतो न प्राप्नोति । न हि अत्र ऋकारः षष्ठीनिर्दिष्टः। कस्तर्हि रफः? ऋकारोप्यत्र षष्ठीनिर्दिष्टः । कथम्? अविभक्तिको निर्देशः **कृप-उः रः लः - 'कृपो रो लः'** इति । अथ पुनस्त्वविशेषेण ।

आक्षेपं स्मारयति - ननु चोक्तम् **'राज्ञः क च'** राजकीयम् इत्यत्र **'अल्लोपोऽनः'** इति प्राप्नोति इत्यादिना । आक्षेपञ्च बाधयति - नैष दोषः । वक्ष्यत्येतत् - **'श्वादीनां सम्प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषधार्थम्'** इति । तत्प्रकृतमुत्तरत्रानुवर्तिष्यते - **'अल्लोपोऽनः'** इति। लोकव्यवहाराद् एकदेशपदेन ससम्बन्धिकतयोपस्थितौ अवयविधर्म एव विकारविशिष्टे आरोप्यते, न तु अवयव एवेति भावः । इह तर्हि लौकिकन्यायेन 'क्लृ3प्तशिखः' इत्यत्र 'अनृतः' इति प्रतिषेधः प्राप्नोति । नैष दोषः । अन्ते च पुनः प्रत्याख्यातृसमाधानवार्त्तिकं प्रस्तौति - 'रवत्प्रतिषेधाच्च' इति। रवत्प्रतिषेधाच्चैतत्सिध्यति । **'गुरोररवतः'** इति वक्ष्यामि ।

अत्र चाक्षेपयति - **'यदि 'अरवतः' इत्युच्यते तर्हि 'होतृ+ऋकारः-होतृकारः' अत्र न प्राप्नोति'** इति । एवं तर्हि **'गुरोररवतो ह्रस्वस्य'** इति वक्ष्यामि । तेन ह्रस्वस्यैव रवतः प्लुतनिषेधः न तु दीर्घस्य । वार्त्तिककारस्य लृकारोपदेशप्रत्याख्यानं निःप्रयोजनमिति साधयितुं सिद्धान्तभाष्यञ्चात्र विद्यते-**'स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन् प्रत्याख्यायते । सैषा महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते'** इति । एवं तत्प्लुताद्यर्थं विद्यमानस्य लृकारोपदेशस्य प्रत्याख्यानं महतो वंशस्तम्बाल्लट्वानुकर्षणमिव बह्वायाससाध्यमल्पफलमिव न युक्तम् । तस्माद् लृकारोपदेशः कर्तव्य एवेति महाभाष्यकारपतञ्जलेः सिद्धान्तः ।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई ।**

❖❖❖

# पस्पशाह्निकोक्तमन्त्रार्थविमर्शः

✍विदुषी बोल्ला

**महता श्रमेण सम्बद्धं वाङ्मयं निर्मथ्य व्याख्यानविशेषेण सनाथीकृत्य नानासन्दर्भानुपस्यन्ती मन्त्रोक्तपदानि नैकया विधया विमृशन्ती वाक्यार्थं च निरूपयन्ती गवेषिकात्र ''रक्षार्थं वेदानामध्येयं व्याकरणमि''ति प्रमाणयित्रीव भाति । (स०)**

'वेदोऽखिलो धर्ममूलम्'[1] इति निखिलधर्ममूलतया वेदः अवगम्यते, अस्याम्नायस्य शिक्षाव्याकरणच्छन्दोनिरुक्तज्यौतिषकल्पाख्यानि षडङ्गानि विश्वप्रसिद्धानि विराजन्ते । तत्र च 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्' इत्यभियुक्तोक्त्या पाणिनेः अष्टाध्यायी, वररुचेः वार्त्तिकानि, शेषावतारतया प्रख्यातस्य भगवत्पतञ्जलेः महाभाष्यञ्च देदीप्यन्ते । महाभाष्याब्धा चतुरशीतिराह्निकानि विद्यन्ते । तत्र प्रथमाह्निकमुपोद्घातत्वेन 'पस्पशा'[2] इति नाम्ना संश्रूयते । आह्निकेऽस्मिन्नादौ भगवता व्याकरणं पिपठिषद्भ्यः प्रयोजनम्, प्रयोजनप्रयोजनानि, प्रयोजकवचनानि चोक्तानि । तत्र प्रयोजनन्तु व्याकरणस्य 'शब्दानुशासनमि'[3] ति, प्रयोजनप्रयोजनानि 'रक्षोहाऽऽगमलघ्वसन्देहाः'[4] इति, प्रयोजकवचनानि च त्रयोदश विद्यन्ते - तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उतत्वः, सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण इति ।[5] प्रयोजकवचनेषु भगवता केचन मन्त्रा[6] उद्धृताः, ते च -

1. चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
   त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ3 आविवेश ।।
2. चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
   गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।
3. उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
   उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ।।
4. सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
   अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ।।
5. सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
   अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ।।

एतेषां मन्त्रणामर्थो विमृश्यते -

**प्रसङ्गः** - श्रीमद्भगवता पतञ्जलिना व्याकरणस्य प्रयोजकवचनेषु चत्वारि इति अष्टमं प्रयोजकमुक्तम् ।

**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धः वृषभो रोरवीति महो दवो मर्त्यॉं३ आविवेश ॥**

**मन्त्रसन्दर्भः** -

- **ऋग्वेदे** - मण्डलम् - 4, सूक्तम् - 58, मन्त्रसंख्या - 3, ऋषिः- वामदेवगौतमौ, देवता - अग्निः सूर्यो वाऽपो वा गावो वा घृतं वा ।
- **यजुर्वेदे** - अध्यायः - 17, मन्त्रसंख्या - 19, ऋषिः - वामदेवः, देवता - यज्ञपुरुषः ।

**अन्वयः** - अस्य चत्वारि शृङ्गा त्रयो पादा द्वे शीर्षे अस्य सप्त हस्तासः
त्रिधा बद्धो वृषभो महो देवो मर्त्यान् आविवेश (इति) रोरवीति ।

**पदार्थः** - चत्वारि - चतुःसंख्यकानि ।
शृङ्गा - शृङ्गाणि ='पश्वादीनां विषाणे' इति वाचस्पत्यम् । अत्र तु नामख्यातोपसर्गनिपाताश्च शृङ्गाणि इति ।

**त्रयः** - त्रिसंख्यकाः ।
अस्य - वृषभस्य ।
पादाः - चरणाः = कालरूपाः भूतभविष्यद्वर्त्तमानाः ।
द्वे - द्विसंख्यकाः ।

**शीष** - मस्तके 'उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः ।[7]
द्वौ शब्दात्मानौ नित्यः कार्यश्च ।
सप्त - सप्तसंख्यकाः ।
हस्तासः - पाणयः देहावयवभेदे इत्यमरः । अत्र विभक्तयः गृह्यन्ते ।
अस्य - वृषभस्य ।
त्रिधा - त्रिभिः प्रकारैः ।

**बद्धः** - प्रतिबद्धः, बन्धनयुक्तः ।
वृषभः - पुरुषगवः - 'ऋषभः वृषभः गौः' इत्यमरः ।
रोरवीति - पौनःपुन्येन शब्दं करोति ।
महः - मह्यते पूज्यते इति महः=पूज्यः ।
देवः - देवता = दीव्यते[8] क्रीड्यते यस्मात् रोचते द्योतते दिवि ।
तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैः ॥ इति वाचस्पत्ये ।
मर्त्यान् - मनुष्यान् विदुषः । मर्त्या मरणधर्माणो मनुष्याः इति महाभाष्ये मूल एवोक्तम् ।
आविवेश - समनुप्रविष्टः, स्वभेदमाविश्चकार इति ।

**वाक्यार्थः -**

वृषभाकारस्य शब्दस्य चत्वारि नामाख्यातोपसर्गनिपातरूपाणि शृङ्गाणि, त्रयः कालरूपाः भूतभविष्यद्वर्त्तमानाः पादाः, द्वे शब्दात्मानौ नित्यकार्यरूपौ शीर्षे, सप्त विभक्तिरूपाः हस्ताः सन्ति । एष वृषभः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः महान् देवः शब्दब्रह्म मनुष्यान् प्रविष्टवान् इति शब्दं करोति । अर्थात् वृषभाकारः शब्दशास्त्रप्रतिपाद्यः शब्दो रोरवीति महान् देवोन्तर्यामिरूपः शब्दः मर्त्यानाविवेश स्वाभेदमाविष्कृतवानिति मन्त्रतात्पर्यम्।

**व्याख्यानविशेषः -**

यद्यपि अयं मन्त्रो निरुक्ते वेदस्तुतिपरत्वेनान्यत्र अग्निस्तुतिपरत्वेन च व्याख्यातः, तथापि परमर्षिभिः ध्यानविशेषबलात् अनुसंहितम् अग्नितत्वं वेदतत्वं स्फोटतत्वञ्च कारणरूपेणैकमिति कृत्वा एष मन्त्रः स्फोटरूपशब्दस्तुतावपि विनियुज्यते । मन्त्रघटकशृङ्गा इत्यस्य शृङ्गानि इत्यवगन्तव्यम् । वेदे शृङ्गानि इत्यत्र 'शेश्छन्दसि बहुलम्'[9] इत्यनेन शिलोपे नलोपे च कृते शृङ्गा इति सिद्धयति । अथवा 'सुपां सुलुक्पूर्व-सवर्णाच्छेयाडाड्यायाजालः'[10] इत्यनेन शेर्डादेशे निष्पद्यते । नामाख्यातोपसर्गनिपातरूपाणि शृङ्गाणि इत्यत्र नामशब्देन सुबन्तः गृह्यते, 'नमत्याख्यातार्थं प्रति विशेषणी भवतीति' व्युत्पत्तेः। आख्यातमित्यनेन तिङन्तं बोध्यम्, 'आख्यातमाख्यातेन क्रियासातत्ये' इति गणसूत्रमत्र प्रमाणम् । उपसर्गनिपातयोः पृथगुपादानं ब्राह्मणवशिष्टन्यायेनोद्रम् । एवञ्चोपसर्गपदेन धात्वर्थ-द्योतकतामात्रवतामुपसर्गाणां तथा निपातेन धात्वर्थद्योतकत्ववाचकत्वोभयवतामुपसर्गातिरिक्त-निपातानां ग्रहणम् । तथा च शब्दात्मानौ नित्यः कार्यश्च व्यङ्ग्यव्यञ्जकभेदेन भवतः । व्यङ्ग्यः आन्तरः स्फोटात्मकः, व्यञ्जकः वैखरीरूपः ध्वन्यात्मकश्चानित्यो भवति । भर्तृहरिणाप्युक्तम् - **द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**[11]

मन्त्रघटकहस्तास इत्यस्य हस्ताः इत्यर्थः, छान्दसत्वात् 'आज्जसेरसुक्'[12] इत्यनेन असुकि देवासः इतिवद्रूपाणि प्रवर्त्तन्ते । सप्तविभक्तयः इति । अत्र विभक्तिशब्देन तत्प्रयोजकं कारकषट्कं षष्ठ्यर्थसम्बन्धश्च इति सप्तकं गृह्यते । तदेव प्रदीपेऽपि - तिङामपरिग्रहप्रसङ्गात् शेषेण सह सप्तकारकाणि विभक्तिशब्दाभिधेयानि इति व्याचक्षते।[13] छायाटीकानुसारं सप्तविभक्तय इत्यनेन सुपः तिङ्श्च गृह्यन्ते । भाष्ये उरसि कण्ठे शिरसि च त्रिधा बद्धः । अत्र च 'मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्', 'सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ।।' इत्यादि शिक्षावाक्यं लिङ्गम् । शिक्षाकारैः वर्णानाम् अष्ट उच्चारणस्थानानि सङ्गृहीतानि -

**'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।**
**जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥'**[14] **इति ।**

एतान्नेवात्र त्रिधा विभज्यन्ते - शिरसः मूर्धातः शिरः स्थानम्, कण्ठः, उरः इति । अत्र कण्ठपदेन ओष्ठप्रभृति आकाकलपर्यन्तरूपकण्ठान्तर्गतस्थानमात्रं गृह्यते । मन्त्रेऽस्मिन् वृषभः शब्दप्रतिपादकः । वर्षणात् = ज्ञानपूर्वकानुष्ठानफलत्वात् कामानां वर्षणात् वृषभः शब्दः । अत्र 'वृषु सेचने'[15] इत्येतस्मात् 'ऋषिवृषिभ्यां कित्'[16] इत्यौणादिकोऽभच् । लौकिको वृषभो वर्षतीति इत्युक्ते मूत्रेण भूमिं सिञ्चतीत्येतावदेव लोकप्रसिद्धम् । अयं शब्दरूपो वृषभः सर्वान् कामान् वर्षति । यतो हि ज्ञानपूर्वककर्मानुष्ठानात् हि काम्यसिद्धिः, ज्ञानञ्च व्याकरणज्ञानानुपूर्वकं वेदादिवाचनम् 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति'[17] इति श्रुत्या कामवर्षणस्योक्तत्वात् । अनया रीत्या एव मोक्षसिद्धिः भवति ।

एषः वृषभः नानाविवर्त्तशब्दैः व्यवहारं सम्पादयति, शब्दं करोति च महान् परब्रह्मस्वरूपः अन्तर्यामी शब्दः मरणधर्माणं प्रविष्टवान् । तस्य यथावज्ज्ञानेन उपासनेन च तत्सायुज्यं प्राप्नोति, तथा च हरिरप्याह -

**अपि प्रयोक्तुरात्मानं शब्दमन्तरमवस्थितम् ।**
**प्राहुर्महान्तं वृषभं येन सायुज्यमश्नुते ॥**[18] **इति**

श्रुतिश्च - 'सूक्ष्मामर्थेनाऽप्रविभक्ततत्वामेकां वाचमभिष्यन्दमानाम्, तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टाम्' इति । तथा च 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[19] इत्यनेन मन्त्रेण शब्दज्ञानां वैयाकरणानां सायुज्यरूपमोक्षः प्रतिपद्यते।

- केचिदर्थान्तरं ब्रुवते - अस्य ब्रह्मणः चत्वारि ऋग्यजुःसामाथर्ववेदाख्यानि, शृङ्गस्थानीयानि, त्रयः कर्मोपासनाज्ञानाख्याः पादाः, द्वे जीवेशरूपे शीर्षे, सप्त भूर्भुवः स्वर्महोजनतपः सत्याख्याः अतलवितलसुतलतलातलरसातलपातालमहातलाख्याश्च हस्तासः करद्वयस्थानीयाः, त्रिधा रजः सत्वेमोगुणैः बद्धः, वृषभः वृषभस्थः शिवः कल्याणमयः रोरवीति कथयति इत्यर्थः ।
- वेदान्तिनः ब्रह्मणः लक्षणमाहुः - अस्य वृषभस्य ब्रह्मणः चत्वारि शृङ्गा मनोबुद्धिरहङ्कारश्चित्तञ्चेति, त्रयः पादाः ज्ञानं कर्मोपासना चेति, द्वे शीर्षे त्रिपाद एकपादश्चेति, सान्तोऽनन्तश्चेति वा । सप्त हस्तासः सप्तप्राणाः, त्रिधा त्रिप्रकारेणसत्त्वर- जस्तमोभिर्बद्ध इति ।

**प्रसङ्गः -**

भगवद्भिः विरचिते महाभाष्ये व्याकरणाध्ययनस्य प्रयोजककथनावसरे चत्वारि इति अष्टमप्रयोजनमुक्तम् । भाष्ये 'चत्वारि' इतिपदघटितं मन्त्रद्वयमुदाहृतम्, अनेन व्याकरणमधीत्य मोक्षसिद्धिः कथमिति दर्शितम् । तत्र द्वितीयमन्त्रे विद्यते -

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥**

**मन्त्रसन्दर्भः** - ऋग्वेदः - मण्डलम् - 1, सूक्तम् - 164, मन्त्रसंख्या - 45, ऋषिः - दीर्घतमा औचथ्यः, देवता - वाक् ।

**अन्वयः** - चत्वारि वाक्परिमिता पदानि तानि ये ब्राह्मणा मनीषिणः विदुः, गुहा त्रीणि निहिता न इङ्गयन्ति मनुष्या वाचः तुरीयं वदन्ति ।

**पदार्थः** - चत्वारि - चतुःसंख्यकानि ।

**वाक्परिमितानि** - वाचः परिमितानि = परिच्छिन्नानि परिगणितानि एतावन्ति एव इति वाक्परिमितानि।

**पदानि** - पदजातानि ।

**तानि** - सर्वनाम्नः पूर्वपरामर्शकत्वात् पदजातानि इत्यर्थः ।

विदुः - विदन्ति, जानन्ति ।

ब्राह्मणाः - ब्रह्म = साङ्गोपाङ्गवेदं विदन्तीति ब्राह्मणाः ।

मनीषिणः - मनसः ईषिणो मनीषिणः = चित्तस्य वशीकर्त्तारः ।

गुहा - गुहायाम् अज्ञानरूपिगुहायाम् = हृदि ।

त्रीणि - त्रिसंख्यकानि ।

निहिता - निहितानि, निरुद्धानि ।

न इङ्गयन्ति - न चेष्टन्ते, न निमिषन्तीत्यर्थः ।

तुरीयम् - चतुर्थम् ।

वाचः - वाण्याः ।

मनुष्याः - मानवाः ।

वदन्ति - भाषन्ते, कथयन्ति ।

**वाक्यार्थः**- वाचः शब्दस्य चत्वारि परिच्छिन्नानि पदजातानि = नामाख्यातोपसर्गनिपातरूपाणि, परापश्यन्तीमध्यमावैखरीरूपाणि च तानि ये ब्राह्मणाः साङ्गोपाङ्गवेदं विदन्ति वैयाकरणाः मनीषिणः = मनसः संयमिनः जानन्ति ।

अवैयाकरणानां तदज्ञाने हेतुः द्वितीयपङ्क्तौ उक्तम् - गुहायामज्ञानरूपायां मूलाधार-नाभि-हृदयरूपायाञ्च, त्रयाणां नामादीनामंशचतुष्टयान्तर्गतमंशत्रयं, परा-पश्यन्ती- मध्यमात्रयञ्च निहितं निरुद्धम्, अत एव न प्रकाशते । मनुष्याः = अवैयाकरणाः वाचः नामादिरूपायाः तुरीयं चतुर्थांशमात्रं वदन्ति । तथाच परादिरूपायाः वाचः तुरीयं वैखरीमात्रं वदन्ति ।

**व्याख्यानविशेषः** -

मन्त्रघटकपरिमिता इत्यस्य परिमितानि इत्यर्थः, अत्र 'शेशछन्दसि बहुलमि'[20] ति शेर्लोपे परिमितेति सिद्ध्यति । परिमितत्त्वं परिमाणवत्त्वं शब्दे न सम्भवति, अत आह कैयटेन प्रदीपे (वागिति 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[21] इति लुप्तषष्ठ्यन्तमुक्तम् इति)

परिच्छेदकत्वात् संख्यापि परिमाणमित्युच्यते इति । परिच्छिन्नानि परिगणितानि एतावन्ति एव इत्यर्थः । वाक्परिमितानि इत्यत्र नागेशेन वाचः परिमितानि इति षष्ठीतत्पुरुषः स्वीक्रियते, अन्ये विद्वान्सः अत्र प्रथमान्तपदं स्वीकुर्वन्ति, यतो हि अत्र भिन्नभिन्नस्वराः दृश्यन्ते, एकपदं भवति चेत् शेषनिघातो भूत्वा एक एव स्वरः शिष्यते । भाष्ये चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च इत्यत्र चकारग्रहणेन श्रीनागेशेन उद्योते परापश्यन्तीमध्यमावैखर्यः गृह्यन्ते । तत्र परादीनां परिचयोयथा -

**'परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥'[22] इति ॥**

**परा वाक्** - मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । वागुच्यते ।[23]

**पश्यन्ती वाक्** - नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते ।[24]

**मध्यमा वाक्** - हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणाऽयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिर्निर्ग्राह्या मधयमा वागुच्यते ।[25]

**वैखरी वाक्** - आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते ।[26]

मन्त्रोक्तमनीषिण इति पदस्य श्रीमद्भगवता पतञ्जलिना मनसः ईषिणः मनीषिणः इति विगृह्यते, नागेशास्तु चित्तशुद्धक्रमेण वशीकर्त्तारो विषयान्तरेभ्यो व्यावृत्या हिंसका वा इति निर्दिदिशुः । कैयटास्तु अस्य पृषोदरत्वात्साधुत्वं प्रतिपादयाञ्चक्रुः । अर्थात् धातूनामनेकार्थतया वशीकरणर्थतां भजते, 'ईष उञ्छे'[27] इत्यस्य 'ईश ऐश्वर्ये'[28] इत्यस्य वा पृषोदरत्वा[29] त्षान्ततामाश्रयन्तो मनीषिणः इति सिद्ध्यते । शब्दोऽयं 'ईष गतिहिंसादर्शनेषु'[30] इति धातोरपि निष्पद्यतेऽत आह - हिंसका इति, मनसो विषयान्तरव्यावृत्तिरेव हिंसाऽस्ति । रत्नप्रकाशकारस्त्वत्रमनसः ईषिणः इति सम्बन्धसामान्ये षष्ठी, मनसा व्याकरणसंस्कृतेन ईषन्ते सर्वं जानन्तीति भावः । मनश्शब्दे तृतीयान्त उपपदे ज्ञानार्थात् 'ईष गतिहिंसादर्शनेषु'[31] इति भ्वादौ पठितात् 'सुप्यजातौ णिनिस्ताच्छील्ये'[32] इति णिनिः । पृषोदरादित्वात्[33] सलोपः। शकन्धवादित्वात्पररूपम् ।[34] मन्त्रोक्तगुहा इत्यस्य गुहायामित्यर्थः, 'सुपां सुलुक्पूर्वसवर्णाच्छे-याडाड्यायाजालः'[35] इत्यनेन ङेर्लुप्यते । तुरीयमित्यत्र तु 'चतुरश्छयतावाद्यक्षरलोपश्च'[36] इति छप्रत्यये सति सिद्ध्यति ।

विदुषामविदुषाञ्चेयानेव भेदो वर्त्तते - ये विद्वान्सः सन्ति, ते नामाख्यातो-पसर्गनिपातांश्चतुरो जानन्तीति भावः । तेषां त्रीणि ज्ञानस्थानानि विद्यन्ते, चतुर्थं सिद्धं शब्दसमूहं प्रसिद्धे व्यवहारे वदन्ति च । ये चाविद्वान्सः ते केवलं निपातरूपं साधनज्ञानरहितं सिद्धशब्दं प्रयुञ्जते । तस्मात् निपातशब्दोऽत्र न पाणिनीयसङ्केतसम्बन्धेन निपातपदसञ्ज्ञकः

अपितु सिद्धशब्दवाचकः । अर्थात् अविद्वांसः शास्त्रीयप्रक्रियां न विदन्ति, ते प्रक्रियाज्ञानशून्यं सिद्धशब्दमेव प्रयुञ्जते ।

**निरुक्ते तु मन्त्रार्थः**[37] -

नामाख्यातोपसर्गनिपाताः वाचः । अत्र 'सुपांसुलु- क्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[38] ङसो लुक्, परिमाणयुक्तानि वेदितुं योग्यानि जानन्ति व्याकरणवेदेश्वरवेत्तारः मनसो दमनशीलाः । गुहायां बुद्धौ नामाख्यातोपसर्गाः धृताः, न चेष्टन्ते, चतुर्थं निपातं वाण्याः साधारणजनाः उच्चारयन्ति । निरुक्तेऽस्य मतान्तराण्यपिनिर्दिश्यन्ते, तदनुसारं व्यक्तिभेदेन पदजातस्य भेदः परिलक्ष्यते । तद्यथा - ऋषीणाम् - ओंकारः, भूः, भुवः, स्वः इति महाव्याहृतीनाम् ।

**याज्ञिकानाम्** - मन्त्रः, कल्पः, ब्राह्मणम्, व्यावहारिकी वाक् च ।

**नैरुक्तानाम्**- ऋक्, यजुः, साम, व्यावहारिकी वाक् च ।

**अन्याचार्याणाम्** - सर्पाणां पक्षिणां क्षुद्रसरिसृपाणाञ्च वाक्, व्यावहारिकी वाक् च ।

**प्रसङ्गः** - व्याकरणाध्यनस्य प्रयोजकवचनेषु भगवता शेषेण नवमं प्रयोजकमुतत्वः इत्युदाहृतम् । अस्मिन् मन्त्रे वागधिष्टातृदेवताप्रसादजनकत्वं व्याकरणाध्ययनेन साध्यते -

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥**

**मन्त्रसन्दर्भः** - ऋग्वेदः - मण्डलम् - 10, सूक्तम् - 71, मन्त्रसंख्या - 4, ऋषिः-बृहस्पतिः, देवता - ज्ञानम् ।

**अन्वयः** - उत त्वः पश्यन् न ददर्श, उत त्वः शृण्वन् एनां वाचं न शृणोति, उतो त्वस्मै सुवासाः पत्ये उशती जाया इव तन्वं (वाग्देवी) विसस्रे ।

पदार्थः - उत - अप्यर्थकः ।

त्वः - अन्यवाचकः (अवैयाकरणः) ।

पश्यन् - वक्तुर्व्यवहारं साक्षात् कुर्वन् ।

न ददर्श - न पश्यति ।

वाचम् - वाणीम् ।

उत - अप्यर्थकः ।

त्वः - अन्यवाचकः ।

शृण्वन् - श्रोत्रेन्द्रियेण साक्षात्कुर्वन् ।

न शृणोति - न श्रवणविषयीकरोति (प्रकृतिप्रत्ययविभागेन साकल्येन न जानाति) ।

एनाम् - वाचम् ।

उतो - उत उ इति निपातसमुच्चयः आश्चर्यसूचकः ।

त्वस्मै – अन्यस्मै वैयाकरणाय ।

तन्वं – शरीरम् ।

विसस्रे – विवृणुते ।

जाया इव – 'भार्या जायाऽथ पुंभूम्नि दाराः' इत्यमरः[39] पत्नी इव ।

पत्ये – भर्त्रे ।

उशती – कामयमाना ।

सुवासाः – शोभनं निर्णिक्तं वासः वसनं यस्याः रजोनिर्मुक्तिस्नानानन्तरं परिहि–तधौतवसना ।

**वाक्यार्थः** –

केचित् पश्यन्नपि स्वभ्यस्ताध्ययनोऽपि तीक्ष्णबुद्धिरपि सन्न पश्यति अर्थानभिज्ञत्वात्। एवमेकः शृण्वन्नपि न शृणोत्येनां वाचम् (य एव ह्यर्थं सम्यगवबुद्धयते तेनैव सा सम्यक् श्रुता भवति) । एवमर्द्धेनाविद्वान्सं निन्दित्वाऽर्धान्तरेण विद्वान्सं स्तौति – अप्येकस्मै कस्मैचिद् वैयाकरणाय तन्वं शरीरं विवृणोति प्रकाशयति । यथा – निर्णिक्तवासा जाया विवृतसर्वाङ्गावयवाभूत्वोशतो कामयमाना भर्त्रे प्रेम्णा दर्शयत्यात्मानम् ।

**व्याख्यानविशेषः** – अस्यां ऋचि पूर्वार्द्धेनार्थस्य अनभिज्ञानां निन्दा, उत्तरार्द्धेधेन तु अर्थाभिज्ञानां स्तुतिर्वर्त्तते । अस्यां पूर्वार्द्धे वाचः द्वौ निर्दिशतः । एकस्तु वाण्याः श्यस्वरूपम्, अपरस्तु अस्याः श्रव्यस्वरूपञ्च । वाण्याः – श्यस्वरूपं लिप्यात्मकम्, अस्याः श्रव्यस्वरूपन्तु ध्वन्यात्मकं वर्त्तते ।

केचन पाश्चात्त्यविद्वान्सः – 'आर्याः लिपिं न जानन्ति स्म' वेदस्य श्रुतिः इति नामान्तरमेव अस्य लिप्यभावस्य प्रामाण्यमिति वदन्ति । तन्न, वेदस्य पठनं गुरुमुखात् मन्त्रश्रवणपूर्वकमेव भवति इति रीत्याऽपि अस्य नाम श्रुतिः इति भवितुमर्हति । गुरुमुखात् अध्ययनपरम्परायास्तु बहूनि प्रयोजनानि सन्ति, तत्रैकन्तु एतदपि दृश्यते यत् पाठान्तरमाधिक्येन न भवति इति । यद्वा छात्रस्य बुद्धेः तैक्ष्ण्यार्थमपि श्रुतिपरम्परया एव पाठयाञ्चक्रुः । एवञ्च सः विद्वान् एवैनां वाचं पदशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थमेनां पश्यति शृणोति चेत्यर्थः । अत्र वागर्थयोः तादात्म्यमपि द्योतितम् – अप्यर्थक उत इत्यव्ययेन । अर्थात् उभयोः तादात्म्यात् उभयज्ञानमावश्यकं ध्वनिं श्रुत्वा झटिति अर्थस्य ज्ञानं भवेत्, किन्तु एवं वैयाकरणानां कृते एव साध्यम् । यतो हि व्याकरणाध्ययनं विना शब्दश्रवणेन परिष्कृतार्थबोधभावात् पशुपक्षिणां रववत् व्यथः एव ।

अत्र मन्त्रे ददर्श, विसस्रे इति लिड्लकारप्रयोगौ उक्तौ, छान्दसत्वात् 'छन्दसि लुङ्लङ्लिटः'[40] इति वर्त्तमाने व्यत्ययेन लड्लकारस्य स्थाने लिड्लकारः प्रयुक्तः । सुवासाः[41]= शोभने वाससी यस्याः सा । त्वशब्दोऽन्यवाचकः सर्वनामशब्दः, तस्य चतुर्थीविभक्तौ त्वस्मै इति रूपं भवति । मन्त्रेऽस्मिन् एक उतशब्दो निश्चयवाचकः, द्वितीयः

अप्यर्थकः विद्यते । तन्वमित्यत्र छान्दसत्वात् 'अमि पूर्वः'[42] इत्यत्र 'वा छन्दसि'[43] इत्यनुवृत्त्या तन्वमित्यत्र यणादेशः भवति । सावाग्देवी विवृणुते इत्यस्य कठोपनिषदि प्रमाणन्तु - 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' इति श्रुत्या उपास्योपासकयोरभेदावस्थायामुपास्यं स्वयमेव स्वस्वरूपमुपासकाय प्रकाशयति इति बुद्ध्यते ।

**प्रसङ्गः** - व्याकरणाध्ययनस्य गौणप्रयोजनेषु सक्तुमिव इति दशमप्रयोजने एष मन्त्रेदाहृतः ।

**सक्तुमिव तितउनापुनन्तो यत्र धीरा मनसा वाचमक्रत ।**
**यः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥**

**मन्त्रसन्दर्भः** - ऋग्वेदः - मण्डलम् - 10, सूक्तम् - 71, मन्त्रसंख्या - 2,

**ऋषिः** - बृहस्पतिः, देवता - ज्ञानम् ।

**अन्वयः** - तितउना सक्तुमिव पुनन्तः यत्र धीराः मनसा वाचम् अक्रत । अत्र सखायः सख्यानि जानते एषां लक्ष्मीः भद्रा निहिता ।

**पदार्थः** - सक्तुम् इव - सक्तुरिति पिष्टान्नविशेषः, तदिव ।

**तितउना** - चालन्या ।

पुनन्तः - तुषराहित्यं सम्पायन्तः ।

यत्र - यस्यां वाचि ।

धीराः - ध्यानशीलाः ।

मनसा - साध्वसाध्ववधानेन ।

वाचम् - अपभ्रंशरहितां वाणीम् ।

अक्रत - कृतवन्तः ।

अत्र - अस्याम् वागधिष्ठातृदेवतायाम् ।

सखायः - सख्यं प्राप्ताः ।

सख्यानि - सायुज्यानि ।

जानते - अनुभवन्ति ।

भद्रा - निश्रेयस्कारिणी ।

एषां - सख्यभावयुतां सायुज्यशालिनाम् ।

लक्ष्मीः - परमार्थसंविद्रूपा ।

निहिता - सन्निहिता भवति ।

अधिवाचि - वेदान्तादौ वर्ण्यमाना ।

**वाक्यार्थः** - चालन्या सक्तुमिव पुनन्तः, वाचि ध्यानशीलाः प्रज्ञानेन अपभ्रंशरहितां वाणीं कृतवन्तः। अस्यां वागधिष्ठातृदेवतायां सख्यभावं प्राप्ताः सायुज्यानि अनुभवन्ति, एषां सख्यभक्तिमतां सायुज्यशालिनां वेदान्तादौ वर्ण्यमाना लक्ष्मीः परमार्थसंविद्रूपा निःश्रेयस्करी सन्निहिता भवति ।

**व्याख्यानविशेषः -**

मन्त्रोक्तसक्तुरिति शब्दः भाष्यकारेण द्विधा साध्यते -

सचतेर्दुर्धावो भवति - सच् धातोः - 'षच सेचने'[44], 'षच समवाये'[45] इति धातुभ्यां कर्मणि औणादिके तुनि कत्वे च सक्तुरिति निष्पन्नः, दुर्धावार्थबोधको भवति । दुर्धावः इत्यस्य दुःखेन धावयितुं योग्य इति व्युत्पत्तिः । अत्र दुःपूर्वाद्धावेः[46] 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलु'[47] इति सूत्रेण कर्मणि खलि दुर्धावः इति सिद्धयति ।

यद्वा कसतेर्वा विपरीताद्विकसितो भवति - 'कस गतौ'[48] इत्यस्माद् विपरीतात् पृषोदरादित्वात्[49] वर्णव्यत्ययेन कर्मणि औणादिके तुनि सक्तुरिति निष्पन्नः, विकसितार्थ-बोधकः धातूनामनेकार्थत्वाद् भवति ।

मन्त्रोक्ततितउशब्दः चालनीबोधकः - 'चालनी तितउः पुमानिति' कोशात् ।[50] अत्र 'तनु विस्तारे'[51] इति धातोः 'तुद व्यथने'[52] इति धातोश्च 'तनोतेर्डः उः सन्वच्च'[53] इति औणादिकेन सूत्रेण सिद्धयति, अर्थस्तु ततवद् अर्थात् विस्तारयुक्तमित्यर्थः । तुन्नवत् इति नाम बहुच्छिद्रयक्तञ्च । अत्र विस्तारयुक्तत्वेन शूर्पादेः, छिद्रयुक्तत्वात् चालिन्याः ग्रहणम् । धीरा इति धाधातोः[54] औणादिकक्रनि 'घुमास्थागापाजहातिसां हलि'[55] इत्यनेन साधुः । अक्रत इति तु 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः'[56] इत्यनेन च्लिप्रत्ययस्य लुकि सति यणादेशे सिद्धयते । अत्र इत्यत्र 'ऋचि तनुघमक्षुतङ्कुत्रेरुष्याणाम्'[57] इति दीर्घः । लक्ष्मीरिति तु 'लक्ष दर्शनाङ्कनयोः'[58] इति धातोः 'लक्षेर्मुट् च'[59] इत्यनेन औणादिकमुडागमे ईत्वे च कृते सिद्धयते। भासनार्थकशब्दोऽयम् ।

**अयं निष्कर्षः -**

ये ब्रह्मणि विषये वाणीं वेदरूपां व्याकरणाध्ययनेन परिष्कृतवन्तः, ते 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[60] इति सायुज्यरूपं मोक्षं प्राप्नुवन्ति । एषा ज्ञानरूपा लक्ष्मीः वेदान्तेषु निर्दिष्टाऽऽस्ते । वाक्यार्थज्ञाने पदज्ञानं कारणमिति धिया वेदान्तवाक्यार्थानां व्याकरणाध्ययनाधीनत्वात् व्याकरणमवश्यमध्येयमिति ।

**प्रसङ्गः -**

श्रीमच्छेषावतारेण पतञ्जलिना महाभाष्ये व्याकरणस्यान्तिमगौणप्रयोजनत्वेन मन्त्रोऽयं प्रस्तुतः ।

**सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥**

**मन्त्रसन्दर्भः** - ऋग्वेदः - मण्डलम् - 8, सूक्तम् - 69, मन्त्रसंख्या -12, ऋषिः - प्रियमेधः, देवता - वरुणः ।

**अन्वयः** - वरुण ! सुदेवः असि, यस्य ते सप्त सिन्धवः काकुदम् अनुक्षरन्ति सुषिरां सूर्म्यम् इव।

**पदार्थः**-सुदेवः - सत्यदेवः ।

असि - वर्त्तसे ।

वरुण - वरुणदेव !

यस्य - पञ्चम्याः स्थाने व्यत्ययेन षष्ठी = यस्मात् हेतोः इत्यर्थः ।

ते - 'सर्वनाम्नां बुद्धिस्थपरामर्शित्वात्' ते इत्यस्य सप्त सिन्धवः इत्यर्थः ।

सप्त - सप्तसंख्यकाः ।

सिन्धवः - समुद्राः ।

सूर्म्यम् - 'सूर्मिः स्थूणाऽयः प्रतिमायामि'ति कोशः ।[61]

सुषिरामिव - सुच्छिद्राम् इव ।

**वाक्यार्थः -**

हे वरुण ! सत्यदेवोऽसि । यस्मात् सप्त विभक्तितुल्याः सिन्धवः तालु प्राप्य प्रकाशन्ते । तालुस्थापशब्दान् अपाकुर्वन्ति । यथा सुच्छिद्रामयः प्रतिमामग्निः प्रविश्य तत्रत्यं मलं भस्मीकृत्य तां प्रतिमां परिष्करोति ।

**व्याख्यानविशेषः -**

मन्त्रेऽस्मिन् सुदेवो असि इत्यत्र 'प्रकृत्याऽन्तः पादमव्यपरे'[62] इति सूत्रेण प्रकृतिभावात् 'एङः पदान्तादति'[63] इति सूत्रेण पूर्वरूपं न भवति । सूर्म्यमित्यत्र सूर्मीमिति भवति, अत्र 'अमि पूर्वः'[64] इत्यत्र 'वा छन्दसि'[65] इत्यनुवृत्त्या व्यत्ययेन यणादेशो वर्त्तते । दीव्यते[66] द्योत्यते इति देवः, व्याकरणाध्ययनाद्यथा वरुणः सत्यदेवत्वमवाप्य स्वर्गे वसति, तथैव वैयाकरणाः अपि देवत्वमाप्नुवन्ति । अर्थात् यथा व्याकरणज्ञानेन जन्यपुण्यविशेषाद् वरुणेन सत्यदेवत्वमवापि तथैव सर्वैः व्याकरणज्ञानेन शारीरमलमपाकृत्य स्वर्गः प्राप्यते ।

**सन्दर्भाः**


1. मनुस्मृतिः 1.125 ।
2. स्पश बाधस्पर्शनयोः इति धातोः पुनः अतिशयेन वा स्पशतीति विग्रहे यङ्लुगन्तात् पस्पशधातोः अचि टापि पस्पशा - उपोद्घातः इत्यर्थः ।
3. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 3 ।
4. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 13 ।
5. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 17 ।
6. अनाम्नातेष्वमन्त्रत्वम् पू. मी. 2.1.34 ।
7. अमरकोशः द्वितीयकाण्डम्, मनुष्यवर्गः - 95, पृ. सं. 236 ।
8. दिवादिगणे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदनमदस्वप्नकान्तिगतिषु' - 11 ।
9. अष्टाध्याय्यां 6.1.68 ।
10. अष्टाध्याय्यां 7.1.39 ।
11. वाक्यपदीयम्, ब्रह्मकाण्डम् - 44, पृ. सं. 100 ।

12. अष्टाध्याय्यां 6.1.68 ।
13. व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, पृ. सं. 24 ।
14. आपिशलशिक्षा 8.24/पाणिनीयशिक्षा 8.28 ।
15. भ्वादिगणे 468 ।
16. उणादिकोशः, 3.123, पृ. सं. 270 ।
17. इयं श्रुतिः 6.1.84 सूत्रे महाभाष्ये उदाहृता ।
18. ब्रह्मकाण्डम्, 122 - 130, पृ. सं. 199 ।
19. ब्रह्मबिन्दूपनिषद 17 ।
20. अष्टाध्याय्यां 6.1.68 ।
21. अष्टाध्याय्यां 7.1.39 ।
22. परमलघुमञ्जूषा, स्फोटनिरूपणम् ।
23. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
24. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
25. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
26. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
27. भ्वादिगणे 461 ।
28. अदादिगणे 10 ।
29. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
30. भ्वादिगणे 406 ।
31. भ्वादिगणे 406 ।
32. अष्टाध्याय्यां 3.2.78 ।
33. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
34. शकन्ध्वादिषु पररूपं वाच्यम् ।
35. अष्टाध्याय्यां 7.1.39 ।
36. वार्त्तिकं षट्कतिकतिपयचतुरां थुक् ।
37. 13.9.45 ।
38. अष्टाध्याय्यां 7.1.39 ।
39. अमरकोषः, द्वितीयकाण्डम्, मनुष्यवर्गः, 6 पृ. सं. 204 ।
40. अष्टाध्याय्यां 3.4.6 ।
41. बहुव्रीहिसमासः ।
42. अष्टाध्याय्यां 6.1.103 ।
43. अष्टाध्याय्यां 6.1.102 ।

44. भ्वादिगणे 97 ।
45. भ्वादिगणे 723 ।
46. भ्वादिगणे 397 ।
47. अष्टाध्याय्यां 3.3.126 ।
48. भ्वादिगणे 599 ।
49. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
50. अमरकोषः द्वितीयकाण्डम्, वैश्यवर्गः, 26, पृ. सं. 310 ।
51. तनादिगणे 1 ।
52. तुदादिगणे 1 ।
53. उणादिकोषः, 5.52, पृ. सं. 470 ।
54. जुहोत्यादिगणे 'डुधाञ् धारणपोषणयोः' 10 ।
55. अष्टाध्याय्यां 6.4.66 ।
56. अष्टाध्याय्यां 2.4.80 ।
57. अष्टाध्याय्यां 6.3.132 ।
58. चुरादिगणे 5 ।
59. उणादिकोषः, 3.160 ।
60. बिन्दूपनिषद् 17 ।
61. अमरकोषः, द्वितीयकाण्डम्, शूद्रवर्गः - 35, पृ. सं. 349 ।
62. अष्टाध्याय्यां 6.1.111 ।
63. अष्टाध्याय्यां 6.1.105 ।
64. अष्टाध्याय्यां 6.1.103 ।
65. अष्टाध्याय्यां 6.1.102 ।
66. दिवादिगणे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' 1 ।

**उपयुक्तग्रन्थसूची**


1. व्याकरणमहाभाष्यम्, षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् - 2067
2. महाभाष्यम्, प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 1982.
3. व्याकरण महाभाष्यम, प्रथमसंस्करण, श्री मोतीलाल बनारसीदास, दिल्ली, सम्वत् - 2025.
4. पातञ्जलं महाभाष्यम्, द्वितीयं संस्करणम्, वाणीविलास प्रकाशन, वाराणसी, 1988
5. व्याकरणमहाभाष्ये नवाह्निकम्, पञ्चमं संस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, 1951.
6. Critical studies on the MAHABHASHYA, by V.P. Limaye, V.V.R.I. press, Hoshiyarpur, 1974.

7. महाभाष्यप्रदीपव्याख्यानानि – Institute FrancaisD'indologie, Pondichery, 1973.
8. व्याकरणमहाभाष्यम् (नवाह्निक), प्रदीपोद्योततत्त्वालोकटीकासमुल्लसितम्, षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् – 2067.
9. मनुस्मृतिः (सान्वयानुवादमनुभाष्यभासिकाभावावगाहिनी भाषाटीकोपेता), प्रथम संस्करणम्, जे. पी. पब्लिशिंग हाउस, दिल्ली, 2004.
10. अमरकोषः, (रामाश्रमीसुधाटीकासहितः), द्वितीयसंस्करणम्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987.
11. महाभाष्यम् (हिन्दीव्याख्यया सहितम्), युधिष्ठिरमीमांसकाः, प्रथमसंस्करणम्, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट), दिल्ली, वि.सं.2029.
12. संस्कृत व्याकरण मे गणपाठ की परम्परा और आचार्य पाणिनि, प्रथमावृत्ति, भारतीय-प्राच्यविद्या-प्रतिष्ठान, वि.सं. 2018.
13. VAKYAPADEEYA OF BHARTIHARI with the Vritti and the PADDHATI OF VRISHABHADEVA, Poona-1966.
14. उपनिषदायन, माघवानन्द मैनाली 'मधु', प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 2013.
15. ऋग्वेदसंहिता, डा.जियालाल कम्बोज, प्रथमसंस्करण, विद्यानिधि प्रकाशन, दिल्ली, 2010.
16. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सप्तदशं संस्करणम्, राधाप्रेस, दिल्ली, 2005.
17. धातुपाठः, षष्ठसंस्करणम्, मन्त्री रामलाल कपूर ट्रस्ट, सोनीपत, 2000.
18. परमलघुमञ्जूषा (किरणावली-संस्कृतव्याख्योपेतहिन्द्यानुवादसहिता), पुनर्मुद्रित-संस्करणम्, चौखम्बा सुरभारती प्रकाशन, 2011.
19. वैयाकरणसिद्धान्तदिग्दर्शनम्, प्रो.बोधकुमारझाः, प्रथमसंस्करणम्, रचना प्रकाशन, जयपुर, 2006.

**उपयुक्तसंसाधनम्**

1. Online Ved 2.वाचस्पत्यम् । 3.शब्दकल्पद्रुमः ।

**शोधच्छात्रा, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्( मा.वि ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

❖❖❖

# सिद्धे शब्दार्थसम्बन्धे

✍श्री ईशान्तः

**व्याकरणशास्त्रे शब्दः स्फोटात्मकः । लोकव्यवहारे च तदेव ध्वन्यात्मकत्वेन प्रसिद्धः । अर्थोऽपि द्विविधः । आकृतिरूपः, द्रव्यरूपश्च। एवं सम्बन्धोऽपि द्विविधः । नित्यः अनित्यश्च । तस्मात् सर्वत्रैव द्विविधत्वात् कात्यायनेन वार्त्तिकेनानेन विशेषः प्रतिपाद्यते । इदं न सम्पूर्णं वार्त्तिकम्, अपितु वार्त्तिकांश एव । सम्पूर्णं वार्त्तिकन्तु 'सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु' इति । तदेतस्मिन् शोधलेखे महाभाष्ये प्रतिपादितस्य विचारस्य बिन्दुशो विश्लेषणम्, आवश्यकं विवरणम्, पूर्वपक्षसिद्धान्तपक्षयोः सयुक्तिकं व्यवस्थापनम्, परिशुद्धभाषाशब्दप्रयोगः, शास्त्रीया प्रतिपादनशैली च पाठकान् नूनं परितोषयिष्यतीति भावयामि । (स०)**

लोपागमवर्णविकारप्रकृतिप्रत्ययविभागज्ञानविज्ञानकुशलानां नानाविधवाग्रागरञ्जितचेतसां शुद्धशेमुषीजुषां साधुत्वाऽसाधुत्वज्ञाने सुविख्यातवैदुष्यप्रवीणानां वैयाकरणानां मते शब्दानामेव प्रामाण्यं स्वीक्रियते । तदुक्तं व्याकरणमहाभाष्ये श्रीमता भगवता पतञ्जलिना –

**शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम् ।**[1] इति

वेदाः मानवसंस्कृतेर्मूलभूता महानिधयः । अपौरुषेयत्वात् ईश्वरोपदिष्टत्वाच्च ते नित्याः। सर्वाण्यपि शास्त्राणि शब्दमयानि । यतो हि सर्वेषां ज्ञानानां मूलं शब्दाः एव । नैतादृशं किञ्चिद् ज्ञानं दृश्यते यत् शब्दानुगमाद् ऋते भवेत् । तदाह भर्तृहरिः –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।**[2]

व्याकरणं खलु शब्दानुशासनमिति कथ्यते । इह प्रकृतिप्रत्ययविभागेन सामान्यविशेषवता लक्षणेन च शब्दानां साधुत्वस्यानुशासनं क्रियते । अर्थप्रत्यायनार्थः शब्दप्रयोगो भवति । स च अपभ्रंशैः असाधुभिरपि शब्दैः भवितुमर्हति, तथापि साधुभिरेव शब्दैरर्थबोधः कार्य इति शिष्टपरम्परा । अत्र च हेतुर्भगवता पतञ्जलिना दर्शितः –

समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देन इत्येवं क्रियमाणमभ्युदयकारि भवतीति ।[3]

पाणिनिनाचार्येण अष्टाध्याय्यां 'पृषोदरादीनि यथोपदिष्टम्'[4] प्रभृतिभिः सूत्रैः वार्तिककारेण कात्यायनेन 'सिद्धे शब्दार्थसम्बन्धे, सिद्धे तु नित्यशब्दत्वात्'[5] इति

वार्त्तिकाभ्याम्, भगवता पतञ्जलिना महाभाष्ये च 'नित्याः शब्दाः, नित्येषु च शब्देषु कूटस्थैः अविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः'[6] तथा च -

**सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥[7]**

प्रभृतिभिर्वाक्यैः शब्दाः नित्याः इत्येव सिद्धान्तितम् । एवञ्च वैयाकरणानां मते शब्दाः, शब्दार्थाः, शब्दार्थसम्बन्धाश्च नित्याः एव । तदुक्तं भर्तृहरिणा -

**नित्याः शब्दार्थसम्बन्धाः सा माम्नाताः महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥[8]**

व्याकरणमहाभाष्ये भगवता पतञ्जलिना - किं पुनर्नित्यः शब्दः? आहोस्वित् कार्यः इति प्रश्नमुपस्थाप्योक्तम् -

आचार्यव्याडेः सङ्ग्रहग्रन्थे एतत् प्राधान्येन परीक्षितम् - नित्यो वा स्यात् कार्यो वेति। तत्रोक्ताः दोषाः, प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णयो यद्येव नित्योऽथापि कार्यः । उभयथाऽपि लक्षणं प्रवर्त्यमिति । अतः परं कथम्पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्? शब्दं नित्यं मत्वा, अनित्यम्मत्वा, उभयं वा मत्वेति जिज्ञासायामाह पतञ्जलिः-

**''सिद्धे शब्दार्थसम्बन्धे''[9]**

अत्र भगवता पतञ्जलिना सिद्धे शब्दे अर्थे सम्बन्धे चेति विग्रहमुखेन साधितं यत् शब्दः अर्थः सम्बन्धश्च नित्यः एव । तत्र-

**१. पूर्वप्रसङ्गः -**

''सिद्धे शब्दार्थसम्बन्धे लोकतः अर्थप्रयुक्ते शास्त्रेण धर्मनियमः यथा लौकिकवैदिकेषु''[10] इति सम्पूर्णं वार्त्तिकम्, तस्य वार्त्तिकस्य चतुर्भिः खण्डैः विभज्य व्याख्यायते भाष्यकारेण । तत्र आदौ सिद्धशब्दस्य नित्यपर्यायत्वमुक्त्वा, लोकतः इति वार्त्तिकखण्डं व्याख्याय, अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः इति वार्त्तिकभागं तदुत्तरं यथा लौकिकवैदिकेषु इति वात्तिंकांशं चात्र व्याख्यायते ।

**२. सिद्धशब्दस्य नित्यपर्यायत्वनिराकरणं तद्व्यवस्थापनञ्च-**

**२.१ सिद्धशब्दस्य लोकोदाहरणेन नित्यपर्यायत्वसाधनं निराकरणञ्च-**

आदौ सिद्धशब्दस्य नित्यपर्यायत्वं लोकोदाहरणेन व्यवस्थाप्यते । तदुत्तरं तन्निराकृत्य पुनः तस्य सिद्धशब्दस्य चतुर्भिः प्रकारैः नित्यपर्यायत्वं व्यवस्थाप्यते अत्र ।

वात्तिंके सिद्धशब्दस्य नित्यः इत्यर्थः । अत्र भाष्यवचनमिदं ''नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते । यत्कूटस्थेषु अविचालिषु भावेषु वर्त्तते । तद्यथा सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ।'' कूटं नाम अयोघनः तद्वत्तिष्ठन्ति ये तेषु सिद्धशब्दः वर्तते । कूटस्थाः नाम विनाशरहिताः । अविचालिषु नाम देशान्तरप्राप्तिरहितेषु । एवञ्च अत्र कूटस्थेषु अविचालिषु रूढः सिद्धशब्दः प्रयुक्तः । सिद्धशब्दः नित्यपर्यायत्वेनापि क्वचित् प्रयुज्यते,

क्वचित् कार्यपर्यायत्वेनापि प्रयुज्यते । एवं सति वार्त्तिकप्रयुक्तसिद्धशब्दः नित्यपर्यायवाची इत्यत्र किं प्रमाणमस्ति इत्याशङ्कायां लोकप्रयुक्तेन प्रसिद्धवाक्येन तदुदाहरणमुखेन सिद्धशब्दस्य नित्यपर्यायत्वं व्यवस्थापयति भाष्यकारः । तदुक्तं भाष्यकृता ''यत्कूटस्थेष्वविचालिषु भावषु वर्तते । तद्यथा सिद्धा द्याः, सिद्धा पृथिवी, सिद्धमा-काशमिति।'' पूर्वोक्तम् उदाहरणं वाक्यविपरोतं वाक्यमुदाहृत्य सिद्धशब्दस्य नित्यपर्यायत्वं विघटयति अत्र प्रतिवादी । सिद्धशब्दः कार्येष्वपि वर्तते एव । तद्यथा सिद्धः ओदनः, सिद्धः सूपः, सिद्धा यवागूः इति । एवञ्च कार्येष्वपि सिद्धशब्दस्य प्रयोगदर्शनात् कथमत्र कथ्यते अत्र वार्त्तिके नित्यपर्यायवाची सिद्धशब्दः प्रयुक्तः इति । अस्य आक्षेपस्य चतुर्भिः समाधानैः सिद्धशब्दस्य नित्यपर्यायवाचित्वं साध्यते । तदुक्तं भाष्ये प्रतिवादिना ''ननु च भोः कार्येष्वपि वर्तते । तद्यथा सिद्धः ओदनः, सिद्धः सूपः, सिद्धा यवागूः इति । यावता कार्येष्वपि वर्तते, तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्दः इति ।''

**२.२ सिद्धशब्दस्य नित्यपर्यायत्वव्यवस्थापनम् -**

**२.२.१. प्रथमं समाधानम् -**

तस्य समाधानमुच्यते व्याडिविरचिते सङ्ग्रहनाम्नि ग्रन्थे कार्यप्रतिद्वन्द्वितया अर्थात् कार्यशब्दार्थविपरोतार्थकः सिद्धशब्दः प्रयुक्तः दृश्यते । तत्र हि ''किं कार्यः शब्दः अथ सिद्धः'' इति हि वाक्यं दृश्यते । तेन तच्छास्त्रसम्बन्धात् अत्र प्रयुक्तः सिद्धशब्दश्च कार्यप्रतिद्वन्द्वितया सिद्धशब्ददर्शनात् एतत् प्रतीयते अत्र वार्त्तिके प्रयुक्तः सिद्धशब्दः नित्यपर्यायवाची इति ।

**२.२.२ द्वितीयं समाधानम्-**

अत्र वाक्यं सर्वं सावधारणमिति न्यायेन सिद्धे शब्दार्थसम्बन्धे इत्यत्रापि अवधारणमस्ति। तदेवोक्तं भाष्ये ''सन्ति एकपदान्यप्यवधारणानि । तद्यथा अब्भक्षो वायुभक्ष इति, अप एव भक्षयति इति, वायुमेव भक्षयति इति, गम्यते'' इति । एवशब्दप्रयोगे सति तद् द्विपदमवधारणमिति कथ्यते, तत्र द्योतकत्वेन एवशब्दस्य अपेक्षा भवति । यत्र द्योतकं विनैव सामर्थ्यात् अवधारणं गम्यते तदा तदेकपदमवधारणमिति कथ्यते । यथा सर्वे अप एव भक्षयन्ति एव । एवं सति अब्भक्षश्रुतिः सामर्थ्यात् अवगमयति अप एव भक्षयति इति । एवमत्र व्याकरणशास्त्रे च ''आकडारादेका संज्ञा'' इत्यत्र संज्ञाशब्दोत्तरेण एकवचनेनैव एकस्य एका संज्ञा कार्या इत्यर्थे सिद्धे पुनः क्रियमाणम् अतिरिक्तम् एकग्रहणमत्र अवधारणं बोधयति। तेन एकस्य एकैव संज्ञा कार्या इति अवधारणमपि अत्र प्रतीयते ।

एवञ्च यथा अब्भक्षः इत्यादौ एवकारं विनैव अवधारणप्रतीतिः तथा अत्रापि नित्यानित्यव्यतिरेकेण तृतीयस्य भेदस्य अत्र असत्वात्, कस्यचित् वस्तुनः उत्पत्तेः प्राक्, तथा प्रध्वंसोत्तरं वा असत्त्वात्, उत्पत्तिस्थित्यवस्थायामेव सत्त्वात् तदानीमेव तस्य सिद्धत्वेन व्यवहारः सम्भवति । एवञ्च सर्वेषां वस्तूनां सर्वदा सिद्धत्वेन तत् सामर्थ्यात् वार्त्तिके

सिद्धशब्दः अवधारणार्थसहितः, ''सिद्ध एव न साध्यः'' इति । इत्थं सिद्ध एव न साध्यः इत्यर्थलाभात् सिद्धशब्दस्य नित्यपर्यायत्वं सिद्ध्यति ।

**२.२.३ तृतीयं समाधानम्-**

सिद्धे शब्दार्थसम्बन्धे इत्यत्र सिद्धशब्दे पूर्वपदलोपो द्रष्टव्यः । इदं च भाष्यवचनम् ''अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः-अत्यन्तसिद्धः सिद्ध इति । तद्यथा देवदत्तः दत्तः, सत्यभामा भामा'' इति । एवमेव अत्यन्तसिद्धशब्दैकदेश एव अत्र सिद्धशब्दः अत्र प्रयुज्यते । एवञ्च अत्यन्तसिद्ध एव अत्र सिद्धशब्देन बोध्यते । तेन च अत्र सिद्धशब्दस्य नित्यपर्यायत्वं सिद्ध्यति ।

**२.२.४ चतुर्थं समाधानम्-**

व्याख्यानात् अत्र सिद्धशब्दः नित्यपर्यायः इति निर्णीयते । ''व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम्'' इति न्यायः । यत्र यत्र संशयः उत्पद्यते तत्र तत्र संशयनिवृत्तिः व्याख्यानात् पतञ्जलिकृतात् महाभाष्यात् कार्या सन्देहमात्रेण शास्त्रम् अप्रमाणिकं न, व्याख्यानेन निश्चयोत्पादनात् । एवमनया परिभाषया सिद्धशब्दः नित्यपर्याय-वाची उत कार्यपर्यायवाची इति संशये जाते व्याख्यानतः निर्णयः कार्यः सिद्धशब्दः नित्यपर्यायवाची इति । व्याख्यानादत्र निर्णयः क्रियते अत्र सिद्धशब्दः नित्यपर्यायः इति ।

एवञ्च चतुर्भिः समाधानैः सिद्धशब्दस्य नित्यपर्यायवाचित्वं सिद्ध्यति ।

**२.३ नित्यशब्दप्रयोगेऽपि संशयस्य दुर्वारत्वम्-**

अपि च संशयनिवृत्त्युद्देश्येन नित्यशब्दे प्रयुक्तेऽपि संशयनिवृत्तिः नैव भवति । यतः नित्यशब्दः नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते । नित्यशब्दः अभीक्ष्ण्यपरोपि अस्ति । तद्यथा नित्यप्रहसितः नित्यप्रजल्पितः इति । अतः नित्यशब्दे प्रयुक्तेऽपि व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम् इति न्यायमादायैव नित्यशब्दः कूटस्थष्वविचालिषु भावेषु वर्तते इति व्यवस्थापनीयम् । अतः सिद्धशब्दे प्रयुक्ते च तेन न्यायेन सिद्धशब्दस्य नित्यपर्यायवाचित्वं साधनीयम् । अपि च तस्य मङ्गलार्थत्वं च भविष्यति इति स सिद्धशब्द एव आदितः प्रयुक्तः न नित्यशब्दः ।

**३. सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिके अर्थशब्दस्य द्रव्यं वा आकृतिर्वा अर्थः-**

**३.१ आकृतेः ग्रहणे शब्दार्थसम्बन्धे इत्यत्र विग्रहः-**

पुनरत्र आक्षेपो जायते अत्र वार्त्तिके अर्थशब्देन कः ग्राह्यः आकृतिर्वा, द्रव्यं वा इति। अर्थशब्देन आकृतेः ग्रहणे शब्दार्थसम्बन्धे इत्यत्र यादृशः विग्रहः, तादृशविग्रहात् यदि भिन्नः विग्रहः अर्थशब्देन तर्हि द्रव्यस्य ग्रहणं भवति । आकृतेश्च नित्यत्वात् शब्दार्थसम्बन्धानां त्रयाणां च नित्यत्वात् शब्दार्थसम्बन्धानां त्रयाणामपि नित्यत्वबोधनाय शब्दार्थसम्बन्धे इत्यत्र द्वन्द्वः आश्रयणीयः । तदेवोक्तं भाष्ये 'अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे अर्थे सम्बन्धे च इति । आकृतिमित्याह । कुत एतत् आकृतिर्हि नित्या द्रव्यमनित्यम्' इति ।

**३.२ द्रव्यस्य ग्रहणे शब्दार्थसम्बन्धे इत्यत्र विग्रहः -**

यदि अर्थशब्देन द्रव्यं गृह्यते सिद्धे शब्दार्थसम्बन्धे इत्यत्र शब्दश्च अर्थश्च सम्बन्धश्च इति द्वन्द्वः नोपपद्यते । अतः शब्दार्थसम्बन्धे इत्यत्र विग्रहः परिवर्तनीयः । शब्दे अर्थेसम्बन्धे च सिद्धे इति विग्रहः कार्यः । अत्र अर्थशब्दः सम्बन्धविशेषणं भवति । अर्थस्य द्रव्यस्य अनित्यत्वेति अर्थवतां शब्दानाम् अर्थैः सह सम्बन्धः नित्यः ।

**३.३ द्रव्यस्य नित्यत्वसाधनम्, आकृतेः अनित्यत्वसाधनम् -**

**३.३.१ द्रव्यस्य नित्यत्वसाधनम् -**

अर्थशब्देन द्रव्यग्रहणेऽपि शब्दार्थसम्बन्धे इत्यत्र द्वन्द्वः उपपद्यते एव । तदानीमपि शब्दे अर्थे सम्बन्धे च सिद्ध इति विग्रह उपपद्यते । यतः द्रव्यमपि नित्यमेव । द्रव्यं हि नित्यम्, आकृतिः हि अनित्या । तदेवोक्तं भाष्ये अथवा 'द्रव्ये एव पदार्थे एष विग्रहो न्यायः सिद्ध शब्दे अर्थे सम्बन्धे च इति । द्रव्यं हि नित्यम्, आकृतिः हि अनित्या । कथं ज्ञायते एवं हि दृश्यते लोके - मृत् कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरया आकृत्या युक्तः । खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या च अन्या च भवति, द्रव्यं पुनः तदेव । आकृत्यपमर्देन द्रव्यमेवावशिष्यते ।'

**३.३.२ आकृतेः नित्यत्वसाधनम् -**

अर्थशब्देन आकृतेः ग्रहणे च अयं विग्रह उपपद्यते शब्दे अर्थे सम्बन्धे च सिद्ध इति। एकत्र आकृतेः नाशेऽपि अन्यत्र द्रव्ये तदाकृतिः उपलभ्यते एव । नाशश्चेत् तत्समकाले एव अन्यत्र सत्त्वं विरुध्येत । अतः यावद् व्यवहारकालं तावत् आकृतेः आकारपरामर्शहेतुत्वात् तस्याः नित्यत्वम् अस्ति । एतदेव भाष्ये उक्तं 'न क्वचिदुपरता इति सर्वत्रोपरता भवति । द्रव्यान्तरस्था तु उपलभ्यते एव' इति । अत आकृतेः अर्थशब्देन ग्रहणे च स विग्रहः उपपद्यते ।

**३.४ नित्यलक्षणविपरिणामः**

आकृतेः अर्थशब्देन ग्रहणे नित्यस्य यल्लक्षणमुक्तं कूटस्थम् अविचाल्य-नपायोपजमनविकार्यनुत्पत्त्यवृद्ध्व्ययोगि तदा तु अर्थशब्देन आकृतेः ग्रहणं न सम्भवति । आकृतेः तादृशनित्यत्वासम्भवात्। अतः नित्यस्य उक्तं लक्षणं परित्यज्य लक्षणान्तरं स्वीक्रियते यस्मिन् तत्त्वं न विहन्यते तन्नित्यम् इति । तेन आकृतेः तथा च अर्थशब्देन द्रव्यस्य अथवा आकृतेः वा ग्रहणेऽपि शब्दे अर्थे सम्बन्धे च सिद्धे इति विगहः सूपपन्नो भवति ।

**४. लोकतः वार्त्तिकार्थः**

पुनरत्र प्रश्नः जायते कथं ज्ञायते शब्दः अर्थः सम्बन्धश्च सिद्धः नित्यः इति । तस्य समाधानमुच्यते अनेन वार्त्तिकेन द्वितीयखण्डेन 'लोकतः' इति । लोकादेव अयं विषयः अवगम्यते शब्दार्थसम्बन्धाः नित्या इति । यथा कश्चन कुम्भकारकुलं गत्वा घटं कुरु कार्यमनेन करिष्यामि इति कथयति तथा कश्चन वैयाकरणकुलं गत्वा शब्दान् कृत्वा देहि अहं प्रयोक्ष्ये इति न कथयति। तावता एव अर्थप्रतिपादनाय शब्दान् प्रयुङ्क्ते । अनादिवृद्धव्यवहारादेव शब्दार्थसम्बन्धानां त्रयाणामपि ग्रहो जायते । अतः ज्ञायते शब्दार्थसम्बन्धाः सिद्धाः इति ।

**सन्दर्भाः**

1. पतञ्जलि-व्याकरणमहाभाष्यम् 1.1 आ. 1 ।
2. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोक 123 ।
3. व्याकरणमहाभाष्यम् 1.1 आ.1 ।
4. पाणिनीय, अष्टाध्यायी 6.3.109 ।
5. व्याकरणमहाभाष्यम् 1.1 आ.1 ।
6. व्याकरणमहाभाष्यम् 1.1 आ.1 ।
7. व्याकरणमहाभाष्यम् 1.1 आ.1 ।
8. भर्तृहरिः वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लो. 23 ।
9. व्याकरणमहाभाष्यम् 1.1 आ.1 ।
10. व्याकरणमहाभाष्यम् 1.1 आ.3 ।

**अनुसन्धाता**
**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि )**
**वेदव्यासपरिसरः, बलाहारः ( हि. प्र. ) ।**

❖❖❖

# अथ शब्दानुशासनम्

✍राधा शर्मा

**अत्र शोधलेखे 'अथ शब्दानुशासनम्' इति पाणिनेः, कात्यायनस्य, पतञ्जलेर्वेति विमृश्य 'अथ' शब्दार्थविचारम्, अनुशासनशब्दस्य निरुक्तिम्, समासस्य षष्ठीविभक्तेश्चोपपत्तिम्, अनुबन्धचतुष्टय-निरूपणम्, उत्तममध्यममन्दाधिकारिणां कृते च व्याकरणाध्ययनप्रयोजनं निपुणं निरूप्यते । (स०)**

प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इति शिष्टोक्त्या प्रयोजनज्ञानमन्तरा व्याकरणाध्ययने प्रवृत्यसंभवात् व्याकरणाध्ययनस्य प्रयोजनमनवाचष्टे भगवान् भाष्यकारः 'अथ शब्दानुशासनम्' इति । इदं वचनं सूत्रकारस्य भाष्यकारस्य वा इत्यत्र विवदन्ते वैयाकरणसम्प्रदायाः । तत्र इदं वचनं भाष्यकारस्य इति मत्वा व्याख्याति स्वीये प्रदीपव्याख्याने कैयटेन तथा चोक्तम्[1] - भाष्यकारो विवरणकारत्वात् व्याकरणस्य साक्षात्प्रयोजनमाह - 'अथ शब्दानुशासनमिति' । इत्थं कैयटमते वचनमिदं भाष्यकारीयं न तु सूत्रकारस्य । युक्तञ्चैतदद्य। 'वृद्धिरादैच्' इति सूत्रे भाष्ये भगवान् भाष्यकारः प्राह - माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च । अध्येतारश्च वृद्धियुक्ता यथा स्युरिति ।[2] भाष्यवचनेन ज्ञायते यत् वृद्धिरादैच इति अष्टाध्यायाः प्रथमं सूत्रं न तु अथ शब्दानुशासनम् इति, अतः अथातो ब्रह्मजिज्ञासा, अथ योगानुशासनम् इत्यदिवत् न इदं सूत्रकारवचनम् । नागोजिभट्टस्तु वचनमिदम् उभयथा अपि व्याख्यातम् तथा चोक्तं भाष्ये शास्त्रम् इत्यस्य कर्तव्यत्वेन इति शेषः । विवरणकारत्वात् व्याख्यातव्यत्वेन इति शेष उचित इत्यन्ये । इत्थं नागेशः अथ शब्दानुशासनम् इति वचनं विवरणकारस्य भगवतः पतञ्जलेरिति मनुते । अथ शब्दानुशासनम् इति स्ववचनस्य व्याख्यानं तु भाष्यत्वात् कृतम् । तथा चोक्तम् -

**सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥**[3] इति

शब्दकौस्तुभे भट्टोजिदीक्षितोऽपि अथ शब्दानुशासनम् इति भाष्यवचनमव अङ्गीकरोति । उक्तञ्च - व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् - 'अथ शब्दानुशासनम्' इत्युक्तम्। अन्येषामपि वैयाकरणवृद्धानाम् अत्र अर्थे एव सम्मतिः । यदि 'अथ शब्दानुशासनम्' इति वचनं भाष्यकारीयं न इति अभिमन्येत तदा अथेत्ययं इत्यतो भाष्यारम्भः स्यात् । केचित् इदं वचनं शास्त्रारम्भप्रयोजनसूचकं भगवतः कात्यायनस्य वार्तिकम् इति वदन्ति तदपि न रमणीयम् बहूनाम् आचार्याणा असम्मतत्वात् । अथ

शब्दानुशासनम् इत्यत्र अथ इति शब्दः प्रारम्भार्थस्य द्योतकः निपातानां द्योतकत्वाङ्गीकारात् । तथा चोक्तम् - निपातानां द्योतकत्वमिति वाक्यपदीये निर्णीतम्।[4] अथेत्ययं शब्दः अधिकारार्थ इति भाष्यपङ्क्तौ इति शब्दः अथ शब्दस्य स्वरूपबोधकत्वबोधनाय प्रयुक्तः । अयम् इति सर्वनाम्ना स्वरूपेऽवस्थितस्य अथ शब्दस्य परामर्शः । अधिकारो नाम प्रस्तावः (आरम्भः) । अर्थशब्दोऽत्र नाभिधेयपरः अपितु प्रयोजनपरः । निपातानां द्योतकत्वाङ्गीकारात् । द्योतकत्वं नाम व्यञ्जकत्वम् । एवञ्च निपातेषु व्यञ्जनावृत्तिः न तु अभिधावृत्तिः । एवञ्च 'अथ' इत्यनेन अधिक्रियते, प्रारभ्यते, प्रस्तूयते इत्यर्थो अवगम्यते । शब्दानुशासनशब्दः व्याकरण-शास्त्रबोधकः । अनुशिष्यते अनेन इति अनुशासनम् 'करणाधिकरणयोश्च' इत्यनेन ल्युटि करणसाधनोऽयमनुशासनशब्दः । शब्दरूपकर्मणः अनुक्तत्वात् कृद्योगे 'कर्तृकर्मणोः कृति' इति सूत्रेण कर्तरि षष्ठी । शब्दानामनुशासनम् इति शब्दानुशासनम् षष्ठीतत्पुरुषः ।

न च 'कर्मणि च' इति सूत्रेण समासनिषेध इति वाच्यम्, कर्मणि इति उच्चार्य विहितषष्ठ्यामेव 'कर्मणि च' इति निषेधाङ्गीकारात् । अर्थात् 'उभयप्राप्तौ कर्मणि' इति सूत्रेण यत्र षष्ठी तत्रैव कर्मणि च इति सूत्रनिषेधः । उभयप्राप्तौ कर्मणि इति सूत्रस्य तत्रैव प्रवृत्तिः यत्र कर्तृकर्मणोः उभयोरपि उपादानम् । अत्र आचार्यरूपस्य कर्तुः अनुपादानात् उभयप्राप्त्यभावेन कर्तृकर्मणोः कृति इत्यनेनैव षष्ठी तु उभयप्राप्तौ कर्मणि इत्यनेन । अतोऽत्र कर्मणि च इति निषेधः न प्रवर्तते । 'कर्मणि च' इति सूत्रे 'च' शब्दः इत्यर्थकः, एवञ्च कर्मणि इति उच्चार्य यत्र षष्ठी विहिता तत्रैव निषेधः प्रवर्तते ।

'अथ शब्दानुशासनम्' इत्यत्र अथ शब्दः अधिकारार्थः सन् मङ्गलसूचकोऽपि । अथशब्दस्य मङ्गलसूचकत्वं बहुत्र प्रतिपादितम् एवञ्च अथ शब्देन प्रयोजनद्वयम् मङ्गलाचरणम् अधिकारार्थप्रतिपादनञ्च । तथा चोक्तम् - प्रारम्भक्रियाविषयत्वद्योतकस्यापि अथ शब्दस्याऽन्यार्थे नोयमानदध्यादिवन्मङ्गलत्वमपीत्युभयार्थमथशब्दः प्रयुज्यत इति फलितम्।[5]

शब्दानाम् इदम् अनुशासनम् न तु अर्थानाम् इति निवृत्तिपरम् इदं वाक्यम् । अथ सतोऽपि कर्तुरविवक्षणात् न उभयप्राप्तिनियमः । अथवा शब्दानुशासनम् इत्यत्र न कर्मणि षष्ठी अपितुः शेष षष्ठी तेन कर्मणि च इति निषेधाप्रवृत्त्या समाससिद्धिः । अथवा 'उभयप्राप्तौ कर्मणि' इति सूत्रे अविशेषेण विभाषेति पदस्य उक्ततया न नियमप्रवृत्तिः । अत्रेदम् अवधेयम् व्याकरणाध्ययनस्य प्रयोजनं प्रतिपादयन् भाष्यकारः ग्रन्थादौ अनुबन्धचतुष्टयमपि निरूपयति । शब्दानुशासनम् इत्युक्त्वा साधुशब्दज्ञानं प्रयोजनम् । शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वात् साधवः शब्दाः विषयाः । विषयेण साकम् प्रतिपाद्यप्रतिपादकभावसम्बन्धः, प्रयोजनेन साकम् जन्यजनकभावसम्बन्धः, साधुशब्दजिज्ञासुर-धिकारो । एवम् अथ शब्दानुशासनम् इति उक्त्या भाष्यकारः अनुबन्धचतुष्टयमपि न्यरूपयत्।

सूत्रकृता व्याकरणाध्ययनस्य नित्यत्वात् प्रयोजनम् न प्रतिपादितम् । तथाहि आगमः ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । वार्तिककृता शास्त्रपूर्वके प्रयोगे धर्मः इत्यनेन व्याकरणाध्ययनस्य परमं प्रयोजनं धर्मरूपं प्रतिपादितम् । अनेन उत्तममध्यमाधिकारिणोः प्रवृत्तिसम्भवेऽपि मन्दाधिकारिणां प्रवत्तिसम्पादनाय प्ररोचकप्रयोजनं प्रतिपादयितुं प्रवृत्तः भगवान् भाष्यकारः 'अथ शब्दानुशासनम्' इत्यनेन ।[6] ।। इति शम् ।।

**सन्दर्भाः**

1. व्याकरणमहाभाष्यम् - पस्पशाह्निकम् (अथशब्दानुशासनम् इत्यस्य प्रदीपटीकायाम्)
2. व्याकरणमहाभाष्यम् - तृतीयाह्निकम् (वृद्धिरादैच् सूत्रे)
3. महाभाष्यभूमिकायाम् ।
4. महाभाष्यम् - अथ शब्दानुशासनस्य प्रदीपटीकायाम् ।
5. महाभाष्यस्य उद्योतटीकायाम् ।
6. महाभाष्यस्य उद्योतटीकायाम् ।

**सन्दर्भग्रन्थाः**

1. व्याकरणमहाभाष्यम्, प्रकाशकः - भार्गवशास्त्रिजोशी, चौखम्बा विद्याभवन वाराणसी, संस्करणम्-2011 ।
2. व्याकरणमहाभाष्यम्, प्रकाशकः - प्रो. वेम्पटि कुटुम्बशास्त्री, प्रतिभा प्रकाशन, संस्करणम्-2006 ।

**शोधच्छात्रा**
**व्याकरणविभागः,**
**राष्ट्रियसंस्कृतसंस्थानम्**
**(मानितविश्वविद्यालयः),**
**वेदव्यासपरिसरः,**
**बलाहारः (हि. प्र.) ।**

❖❖❖

# व्याकरणाऽध्ययनस्य मुख्यगौणप्रयोजनानि

✍आशिष डोगरा

**प्रयोजनं विना मन्दस्यापि जनस्य न क्वचित् प्रवृत्तिः । तत्रापि लोकतः वेदतश्च जाते शब्दज्ञाने विशेषतः प्रयोजनमभिधेयमिति विचिन्त्य पतञ्जलिना व्याकरणे लोकप्रवृत्तये कानिचन प्रयोजनान्युक्तानि । तान्याश्रित्यात्र लेखकः स्वशैल्या तत्रत्यं तत्त्वं प्रस्तौति । (स०)**

**मुखं व्याकरणन्तस्य ज्यौतिषं नत्रमुच्यते ।**
**निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।**
**शिक्षा घ्राणन्तु वेदस्य हस्तौ कल्पान् प्रचक्षते ॥[1]**

पतञ्जलिर्महाभाष्ये - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्ययो ज्ञेयश्चेति । वेदानां षट् अङ्गानि सन्ति । तत्र व्याकरणं प्रधानम् । अतः व्याकरणं मुखमुच्यते । उक्तञ्च - 'मुखं व्याकरणं स्मृतम्' । साधुशब्दानां ज्ञानार्थं व्याकरणस्य ज्ञानमनिवार्यम् । अवैयाकरणस्तु साधुशब्दानां प्रयोगेऽसमर्थः । असाधुशब्दानां प्रयागे जनः स्वयं दुःखभाग्भवति।

भगवान् भाष्यकारः पतञ्जलिः व्याकरणाध्ययनस्य 'अथ शब्दानुशासनमि'ति साक्षात् प्रयोजनमभिधाय परम्परया व्याकरणाध्ययनस्य गौणमुख्यप्रयोजनानि प्रतिपादयितुमारभते । महाभाष्यकारमहर्षिपतञ्जलिमताऽनुसारेण व्याकरणाध्ययनस्य पञ्चमुख्यप्रयोजनानि सन्ति, तथा त्रयोदशगौणप्रयोजनानि वर्तन्ते । ते यथा -

शब्दानुशासनस्य गौणप्रयोजनत्वेन तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, विद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उत त्वः, सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण इति भाष्यकारेणोक्तम् । मुख्यप्रयोजनत्वेन - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् उक्तम् ।[2]

1. **रक्षा**

वेदस्य रक्षार्थं व्याकरणाध्ययनमावश्यकम् । यथोक्तं भाष्ये - रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपआगमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति । अतः वेदानां रक्षार्थं व्याकरणशास्त्रस्य अध्ययनं परमावश्यकम् । अत्रेदं तत्त्वम् - लोके अदृष्टं लोपादिकं वेदे दृष्ट्वा भ्राम्येदवैयाकरणः, वैयाकरणश्च न भ्राम्यति, वेदार्थञ्च अध्यवस्यति । तत्र लोपागमयोरुदाहरणं यथा -

देवा अदुह्रेति । दुहेर्लङो अस्य अदादेशे कृते 'लोपस्त आत्मनेपदेषु' इत्यनेन तलोपे 'बहुलं छन्दसि'[3] इत्यनेन रुटि सति रूपमेतत् सिद्ध्यति । लोके च 'अदुहत' इति पयोगो

दृश्यते । एवं मध्या कर्तोर्विततं संजभार – इत्यत्र हकारस्य भकारादेशः । लोके – संजहारेति दृश्यते । वर्णविकारो यथा – उदग्राभं निग्राभञ्चेति ।

2. **ऊहः**

अर्थात् विभक्त्यादेः परिवर्तनार्थं व्याकरणमध्येयम् । वेदस्य मन्त्राः न तु सर्वैलिङ्गैर्न च[4] सर्वाभिर्विभक्तिभिः निगदिताः सन्ति । अतः ते यज्ञगतेन पुरुषेण यथायथं विपरिण-मयितव्याः ।

अयं भावः – प्रकृतियागे विनियुक्तानाम्मन्त्राणां देवतादिवाचकपदानां विकृतियागस्य देवतादिबोधनार्थं विपरिणाम 'ऊह इत्युच्यते' । सर्वेषामिष्टयागानां दर्शपूर्णमासः प्रकृतिः, सर्वेषाञ्च सोमयागान्तरेणोपजीव्यते सा प्रकृतिः । यत्र च 'प्रकृतिवद्विकृतिः कर्तव्येति' वचनात्प्रकृतियागेनो- पजीव्यते सा विकृतिः ।

तत्र 'प्रकृतिवद्विकृतिः कर्तव्येति' मीमांसकसिद्धान्तात्प्रकृतियागे पठितस्य 'अग्नय त्वा जुष्टं निर्वपामि' इति मन्त्रस्य 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति वचनानुसारेण सौर्ये चरौ विकृतियागे अग्निसंबन्धिनिर्वापप्रकाशकमन्त्रस्थ 'अग्नि' पदस्य सूर्यसम्बन्धिनिर्वाप-प्रकाशनाऽसमर्थत्वात्तत्पदमपहाय तत् स्थाने 'सूर्याय त्वा जुष्टं निर्वपामि इत्यूहार्थमध्येयं व्याकरणम्' ।

3. **आगमः**

'आगम' इति तृतीयं प्रयोजनं व्याचक्षाणेनोक्तं भगवता पतञ्जलिना – आगमः खल्वपि – ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्चेति । प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । अत्रेदं तत्त्वं – व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात्तदध्ययनप्रयुक्तस्य वेदार्थाज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारार्थमध्ययं व्याकरणम् ।

सर्वेषां ब्राह्मणानां कृते षडङ्गयुक्तवेदस्य अध्ययनमत्यवश्यकं भवति । भाष्यकारः कथयति – 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्चेति।'

4. **लघु**

'लघु' इत्याख्यं चतुर्थप्रयोजनं व्याचक्षाणेनोक्तम् भगवता पतञ्जलिना –

षट्सु अङ्गेषु व्याकरणमव प्रधानमस्ति । अतोऽस्य पठनं पाठनं सर्वापेक्षया अधिकं फलदायकं भवति । यतो हि उक्तमस्ति – 'प्रधान च कृतो यत्नः फलवान् भवति ।'

व्याकरणस्याध्ययनं लाघवार्थमपि कर्तव्यम् । भाष्यकारः कथयति – 'लघ्वर्थं चाध्येयं व्याकरणम्' । संसारे सर्वो व्यवहारः शब्देन प्रचलितो भवति । संसारेऽस्मिन् बहवः शब्दाः सन्ति। शब्दस्य कोऽपि सीमा नास्ति । किन्तु शब्दस्य ज्ञानमावश्यकम् । ब्राह्मणेनावश्यं शब्दाः ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम् । उक्तञ्च

**प्राप्तरूपविभागाया: यो वाचः परमो रसः ।**

**यत्तत् पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥**[५]

5. **असन्देहः**

असन्देहः इत्याख्यं पञ्चमं प्रयोजनं प्रोक्तं भगवता पतञ्जलिना –

असन्देहः – असन्देहार्थञ्चाऽध्येयं व्याकरणम् । यथा याज्ञिकाः पठन्ति–

'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति । अत्र शङ्का उत्पद्यते स्थूलपृषती इत्यस्य कोऽर्थः । अत्र स्थूला चासौ पृषती च स्थूलपृषती वा स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति भविष्यति । अस्यार्थस्य ज्ञानं व्याकरणेनैव भवितुमर्हति । यदि स्थूलपृषती इत्यत्र पूर्वपद प्रकृतिस्वरत्वं भवेत् तदा अत्र बहुव्रीहिसमासः भूत्वा स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीत्यर्थो भविष्यति । यदि अत्र अन्त्यः अच् उदात्तो भवेत् तदा तत्पुरुषसमासः भूत्वा स्थूला चासौ पृषती च स्थूलपृषतीत्यर्थो भविष्यति । अतः सन्देहनिवत्त्यर्थं व्याकरणस्य अध्ययनमावश्यकं भवति । अत एव सम्यक् प्रकारेण व्याकरणं पठितव्यम् ।

**सत्यं ब्रूयात् प्रियं ब्रूयात्, मा ब्रूयात् सत्यमप्रियम् ।**
**प्रियं च नानृतं ब्रूयात्, एष धर्मः सनातनः ॥**

व्याकरणशास्त्रस्य गौणप्रयोजनत्वेन भाष्ये भगवता पतञ्जलिना त्रयोदश गौणप्रयोजनान्युक्तानि वर्तन्ते । इमानि भूयः शब्दानुशासनस्य प्रयाजनानि – प्रथमं प्रयोजनत्वेन उक्तम् ।

**१. तेऽसुराः**

अतः परम् आनुषङ्गिकप्रयोजनेषु प्रथमं तेऽसुराः इत्याख्यं प्रयोजनमुक्तं भगवता पतञ्जलिना – तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्ययं व्याकरणम् ।।

**२. दुष्टः शब्दः –**

अतः परम् 'दुष्टः शब्दः' इति द्वितीयम् आनुषङ्गिकं प्रयोजनमुक्तं भगवता पतञ्जलिना–

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ॥**
**दुष्टाञ्छब्दान् मा प्रयुंक्ष्महीत्यध्येयं व्याकरणम् ॥**

अत्रेदं तत्त्वम् – स्वरतो वर्णतो वा मिथ्याप्रयुक्तः शब्दोऽभीष्टमर्थं न कथयति । तथा च स शब्दः वज्ररूपो भूत्वा यजमानमेव हन्ति ।

एवं हि श्रूयते तैत्तिरीयब्राह्मणे यत् – एकदा त्वष्टुः पुत्रं विश्वरूपमिन्द्रो जघान, तदनन्तरं त्वष्टा इन्द्रसंहारायैकमभिचारयागं प्रास्तौत । तत्र यागे सः 'स्वाहेन्द्रशत्रुर्वर्द्धस्व' इति मन्त्रमुदाजहार। अत्र 'शत्रुशब्दः क्रियावाची', न तु संज्ञावाची । तस्मादयमर्थः–'शत्रु' शमयिता, शातयिता, संहारको नेत्यर्थः । अत्राऽयं सारांशो यत् त्वष्टुरिदमभिप्रेतमासीत् यद् हे अग्ने !

त्वमेवं वर्द्धस्व यत्तव ज्वालासमुत्पन्नो वृत्रासुरः इन्द्रशत्रुर्भवेद् अर्थात् इन्द्रस्य नाशको जायत । अयमर्थस्तदैव सम्भवति, यदा खलु 'इन्द्रशत्रु' शब्दः समासान्तोदात्तः तत्पुरुषो भवेत् ।

**३. यदधीतम्**

अतः परम 'यदधीतम्' इति तृतीयमानुषङ्गिकं प्रयोजनं व्याचक्षाणेनोक्तं भगवता पतञ्जलिना –

**यदधीतमविज्ञातं निगदेनैव शब्द्यते ।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥**

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् ॥

**४. यस्तु प्रयुङ्क्ते**

अतः परम् 'यस्तु प्रयुङ्क्ते' इति चतुर्थं आनुङ्गिकं प्रयोजनमुक्तं भगवता पतञ्जलिना –

**यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले ।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥**

कः ? वाग्योगविदेव । कुत एतत् ? यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः इति ।

एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । तद्यथा 'गौरित्यस्य शब्दस्य गावी गोणी गोपोतलिकेत्येवमादयोऽपभ्रंशाः । अथ योऽवाग्योगवित् । अज्ञानं तस्य शरणम् । विषम उपन्यासः।'

नात्यन्तायाऽज्ञानं शरणं भवितुमर्हति । यो ह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् । एवं तर्हि । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् विज्ञानं तस्य शरणम् । क्व पुनरिदं पठितं ? भ्राजा नाम श्लोकाः यदि श्लोकाः अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति –

**युदुदुम्बरवर्णानां घटोनां मण्डलं महत् ।**
**पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत् ॥**

प्रमत्तगीत एष तत्र भवतः । यस्त्वप्रमत्तगीतस्तत् प्रमाणम् ॥

**५. अविद्वांसः**

अतः परं 'अविद्वांस' इति पञ्चममानुषङ्गिकं प्रयोजनम्

**'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।**
**कामं तेषु तु विप्रोष्य स्त्रीष्विवाऽयमहं वदेत् ॥**

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥'

अत्रेदं तत्त्वं – प्रवासादेत्य शिष्येण गुरोः समक्षं नामगोत्रोच्चारणपूर्वकं प्रणामो विधेयः। अभिवादानन्तरप्रयोज्ये वचने गुरुणा प्लुतो विधेयः । यः प्लुतं कर्तुं न जानाति, स स्त्रीवद् वक्तिअयमहमिति । अभिवादनविषये मनुनोक्तम् –

**अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ।**
**असौ नामाऽहमस्मीति स्वं नाम परिकीर्तयेत् ॥**
**नामधेयस्य ये केचिदभिवादं न जानते ।**
**तान्प्राज्ञोऽयमहं ब्रूयात् स्त्रियः सर्वास्तथैव च ॥**[६]

### ६. विभक्तिं कुर्वन्ति

अतः परं विभक्तिं कुर्वन्ति इत्याख्यं षष्ठमानुषङ्गिकं प्रयोजनम् –

**याज्ञिकाः पठन्ति – प्रयाजाः सविभिक्तिकाः कार्या इति न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ॥**

अत्रेदं तत्त्वं – कर्मविच्छेदे सति पुनराधेयेष्टिर्विधीयते । तस्या एवेष्टे सति कर्तव्यविषये वचनमिदं पठितम् । प्रयाजाः पञ्च भवन्ति, ते तु सविभक्तिका एव पठिताः। किन्तु तत्र विभिक्तः, प्रत्ययः, प्रकृतिराक्षिप्यते । यतो हि त्वमग्ने प्रयाजानां पुरस्तात्त्वं पश्चात् इति वेदवाक्यमस्ति, अतः अग्निशब्दः एवाऽत्र प्रकृतित्वेन गृह्यते, स च प्रथमा-सप्तमी-तृतीया- द्वितीयापभृतिषु चतसृषु विभक्तिषु पठ्यते । उदाहरणं यथा – ये यजामहे भूर्भुवः स्वः समिधोग्नेऽग्ने आज्यस्य व्येतु वौषट् ।

### ७. यो वा इमाम्

अतः परं यो वा इमाम् इति सप्तमं आनुषङ्गिकं प्रयोजनमुक्तम् –

**यो वा इमाम् पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति ।** आर्त्विजीनाः वयं स्यामेत्यध्ययं व्याकरणम् ।

अत्रेदं तत्त्वं – यो वै निश्चयेन इमां सन्निहितामपरोक्षां वाचं वेदरूपां वाणीं पदं पदं, स्वरं स्वरं, अक्षरं अक्षरं विदधाति संस्करोति स आर्त्विजीनो भवति । अर्थात् ऋत्विककर्मार्हो भवतीति विज्ञेयम् ।

### ८. चत्वारि

व्याकरणाध्ययनमन्तरेण पदपदार्थज्ञानं न भवितुमर्हति । अतोऽष्टमं चत्वारि इत्याख्य-मानुषङ्गिकं प्रयोजनं निरूपयितुं निम्नवेदमन्त्रं व्याचक्षाणेन भगवता पतञ्जलिना व्याकरणाध्ययनस्य शब्दरूपेण देवेनास्माकं साम्यरूपप्रयोजनमुक्तम् ।

**चत्वारि श्रृङ्गा त्रयो अस्य पादा**
**द्वे शीर्षे सप्तहस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति**
**महो देवो मर्त्याꣳ आ विवेश ॥ इति**

चत्वारि श्रृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यद्वर्तमानाः । द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासा अस्य सप्त विभक्तयः । त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसिकण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुतः एतत् ? रौति शब्दकर्मा । महो देवो मर्त्यां3 आविवेशेति । महान् देवः शब्दः। मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।।

'अपर आह - चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । तानि विदुर्ब्राह्मणा ये मनीषिणः ।

**मनसः ईषिणो मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति ।**
**गुहायां त्रीणि निहिता नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः ।**
**तुरीयं वा एतत् वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः ।।'**

**९. उत त्वः**

पुनश्च उत त्व इति वाग्विस्ताररूपं नवमं आनुषङ्गिकं व्याकरणाध्ययनप्रयोजनं प्रतिपादयतोक्तम् भगवता पतञ्जलिना

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्र जायेव पत्य उषतो सुवासाः ।।**

अपि खल्वेकं पश्यन्नपि न पश्यति वाचम् । अपि खल्वेकः श्रृण्वन्नपि न श्रृणोत्येनाम् इति अविद्वांसमाहार्धम् । उतौ त्वस्मै तन्वं विसस्रे तनुं विवृणुते । जायेव पत्य उशती सुवासाः । तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणते एवं वाग् वाग्विदे स्वात्मानं विवृणुते । वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ।

**१०. सक्तुमिव**

ततोऽसाधुशब्देभ्यो विविच्य साधुशब्दज्ञानरूपं दशमानुषङ्गिकप्रयोजनम्-

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।**
**अत्रा सखायः सख्यानि जनाते भद्रैषालक्ष्मीर्निहिताधि वाचि ।।**

सक्तुः सचतेर्दुर्धावो भवति । कसतेर्वा विपरीताद् विकसितो भवति । धीरा ध्यानवन्तः। मनसा प्रज्ञानेन । वाचमक्रत वाचमकृषत ।

अत्रा सखायाः सन्तः सख्यानि जानते । क्व? य एष दुर्गो मार्गः एकगम्यो वाग्विषयः। के पुनस्ते ? वैयाकरणाः । कुत एतत्? भद्रैषा लक्ष्मीर्लक्षणाद् भासनात् परिवृढा भवति ।

**११. सारस्वतीम्**

ततः 'सारस्वतीम्' इत्याख्यमेकादशमानुषङ्गिकं प्रयोजनमाह -

सारस्वतीम् - याज्ञिकाः पठन्ति - आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ।

**१२. दशम्याम्पुत्रस्य**

अतः परं नामकरणेषु विहितनामस्वरूपज्ञानरूपं द्वादशमानुषङ्गिकं प्रयोजनम् -

याज्ञिकाः पठन्ति - दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तः स्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति । न चाऽन्तरेण व्याकरणं कृस्तद्धिता वा शक्या विज्ञातुम् ।।

**१३. सुदेवो असि -**

ततश्चाऽन्तिमं आनुषङ्गिकं प्रयोजनमाह -

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः सप्त विभक्तयः । अनुक्षरन्ति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति । तेनाऽसि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् ।

**निष्कर्षः -**

अतः निष्कर्षरूपेण व्याकरणाध्ययनस्य गौणमुख्यप्रयोजनानि ज्ञात्वा एव शब्दाऽपशब्दयोः साध्वसाधुशब्दयाः ज्ञानं भवितुं शक्यते । अतः साध्वसाधुशब्दार्थबोधनार्थं व्याकरणस्याध्ययनं करणीयम् ।

**सन्दर्भग्रन्थाः**


1. पाणिनीयशिक्षा ।
2. पतञ्जलिमहाभाष्यम् ।
3. वाक्यपदीयम् ।
4. पाणिनीया अष्टाध्यायी ।


**पादटिप्पणी**

1. पाणिनीयशिक्षा ।
2. तदेव ।
3. पाणिनीया अष्टाध्यायी 7.1.8 ।
4. पतञ्जलिव्याकरणमहाभाष्यम् 1.1 ।
5. भर्तृहरिवाक्यपदीयं ब्रह्मकाण्डम् श्लो. 12 ।
6. मनुस्मृतिः 2.122-23 ।


**शोधच्छात्रः**

**राष्ट्रियसंस्कृतसंस्थानम्**

**वेदव्यासपरिसरः**

**बलाहारः ( हि. प्र. )**

# रक्षोहागमलध्वसन्देहा' इत्यस्य विमर्शः

✍श्रीचन्द्रमापौडयालः

**रक्षादीनि प्रयोजनानि कीदृशानि कथञ्च तान्युदाहर्त्तुं शक्यानीति परिभाव्य निबन्धकर्त्राऽत्र समावश्यकानि सर्वाण्येव तथ्यान्याविष्क्रियन्ते। तत्रैव व्याकरणाध्ययनस्य परमं प्रयोजनं परमब्रह्मप्राप्तिरेवेति निष्क्रियते। भूमिकायां व्याकरणस्य साधनं, संक्षिप्तेतिहासः, महत्त्वञ्च प्रतिपादितम्। ( स० )**

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः इति व्याकरणम् इतिव्युत्पत्त्यनुसारेण वि+आङुपसर्गपूर्वककृधातोः करणार्थे ल्युट्प्रत्यये कृते व्याकरणमिति निष्पन्नं भवति ।

व्याकरणस्य प्रयोजनविषये शब्दानुशासनमिति मुख्यप्रयोजनम् । केषां शब्दानां ? लौकिकानां वैदिकानां च। तेन प्रकृतिप्रत्ययविभागेन साधुशब्दानां विवेचनं भवति । रामायणे गोपथब्राह्मणेऽपि शब्दशास्त्रविषये व्याकरणशब्दस्य प्रयोगः कृतो विद्यते ।

यथा रामायणे -

**ननु व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।**
**बहु व्याहरतानेन न किञ्चिदपभाषितम् ॥**

गोपथब्राह्मणे -

ओङ्कारं पृच्छामः, को धातुः, किं प्रातिपदिकम्, का विभक्तिः, कः प्रत्ययः, कः स्वरः उपसर्गो निपातः कः, किं वै व्याकरणम्, को विकारः, को विकारी, कति मात्राः, कति वर्णाः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणमिति ।

व्याकरणमपौरुषेयवेदस्य प्रधानमङ्गं वर्तते । न केवलं षट्स्वङ्गेषु प्रधानात् व्याकरणं प्रधानम् अपितु समस्तशास्त्रेष्वपि व्याकरणं श्रेष्ठमिति । तस्मादुक्तम् -

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥**

व्याकरणाध्ययनस्य प्रयोजनविषये जातायाः शंकायाः समाधानत्वेन शब्दानुशासनमिति मुख्यप्रयोजनम् । तस्य प्रयोजनस्य प्रयोजनम् रक्षोहागमलध्वसन्देहाः इति ।

1. रक्षा 2. ऊहः 3. आगमः 4. लघु 5. असन्देहः

**रक्षा**

वेदानां रक्षणाय व्याकरणस्याध्ययनं कर्तव्यम् । तथाहि देवा अद्रुह्र इति मन्त्रे दुहधातोः लङ्लकारस्य स्थान जातस्य झस्य 'आत्मनेपदेष्वनतः' इति अदादेशे 'लोपस्त आत्मनेपदेषु' इति तलोपे बहुलं छन्दसि इति रुडागमे धातोः अडागमे च अद्रुह्र इति सिद्ध्यति । अत्र

अवैयाकरणाः तलोपे रुडागमे कदाचिद् भ्राम्येयुः वैयाकरणस्तु सूत्रस्मरणमात्रेणैव प्रक्रियां जानाति । एवं उद्ग्राभं च निग्राभं च इति वैदिकप्रयोगे गहधातोः हकारस्य स्थाने भकारः श्रूयते । वैयाकरणस्तु 'हृग्रहोर्भश्छन्दसि' इति सूत्रेण भकारमादेशत्वेन जानाति । अतः तत्र लोपागमवर्णविकारज्ञो हि सम्यक् वेदानां रक्षणं कर्तुं योग्यः ।

**ऊहः**

ऊहः नाम विपरिणामः। वेदे सर्वैः लिङ्गैः सर्वाभिः विभक्तिभिश्च मन्त्रा न दृश्यन्ते। तत्र प्रकरणमाश्रित्य विपरिणामः कर्तव्यो भवति । यथा - अग्निदेवताकः अग्नये त्वा जुष्टं निर्वपामि इति मन्त्रः श्रूयते । अयं मन्त्रः प्रकृतियागे उपयुज्यते । विकृतियागेऽपि एतादृशो मन्त्रः सूर्यदेवताकः कश्चिदावश्यकः। किन्तु तत्र न श्रूयते । अतस्तत्र मन्त्रः ऊह्यः, यथा - सूर्याय त्वा जुष्टं निर्वपामि इति । एतादृश ऊहः विभक्त्यादिविपरिणामाधीनः । स च विपरिणामः वैयाकरणेनैव कर्तुं शक्यते नावैयाकरणेन। अतोऽध्येयं व्याकरणम् ।

**आगमः**

आगमो नाम अवश्यकर्तव्यतोपदेशको विधिः। यथा - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति वचनन षडङ्गसहित वेदाध्ययनं कर्तव्यत्वेनोपदिष्टम् । तत्र व्याकरणाध्ययनं विना वेदाङ्गानामध्ययने क्लेशः इति तत्र प्रधानस्य व्याकरणस्य अध्ययनेन अन्येषां वेदाङ्गानामध्ययने सौकर्यं भवति । अतो व्याकरणमध्येयम् ।

**लघुः**

लाघवमित्यर्थः। अध्यापनं ब्राह्मणस्य वृत्तिः। यस्तु ब्राह्मणो शब्दान्न जानाति शिष्यास्तं नोपगच्छन्ति । अतः तेन अवश्यं शब्दा ज्ञेया एव । शब्दानामसंख्यकानां ज्ञाने च लघूपायः व्याकरणाध्ययनम् । अतः लघुनोपायेन शब्दज्ञानसिध्यर्थं व्याकणाध्ययनं कर्तव्यम् ।

**असन्देहः**

सन्देहनिवृत्तये अध्येयं व्याकरणम् । यथा - 'स्थूलपषतीमाग्निवारुणीमनड्वाहीमाल-भेत' इति मन्त्रं याज्ञिकाः पठन्ति । तत्र स्थूलपृषती शब्दविषये, स्थूला चासौ पृषती चेति कर्मधारयः ततः स्थूलानि पृषन्ति यस्याम् इति बहुव्रीहिर्वा इति सन्देहो जायते । तत्र पूर्वपदप्रकृतिस्वरत्वात् बहुव्रीहिः, अन्तोदात्तत्वे कर्मधारयः इति सिद्धान्तः । एवं च अत्र स्वरज्ञानेन सन्देहो निवर्तते । स्वरज्ञानसिद्धये च व्याकरणमध्येयम् ।

अतः पूर्वोक्तानां पञ्चानां मुख्यप्रयोजनानां सत्त्वात् व्याकरणाध्ययनं कर्तव्यमिति लभ्यते। एवं रीत्या व्याकरणाध्ययनस्य मुख्यप्रयोजनानि भाष्ये प्रतिपादितानि ।

**व्याकरणस्य गौणप्रयोजनानि**

1. तेऽसुराः, 2. दुष्टः शब्दः, 3. यदधीतम्, 4. यस्तु प्रयुङ्क्ते, 5. अविद्वांसः, 6. विभक्तिं कुर्वन्ति, 7. यो वा इमाम्, 8.चत्वारि, 9. उत त्वः, 10. सक्तुमिव, 11. सारस्वतीम्, 12. दशम्यां पुत्रस्य, 13. सुदेवो असि वरुण ।

**निष्कर्षः**

भाष्यकृतः कानि पुनः शब्दानुशासनस्य प्रयोजनानि सन्ति इति प्रश्नं कृत्वा तदुत्तरं रक्षाहागमलघ्वसन्देहाः प्रयोजनमिति प्रदत्तम् । प्रदीपकारः कैयटः रक्षोहादीनि प्रयोजनानि सन्ति इति प्रतिपादयाञ्चकार। तदेवं साक्षात् प्रयोजनं व्याकरणाध्ययनस्य शब्दानुशासनम्, गौणप्रयोजनानि च रक्षोहादीनि इति बोध्यम् । तत्र प्रयोजनशब्देन फलं प्रयोजकश्च इत्युभयस्य एव बोधः । तत्र आगमः प्रयोजकः, रक्षा, ऊहः, लघु, असन्देहश्च फलात्मकं प्रयोजनमिति बाध्यम् । ब्रह्मबिन्दूपनिषदि 'शब्दब्रह्मणिनिष्णातः परं ब्रह्माधिगच्छति' इत्यनुरोधेन शब्दज्ञान-द्वारा पुण्यप्राप्तिः, पुण्यप्राप्त्या च परब्रह्मपदप्राप्तिः इति कश्चन क्रमः व्याकरणदर्शनस्य । तदनुसारमस्मन्मते मोक्षरूपा परब्रह्मप्राप्तिरेव व्याकरणाध्ययनस्य मुख्यं फलमिति सर्वैः स्वीकरणीयम् ।

**आचार्यद्वितीयवर्षम्**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

❖❖❖

# पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम्

✍सुश्री मुग्धा चन्द्रकान्त दाते

**भाषाविज्ञानं नामाद्य स्वतन्त्रं किञ्चिद् विज्ञानम् । अत्र प्राच्याः प्रतीच्याश्च भाषाचिन्तकाः सन्ततं चिन्तनशीलाः सन्ति । परं वैदेशिकाः स्वान् अस्य विज्ञानस्य आरब्धकान् मन्यन्ते, उत वाऽत्र स्वैकाधिकारं मनन्ति । परं तन्न समीचीनम्, वैदिकवाङ्मये, तदश्रित्य च लिखित-संस्कृतवाङ्मये भाषाविज्ञानस्य सूक्ष्मातिसूक्ष्यं विवेचनमुपलभ्यते । तदेव प्रमाणीकर्वत्या गवेषिकयाऽत्र महाभाष्यस्य पस्पशाह्निकमाश्रित्य कृते शोधनिबन्धे तुलनात्मकरूपेण सधैर्य प्रस्तूयते । (स.)**

पातञ्जलमहाभाष्यस्य पस्पशाह्निकं भूमिकात्मकं वर्तते तत्र भाषादृष्ट्या महत्त्वपूर्णाः तात्त्विकविषयाः चर्चिताः लक्ष्यन्ते । तैस्सह साधर्म्यदर्शकविचाराः आधुनिकभाषाविज्ञानेऽपि (Modern Linguistics) लक्ष्यन्ते । अतः किं तत्र साम्यं, को वा भेदः, किमाधारभूतं तत्त्वम् इत्यादिकं अस्मिन् लेखे विचार्यते । किन्तु तस्मात् पूर्वं 'भाषाविज्ञानम्' वा 'भाषाशास्त्रम्' इति ज्ञानशाखाविषये किञ्चित् प्रस्तौमि । पाश्चात्यभाषाभ्यासकैः यदा संस्कृतस्य परिचयः प्राप्तः तदा तः निरीक्षितं यत् संस्कृतग्रीकलॅटिनादिभाषासु आश्चर्यकारकं साम्यं वर्तते यद्यपि ताः भौगोलिकदृष्ट्या परस्परम् असम्बद्धाः । अतः एतादृश-भाषासमूहाभ्यासस्य प्रारम्भः अभवत् यस्य जननी प्रायः एका इति वक्तुं शक्यते । एषा शाखा नाम 'Historical Linguistics' इति ।

तदनन्तरं प्रसिद्धभाषावैज्ञानिकः 'सस्यूर' इत्यनेन प्रवर्तिता एका शाखा उदिता । सस्यूरः न केवलं भाषावैज्ञानिकः परं संस्कृतज्ञः अपि आसीत् । तस्य मतानुसारं भाषाणां तुलनात्मकाध्ययनापेक्षया विशिष्टभाषान्तर्गतव्यवस्थायाः अध्ययनं महत्त्वपूर्णं वर्तते । तेन प्रतिपादितानां सङ्कल्पनानां पतञ्जलमुनिना प्रतिपादितैः विचारैस्सह साधर्म्यं दृश्यते । 'सस्यूर' इत्यनेन प्रस्तुता विचारधारा 'Stuctural Llinguistics' इति नाम्ना प्रसिद्धा । तस्याम् काश्चन सङ्कल्पनाः अग्रे विचार्यन्ते ।

अनन्तरं 'नोआम चॉम्सकी' इत्यनेन 'रॉगर बॅकॉन' इत्यादिकानां विचारान् आधारीकृत्य नूतनसिद्धान्तः प्रतिपादितः । 'रॉगर बॅकॉन' इत्यादयः प्रतिपादितवन्तः 'यद्यपि सर्वाः भाषाः भिन्नाः दृश्यन्ते, तथापि सर्वाः मानुषभाषाः' (Human Languages have some peculiarities as opposed to Animal Communication)। तस्मात् किं तत्र समानमित्युक्ते

'भाषात्वम्' । अतः तत्र वैश्विकव्याकरणचिन्तनं (Universal Grammer) कर्तुं शक्यते । तथा प्रमाणानि अपि दर्शितानि तैः ।

अतः भाषाविज्ञानमपि भाषाणां व्याकरणस्यैव अभ्यासं करोति, किन्तु प्रामुख्येन तादृशव्याकरणं वा सिद्धान्तनिर्माणं क्रियते यः सिद्धान्तः सर्वभाषाणां कृते उपयुक्तः भवेत् ।

प्रस्तुतलेखे पतञ्जलिमुनिविरचितमहाभाष्यस्य पस्पशाह्निके प्रवर्तितानां कासांचन सङ्कल्पनानां (अवधारणानां) भाषावैज्ञानिकदृष्ट्या चिन्तनाय प्रयत्यते ।

1. शब्दविचारः
2. शब्दनित्यता
3. शुद्धोपदेशविचारः
4. व्याकरणव्याख्यानस्य उत्सर्गापवादपद्धतिः

उपरिनिर्दिष्टविषयचिन्तनात् पूर्वं शब्द (as a word) इति सङ्कल्पनायाः सामान्यरूपेण चिन्तनं कुर्मः । तत्र लौकिकार्थेन शब्दचिन्तनं कुर्मश्चेत् तत्र त्रीणि अङ्गानि विचारणीयानि वर्तन्ते ।

1. प्रथममङ्गं नाम शब्दस्य तत् स्वरूपं यत् प्रत्यक्षरूपेण उच्चार्यते यस्मिन् व्यक्तिकालपूर्वकभेदाः भवितुमर्हन्ति । अस्य कृते वैयाकरणैः 'वैकृतध्वनिः' इति संज्ञा उपयोजिता दृश्यत । मीमांसकैः 'ध्वनिः' नैयायिकैश्च 'वर्णः' इति उच्यते।
2. द्वितीयमङ्गं नाम शब्दस्य तत् स्वरूपं यत् समानभाषाभाषिणां वक्तृश्रोतृणां बुद्धौ प्रतिष्ठते । अस्य कृते पतञ्जलिमुनिना 'स्फोटः' इति उच्यते मीमांसकैश्च 'वर्णः' इति उच्यते ।
3. तृतीयमङ्गं नाम शब्दस्य तत् स्वरूपं यत् शब्दस्य अर्थं प्रकाशयति । (भाषाज्ञानमाश्रित्य) यदा शब्दस्य श्रवणं भवति तदा अर्थस्य प्रतीतिः भवति । अस्य कृते पतञ्जलिमुनिना 'शब्दः' इति तत्त्वं व्याख्यातम् । अग्रिमवैयाकरणैः 'स्फोटः' इत्युच्यते ।

इदानोम् एकैकशः निरूपयामि ।

**१. शब्दविचारः**

पस्पशाह्निके सर्वप्रथमं भाषादृष्ट्या महत्त्वपूर्णं यद् व्याख्यानं लक्ष्यते तन्नाम शब्दविचारविषये । तत्र प्रश्नः उदेति 'गौरित्यत्र कः शब्दः?' तत्र मुनिकृतव्याख्यायां ध्वनिना सह अर्थस्यापि निर्देशः कृतः वर्तते । येनोच्चारितेन सास्नालाङ्गूलक-कुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः । अथ वा प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते ।

**अर्थः**

———— **शब्दः**

**ध्वनिः**

अन्यत्र च मुनिना उक्तं यत् स्फोटः शब्दः, ध्वनिः शब्दगुणः ।

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः ॥**

| | |
|---|---|
| **अर्थः** | |
| **स्फोटः** | **शब्दः** |
| **ध्वनिः** | |

अतः उपर्य्युक्तबिन्दूनामाधारेण पतञ्जलिमुनेः शब्दसङ्कल्पना एवं वर्तते इति वक्तुं शक्यते ।

यथा के. कुञ्जनी राजा वदति – For Patanjali the 'Sphota' is a unit of sound as an isolated letter or a series or a series of letters. The individual particularities of the particular instance are of the 'dhvani-s' and depend upon individuality of the speaker. These are respectively analogous to the 'prakrta & Vaikrta dhvani' of the later grammarians. Commentators like Nagoji Bhatta, try to read fully developed sphota theory into the statemnets of Patanjali. But a careful study shows that, his concept of 'sphota' of the later grammarians.

पूर्वनिर्दिष्टेभ्यः अङ्गेभ्यः प्रथमाङ्गं यत् शब्दस्य प्रत्यक्षोच्चारितरूपम् तद् 'ध्वनिः' इति कृत्वा पतञ्जलिमुनिः अवोचत् ।

द्वितीयमङ्गं यत् शब्दस्य बुद्धिस्थितस्वरूपं तद् 'स्फोटः' इति कृत्वा पतञ्जलिमुनिः अवोचत् ।

तृतीयमङ्गं यत् शब्दस्य अर्थरूपं तद् अर्थप्रतीतिः वा प्रतीतपदार्थक इति कृत्वा वर्णितं मुनिना ।

यथा पूर्वोक्तं, प्रसिद्धभाषावैज्ञानिकः 'सस्यूर' इत्ययेन प्रतिपादितानां कासांचन सङ्कल्पनानां पतञ्जलिमुनेः विचारैस्सह साधर्म्यं दृश्यते । तेन स्वविचारान् प्रतिपादयितुं Semiotics (मानव्यविद्यायाः एका शाखा) अत्रस्थाः शाखाविचाराः भाषाविज्ञानदष्ट्या विचारिताः । तेषां भाषाविज्ञानक्षेत्रे उपयोजनं कृतम् च । Semiotics वा Semiology इति मानव्यविद्यायाः (Humanities) या शाखा वर्तते तत्र चिह्नानां अभ्यासः क्रियते ।

(Semiotics is the study of signs. A sign can be anything ranging from bisual signs such as traffic signs, medical signs to a painting or a photograph. In short, Semiotics studies sings & a sign something which stands for something. Thus, a sign can be anything images, sounds, words, gustures of objects) अतः चिह्नं यत्किमपि भवितुमर्हति मुद्रा, ध्वनिः, वस्तु वा शब्दः । सस्यूर इत्यनेन प्रतिपादितं Semiotics यत् Semiology वा इति चिह्नानां विज्ञानम् । इमानि चिह्नानि च समाजस्यैव विभागरूपेण तिष्ठन्ति Semiology

(Semotics कृते सः Se,iology इति शब्दमुपयुजति) इत्यत्रस्थनियमानां सिद्धान्तानां वा उपयोजनं भाषाविज्ञानक्षेत्रे कर्तुं शक्यते । तस्य प्रमुखविचारान् प्रस्तौमि ।

सस्यूरः अवोचत्, भाषा शब्दैः निर्मिता वर्तते । शब्दाश्च भाषाचिह्नरूपेण तिष्ठन्ति । अतः 'शब्दः' इत्येकं शाब्दिकचिह्नं (Verbal sign of linguistic sign) वर्तते । तद् च signifier तथा च sognofied इत्येताभ्यां युक्तम् । तत्र 'signifier' इति शब्दस्य तदङ्गं यद् ध्वनिरूपम् । 'signified' इति च तदङ्गं यत् सङ्कल्पना वा अर्थरूपम् तस्मात् अङ्गद्वयमिदम् बुद्धिविषयं, न तु प्रत्यक्षोपस्थितम् । इमे च एकया शृङ्खलया (Link) मस्तिष्के सम्बद्धेः स्तः ।

(Language is a part of semiology & Language is a system of signs. Language is made up of words & each word is verbal sign. A linguistic sign is composed of 'a sound pattern or a signifier' & 'a concept or signified'. This a linguistic sign is a two-sided psychological entity.)

**बौद्धार्थः**

———— **शब्दः** ( Sign )

**बौद्धध्वनिः**

तत्र 'signifier' इति न तद् ध्वनिरूपं यत् श्रूयमाणम् अपि तु ध्वनेः बुद्धिस्थितस्वरूपम् । 'Signigfied' इति च न तद् अर्थरूपं यद् सृष्टौ दृश्यमानम् अपि तु अर्थस्य बुद्धिस्थितस्वरूपम् । Linguistic इत्यस्मिन् पदार्थस्य शब्दस्य च प्रत्यक्षसम्बद्धः न कल्पितः अपि तु सङ्कल्पना/बौद्धार्थः तथा बौद्धध्वनेः बुद्धिस्थितसम्बन्धः कल्पितः वर्तते ।

उपर्युक्तशब्दस्वरूपं पतञ्जलिमुनिना उक्तेन शब्दस्वरूपेण सह निरतिशयं साधर्म्यं प्रत्याययति । पतञ्जलिमुनिरपि 'शब्दः तदेव यः अर्थस्य सम्प्रत्ययं कारयति' इत्यवोचत् (सन्दर्भः - येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः) । 'स्फोटः' च वर्णानां अवस्थितरूपम् । (वर्णाः तु अवस्थिताः । स्फोटः शब्दः, ध्वनिः शब्दगुणः, भेर्याघातवत् । स्फोटश्च तावानेव भवति ध्वनिकृता वृद्धिः) ।

वर्णनमेतद् सस्यूरस्य 'Linguistic Sign' इत्येनं स्मारयति ।

**प्रतीतः अर्थः** Signified

———— **शब्दः** ———— Linguistic Sign

**स्फोटः** Signifier

तत्र एकः भेदः नाम पतञ्जलिमुनिः स्फोटात् भिन्नं ध्वनेः अस्तित्वमपि मन्यते । यः ध्वनिः शब्दस्य प्रत्यक्षोच्चारितरूपम् सस्यूरस्य कृते तु द्वयमपि बौद्धिकं वर्तते । इत्थं शब्दसङ्कल्पनाविषयकं विवचेनम् ।

**२. शब्दनित्यानित्यता**

सामान्यतया वैयाकरणाः शब्दनित्यतावादिनः । किन्तु यदा तत्र प्रश्नः कृतः, 'नित्यः शब्दः आहोस्वित् कार्यः?', तत्र तु व्याडिमुनेः 'सङ्ग्रहे' द्वयमपि कथं चर्चितं तदुक्तं मुनिना । तथापि व्याकरणं शब्दार्थयोः नित्यसम्बन्धमालोक्यैव विरच्यते इत्यपि उक्तम् - सिद्धे शब्दार्थसम्बन्धे । शब्दार्थसम्बन्धः कथं नित्यः इत्यस्य प्रमाणमपि उक्तं मुनिना - लोकतः इति । तस्य अयमभिप्रायः - यथा वयं वस्तुनिर्माणं कर्तुं शक्नुमः यथा केनापि एकेन मनुष्येण शब्दनिर्माणं शब्दानां परिवर्तनं वा नैव कर्त्तुं शक्यते । तस्य कृतके समाजमान्यता आवश्यकी । समाजाधिष्ठितः शब्दः ।?

समानान्तरं तत्त्वं भाषाविज्ञाने सस्यूरेणोक्तोम् । तेन तत्त्वत्रयमुक्तम् ।

1. शब्दानां (चिह्नानां) यादृच्छिकता, 2. शब्दानां नित्यता, 3. शब्दानमनित्यता

सस्यूरस्य मतानुसारेण शब्दस्वरूपं तथा च तेन बोधितपदार्थः एतयोः न कोऽपि नैसर्गिकसम्बन्धः । अतः शब्दानां यादृच्छिकता वा कृत्रिमता वर्तते । किन्तु तेषां नित्यतापि वर्तते न कोपि एकः स्वेच्छया तत्र परिवर्तनमानेतुं शक्नोति । भाषाव्यवस्था परम्परया सङ्क्रमिता भवति । अतः तत्र परिवर्तनं महत्कठिनम् । शब्दाः शक्तियुक्ताः सन्ति । तस्मात् परिवर्तनं कर्तुं न शक्यते । तथापि तत्र समयानुकूलं परिवर्तनं लक्ष्यते । तत् परिवर्तनमवरोधयितुं भाषा असमर्था । किन्तु सस्यूरेणापि व्याकरणविवेचनार्थं कालविशिष्टाः भाषाप्रयोगाः शब्दप्रयोगाः वा, तेषां व्याकरणं प्रोक्तव्यं इत्युक्तम् ते तस्मिन् समये सामान्यतः नित्याः ।

**3. शुद्धशब्दोपदेशविचारः**

भाषादृष्ट्या महत्त्वपूर्णं यत् ततीयं चिन्तनं तन्नाम शुद्धाशुद्धताविचारः । शुद्धाशुद्धतायाः व्याख्यानात् पूर्वं आधुनिकभाषाविज्ञाने चर्चितान् व्याकरणस्य प्रकारान् पश्यामः । तत्र विवेचनध्येयानुसारेण व्याकरणस्य प्रकाराः भवितुमर्हन्ति । वर्णनात्मकं व्याकरणं (Descriptive Grammer) अनुशासनात्मकं वा आदेशात्मकं व्याकरणं (Prescriptive Grammer) विवेचनात्मकं व्याकरणं (Explanatory grammer) निर्माणात्मकं व्याकरणं (Generative Grammer) इत्यादि । पाणिनिः भाषां वर्णयति। भाषायां ते प्रयोगाः शक्याः तेषां निर्माणार्थं सूत्ररूपनियमान् कथयति । पतञ्जलिमुनेः व्याकरणं तु अनुशासनात्मकं लक्ष्यते । यद्यपि तैः लोकव्यवहारस्य वारंवारमुल्लेखः क्रियते तथापि पस्पशाह्निके तैः स्पष्टतया शुद्धशब्दानां अनुशासनं कृतं दृश्यते (इष्टान्वाख्यानं खल्वपि भवति । शब्देनैवार्थोऽभिधेयो नापशब्देन) ।

प्रयोजनाधिकरणेऽपि व्याकरणस्य यानि प्रयोजनानि उक्तानि तेषु अर्धाधिकानि दोषोच्चारणनिवारणमूलानि । अतः पातञ्जलमते शुद्धप्रयोगः कार्यः, शुद्धप्रयोगे एव धर्मप्राप्तिः इति ।

भाषाविज्ञानाय तु नैतन्मतं रोचते । भाषाविज्ञानं सर्वाः भाषाः समानाः इति उद्घोषयति । समाजे प्रचलितभाषासु एका कापि प्रमाणीक्रियते, अन्याश्च उपभाषा (Dialects) रूपण तिष्ठन्ति । किन्तु न ताः कनिष्ठाः अशुद्धाः भ्रष्टाः वा । तेषां पृथक्व्याकरणव्यवस्था भवति । तस्याभ्यासः पृथक्तया कर्तुं शक्यते ।

**४. व्याकरणव्याख्यानस्य उपसर्गापवादपद्धतिः**

शब्दाः कथं प्रतिपादयितव्याः इति प्रश्ने पतञ्जलिमुनिरवोचत् - 'किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः' । अतीवमहत्त्वपूर्णं विधानमेतद् । भाषाविज्ञाने 'Rule based Grammer' इत्यस्य अयमेवाधारः । पुनश्च 'Computatinal Linguistics' इति क्षेत्रे पाणिनिकृतरचनाः अस्माद् उत्सर्गापवादपद्धतिकारणादेव महत्त्वं सम्पादयन्ति । 'पूर्व ह्यपवादाः अभिनिवेशन्ते पश्चादुत्सर्गाः' एषा परिभाषा तु प्रसिद्धैव । सामान्यतः Computer Programming स्वरूपमपि तादृशमेव वर्तते । सङ्गणके पूर्वमपवादाः संयोजनीयाः पश्चादुत्सर्गाः ।

एवं प्रस्तुतलेखे पातञ्जलमहाभाष्यस्य पस्पशाह्निके अवतरिताः भाषादृष्ट्या ये मौलिकविचाराः - शब्दसङ्कल्पना, शब्दनित्यानित्यता, शुद्धोपदेशविचाराः, व्याकरणव्याख्यानस्य उत्सर्गापवादपद्धतिश्चेति एतेषां चतुर्विषयाणाम् अन्वेषणं, आधुनिकभाषाविज्ञाने तेषु साधर्म्यदर्शकसङ्कल्पनानां चिन्तनं, एत द्वयस्य चर्चा प्रयतिता ।

**सन्दर्भाः**

1. पतञ्जलिमुनिविरचित् महाभाष्यम् - हिन्दी व्याख्यया सहितम्, व्याख्याकारः - युधिष्ठिरो मीमांसकः, रामलाल कपूर ट्रस्ट हरियाणा, 2008.
2. व्याकरणमहाभाष्यम् - पस्पशाह्निकम् - सप्रदीपोद्योत भावबोधिनी हिन्दीव्याख्योपेतम्, हिन्दीव्याख्याकारः सम्पादकश्च - प्रो. जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी वाराणसी, 2013
3. श्रीमन्नागेशभट्टविरचितः परिभाषेन्दुशेखरः - 'सुबोधिनी' हिन्दीव्याख्योपेतः, हिन्दीव्याख्याकारः - आचार्य विश्वनाथ मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2011
4. Semiotics – The Basics, Chandler Daniel, Routledge publications London, 2002

5. Indian Theories of Meaning, K. Kunjunni Raja, The Adyar Library and Research Centre Chennai, 2000
6. The Word and The World – India's contribution to the study of language Bimal Krishna matilal, Oxford University press New York, 1992
7. Course in General Linguistics, Saussure Ferdinand de translated by Roy Harris, Duckworth publication, 1983
8. Introduction to the grammar of English, Rodney Huddleston, Cambridge University, 1984
9. Knowledge of Language- its nature, origin & use, Noam Chomsky, Edit. by-Ruth Nanda Anshen, Praeger Publishers ,1986

**आचार्यप्रथमवर्षम्, व्याकरणम्**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

❖❖❖

# दिवसद्वयव्यापिव्याकरणशास्त्रीय-
# राष्ट्रियसङ्गोष्ठ्याः संक्षिप्तमितिवृत्तम् ।

राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य I.Q.A.C. इत्यस्य तत्त्वावधाने व्याकरणशास्त्रीयराष्ट्रियसंगोष्ठी तथा विशिष्टव्याख्यानमाला च 06.03.2017 तः 07.03.2017 यावत् प्रावर्तत । तत्र विशिष्टव्याख्यानमालायाः उद्घाटनम् राष्ट्रिसंस्कृतसंस्थान-स्यैव जयपुरपरिसरस्य प्राचार्यैः प्रो. प्रकाशपाण्डेयवर्यैः मुम्बईपरिसरीयप्राचार्याणां प्रो. सुदेशकुमारशर्ममहोदयानाम् आध्यक्ष्ये विहितम् । तत्रोद्घाटनसत्रे वाराणसेयस्य सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य आचार्यचराः पण्डितमूर्धन्याः श्रीकान्तपाण्डेयमहाशयाः पस्पशाह्निक-महाभाष्यविषयाननुसृत्य व्याख्यन् ।

अपराह्णे एतेषां पाण्डेयवर्याणां सत्राध्यक्षत्वे संगोष्ठीसत्रं प्रारभत । तत्र दशशोधपत्राणि परिसरीयप्राध्यापकैः अन्यविश्वविद्यालयतः समागतैः प्राध्यापकैः शोधछात्रैश्च समुपस्थापितानि ।

ततोऽग्रिमे दिवसे 07.03.2017 तमे दिनाङ्के भोपालपरिसरः समागतानां पण्डितसुबोधशर्मणां सत्राध्यक्ष्यत्वे शोधपत्रसत्रं सफलतया समपीपदत् । ततः समापन-समारोहः प्रो. श्रीकान्तमहोदयानां मुख्यातिथित्वे, प्रो. सुबोधशर्ममहोदयानां सारस्वतातिथित्वे समपद्यत । उद्घाटनसत्रस्य समापनसत्रस्य च संचालनं विभागीयैः डॉ. माधवदत्तपाण्डेयैः, अपि च शोधसंगोष्ठीसत्रस्य संचालनम् डॉ. नवीनकुमारमिश्रैः समनुष्ठापितानि । संगोष्ठीविषयः **महाभाष्याद्याह्निकद्वयस्य तत्त्वविमर्शः** आसीत् । तत्र विंशतिः शोधपत्राणि अनुसंधानपराणि प्रस्तुतानि ।